उच्छिष्टेनतुसंस्पृष्टोद्रव्यहस्तःकथञ्चन।अनिधायैवतद्द्रव्यमाचान्तःशुचितामियात् १४३

प० । उच्छिष्टेन तु संस्पृष्टः द्रव्यहस्तः कथंचन अनिधाय एव तत् द्रव्यं आचांतः शुचिताम् इयात् ॥

यो० । उच्छिष्टेन कथंचन सं स्पृष्टः द्रव्यहस्तः मनुष्यः तत् द्रव्यं अनिधाय एव आचांतः शुचितां इयात् (प्राप्नुयात्) ॥

भा० । ता० । किसी पदार्थ लियेहुये मनुष्यका यदि कोई उच्छिष्ट स्पर्शकरले तो उसद्रव्यको नीचे विनारक्खेही आचमन करने से शुद्धहोता है—और इस श्लोक में द्रव्यहस्तपद से पदार्थ का सम्बन्ध लेना क्योंकि जिसके हाथमें द्रव्यहोगा वह मणिबन्धतक हाथधोकर आचमन नहीं करसक्ता १४३ ॥

वान्तोविरिक्तःस्नात्वातुघृतप्राशनमाचरेत् ।
आचामेदेवभुक्त्वान्नंस्नानंमैथुनिनःस्मृतम् १४४ ॥

प० । वांतः विरिक्तः स्नात्वा तु घृतप्राशनं आचरेत् आचामेत् एव भुक्त्वा अन्नं स्नानं मैथुनिनः स्मृतम् ॥

यो० । वांतः (कृतवमनः) विरिक्तः (जातविरेकः) स्नात्वा घृतप्राशनं आचरेत्—अन्नंभुक्त्वा यः वांतः सः आचामेत् एव मैथुनिनः (ऋतुमत्याः कृतमैथुनस्य) (मन्वादिभिः) स्नानं स्मृतम् ॥

भा० । ता० । वमन और विरेचन (मलकात्याग) करके मनुष्य स्नानकरके घृतका भक्षण करे—यहां गोविंदराजने यहकहा है कि जिसको दशवार विरेचनहुआहो—और यदि भोजन के अनन्तरही वमनकरे तव तो भोजनमात्रही करे—और ऋतुमती स्त्रीके संग मैथुनकरके स्नानमात्रही करे १४४ ॥

सुप्त्वाक्षुत्वाचभुक्त्वाचनिष्ठीव्योक्त्वानृतानिच ।
पीत्वापोऽध्येष्यमाणश्चआचामेत्प्रयतोऽपिसन् १४५ ॥

प० । सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्य उक्त्वा अनृतानि च पीत्वा अपः अध्येष्यमाणः च आचामेत् प्रयतः अपि सन् ॥

यो० । सुप्त्वा चपुनः क्षुत्वा चपुनः भुक्त्वा निष्ठीव्य—चपुनः अनृतानि उक्त्वा—अपः पीत्वा चपुनः अध्येष्यमाणः पुरुषः प्रयतः अपि सन् आचामेत् ॥

भा० । ता० । सोकर–छींककर–भोजनकरके–थूककर–झूंठबोलकर–जलपीकर–और अध्ययन करने के समय सावधान होकर आचमनकरै–पहिले २ अध्याय में जो भोजनकरके और अध्ययन के समय आचमन कहाहै वह वृतके अंगहोनेसे कहाहै यहां यह आचमनका विधान पुरुषार्थ और अध्ययनका अंग होनेसे गृहस्थियोंको भी कर्त्तव्यहै १४५ ॥

एषशौचविधिःकृत्स्नोद्रव्यशुद्धिस्तथैवच।उक्तोवःसर्ववर्णानांस्त्रीणांधर्मान्निबोधत १४६

प० । एषः शौचविधिः कृत्स्नः द्रव्यशुद्धिः तथा एव च उक्तः वः सर्ववर्णानां स्त्रीणां धर्मान् निबोधत ॥

यो० । सर्ववर्णानां एषः कृत्स्नः अशौचविधिः चपुनः तथा एव द्रव्य शुद्धिः वः (युष्माकं) उक्तः – स्त्रीणां धर्मान् यूयं निबोधत (शृणुत) ॥

भा० । ता० । सबवर्णों की यह सम्पूर्ण शौचकीविधि और तैजसआदि पात्र और वस्त्र और अन्नकी शुद्धि तुमको कही अब स्त्रियों के करने योग्य धर्मोंको सुनो १४६ ॥

बालयावायुवत्यावावृद्धयावापियोषिता।नस्वातन्त्र्येणकर्त्तव्यंकिंचित्कार्यंगृहेष्वपि१४७

प० । बालया वा युवत्या वा वृद्धया वा अपि योषिता न स्वातन्त्र्येण कर्त्तव्यम् किंचित् कार्यं गृहेषु अपि ॥

यो० । बालया – वा युवत्या वा वृद्धया योषिता गृहेषु किंचित् अपि कार्यं स्वातन्त्र्येण न कर्त्तव्यम् – किन्तुभर्त्राद्याज्ञयैव करणीयम् ॥

भा० । ता० । बालक–और युवती (जवान) और वृद्ध भी स्त्री स्वतन्त्रहोकर किंचित् कर्म अपने घरमें न करै किंतु अपने पिता पति आदिकी अनुमतिसेही करै १४७ ॥

बाल्येपितुर्वशेतिष्ठेत्पाणिग्राहस्ययौवने । पुत्राणांभर्त्तरिप्रेतेनभजेत्स्त्रीस्वतन्त्रताम्१४८

प० । बाल्ये पितुः वशे तिष्ठेत् पाणिग्राहस्य यौवने पुत्राणां भर्त्तरि प्रेते न भजेत् स्त्री स्वतन्त्रताम् ॥

यो० । स्त्री बाल्ये पितुः वशे – यौवने पाणिग्राहस्यवशे – भर्त्तरिप्रेते पुत्राणांवशे तिष्ठेत् स्त्री स्वतन्त्रतां न भजेत् ॥

भा० । ता० । बालक अवस्थामें स्त्री पिताके वशमें रहै और यौवन अवस्थामें पतिके वशमें–और पतिके मरे पीछे पुत्रोंके वशमें रहै और स्त्री कभी भी स्वतंत्रताको न भजे और पुत्रोंके अभावमें इस नारदके वचनसे ज्ञाती और राजाके आधीन रहै १४८ ॥

पित्राभर्त्रासुतैर्वापिनेच्छेद्विरहमात्मनः । एषांहिविरहेणस्त्रीगर्ह्येकुर्यादुभेकुले १४९ ॥

प० । पित्रा भर्त्रा सुतैः वा अपि न इच्छेत् विरहं आत्मनः एषां हि विरहेण स्त्री गर्ह्ये कुर्यात् उभे कुले ॥

यो० । पित्रा – भर्त्रा – वा सुतैः आत्मनः विरहं न इच्छेत् – हि (यतः) एषां विरहेण स्त्री उभेकुले (पितृपतिकुले) गर्ह्ये (निंद्ये) कुर्यात् ॥

---

१ ततःपिण्डेष्वचासत्सु पितृपक्षःप्रभुःस्त्रियाः पक्षद्वयावसानेतु राजाभर्त्तास्त्रियामतः ॥

भा० । ता० । पिता–पति–पुत्र इनसे अपने विरह (पृथक् रहना) की इच्छा न करे क्योंकि स्त्री इन (पितादि) के विरहमे दोनों कुलोंको (पिताऔरपतिके) निंदित करतीहै १४९॥

सदाप्रहृष्टयाभाव्यंगृहकार्येषुदक्षया । सुसंस्कृतोपस्करयाव्ययेचामुक्तहस्तया १५०॥

प० । सदा प्रहृष्टया भाव्यं गृहकार्येषु दक्षया सुसंस्कृतोपस्करया व्यये च अमुक्तहस्तया ॥

यो० । सदा प्रहृष्टया – गृहकार्येषुदक्षया – सुसंस्कृतोपस्करया – चपुनः व्यये अमुक्तहस्तया स्त्रिया भाव्यम् ॥

भा० । ता० । स्त्री सदैव (पतिके विरोधमेंभी) प्रसन्नरहै और घरके काममें चतुर रहै–और भली प्रकार संस्कृत (स्वच्छ) कियेहैं घरके उपस्कर (सामग्री) जिसने ऐसी रहै अर्थात् घरके सब पात्र आदिको स्वच्छ रक्खै–और व्यय (खर्च) को मुक्तहस्त (उदार) होकर न करै १५०॥

यस्मैदद्यात्पितात्वेनांभ्राताचानुमतेपितुः । तंशुश्रूषेतजीवन्तंसंस्थितंचनलङ्घयेत् १५१

प० । यस्मै दद्यात् पिता तु एनां भ्राता च अनुमते पितुः तं शुश्रूषेत जीवंतं संस्थितं च न लंघयेत् ॥

यो० । एनां पिता वा पितुः अनुमते भ्राता यस्मै दद्यात जीवंतं तं शुश्रूषेत – चपुनः संस्थितं न लंघयेत् ॥

भा० । ता० । पिता वा पिताकी अनुमतिसे भ्राता इस स्त्रीको जिसको दे जीतेहुये उसकी सेवा (टहल) करै और मरेहुये भी उसका अवलंघन न करै अर्थात् व्यभिचार और श्राद्ध तर्पण आदिका पतिके निमित्त त्याग– इनको न करै १५१ ॥

मङ्गलार्थंस्वस्त्ययनंयज्ञश्चासांप्रजापतेः । प्रयुज्यतेविवाहेषुप्रदानंस्वाम्यकारणम् १५२

प० । मङ्गलार्थं स्वस्त्ययनं यज्ञः च आसां प्रजापतेः प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम् ॥

यो० । आसां (स्त्रीणां) स्वस्त्ययनं (शांत्यनुवचनादिरूपं) चपुनः यः प्रजापतेः यज्ञः विवाहेषु प्रयुज्यते तत् मंगलार्थं (अभीष्टसंपत्त्यर्थं) यत् प्रदानं (वाग्दानरूपं) तत् स्वाम्यकारणम् ॥

भा० । स्त्रियोंका शांतिके मंत्रोंका अनुवचन और विवाहका प्रजापतिके निमित्त होम मङ्गल के लियेहै और पतिको स्वामी बनानेका कारण वाग्दानहै ॥

ता० । इन स्त्रियोंको जो स्वस्त्ययन (शांति अनुमंत्र वचन आदि) है और जो विवाहमें प्रजापतिके निमित्त यज्ञहै वह इनके मङ्गल (अभीष्ट सिद्धि)के लियेहै और जो स्त्रियोंका वाग्दान (सगाई) रूपकर्महै वही पतिके स्वामित्वका उत्पादकहै तिससे वाग्दानसे लेकर स्त्री पतिके परतन्त्र होतीहै तिससे पतिके आश्रय रहै और जो नवमे अध्यायमें कहेंगे कि (तेषांनिष्ठातु विज्ञेया विद्वद्भिः सप्तमेपदे) स्त्रियोंकी निष्ठा (पतिसेवादि) को विद्वान् सप्तपदी होने पर जाने वह भार्यात्व की सिद्धिके लियेहै इससे कुछ विरोधनहींहै १५२ ॥

अनृतावृतुकालेचमन्त्रसंस्कारकृत्पतिः । सुखस्यनित्यंदातेहपरलोकेचयोषितः १५३॥

प० । अनृतौ ऋतुकाले च मन्त्रसंस्कारकृत् पतिः सुखस्य नित्यं दाता इह परलोके च योषितः ॥

यो० । अनृतौ चपुनः ऋतुकाले इहलोके चपुनः परलोके योषितः सुखस्य नित्यं दाता मन्त्रसंस्कारकृत्पतिः अस्ति ॥

भा० । ता० । ऋतुकालके विना अथवा ऋतुकालमें इस लोकमें और परलोकमें प्रतिदिन सु-

खका देनेवाला मन्त्रोंसे संस्कार करनेवाला पतिहीहै क्योंकि इस गौतमके वचनसे ऋतुकालमें अथवा वर्जित तिथियों को छोड़कर सर्वदा गमन लिखाहै–उसी पतिकी आराधना से सुख आदि की प्राप्तिहोती है १५३ ॥

विशीलःकामवृत्तोवागुणैर्वापरिवर्जितः । उपचर्यःस्त्रियासाध्व्यासततंदेववत्पतिः १५४

प० । विशीलः कामवृत्तः वा गुणैः वा परिवर्जितः उपचर्यः स्त्रिया साध्व्या सततं देववत् पतिः ॥

यो० । विशीलः वा कामवृत्तः–वा गुणैः परिवर्जितः पतिः साध्व्या स्त्रिया सततं देववत् उपचर्यः (सेवनीयः) ॥

भा० । ता० । सदाचारहीन अथवा अन्य स्त्री में आसक्त वा गुणों से वर्जित–पतिकी स्त्री निरंतर देवता के समान पूजाकरे अर्थात् पतिको देवता के समान समझे १५४ ॥

नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोषितम् । पतिंशुश्रूषतेयेनतेनस्वर्गेमहीयते १५५॥

प० । न अस्ति स्त्रीणां पृथक् यज्ञः न व्रतं न अपि उपोषितं पतिं शुश्रूषते येन तेन स्वर्गे महीयते॥

यो० । स्त्रीणां पृथक् यज्ञः व्रतं–वा उपोषितं न अस्ति–येन पतिं शुश्रूषते तेन स्वर्गे महीयते (पूज्यते) ॥

भा० । स्त्रियों को पति के विना यज्ञ व्रत उपवास करने का अधिकार नहीं है किन्तु केवल पति की शुश्रूषा (सेवा) सेही स्त्री स्वर्गलोक में पूजाको प्राप्तहोती है ॥

ता० । स्त्रियों को अपने पति से पृथक् यज्ञ–व्रत और उपवास करनेका अधिकार नहीं है अर्थात् जैसे किसी स्त्रीके रजोदर्शन आदि दोष से उपस्थित न होने से पति दूसरी स्त्री से यज्ञ आदि करसक्ता है इसप्रकार पति के विना स्त्री यज्ञ आदि नहीं करसक्ती–और पति की अनुमति के विना व्रत और उपवास भी नहीं करसक्ती किन्तु पति की सेवासेही स्वर्गलोक में पूजा को प्राप्त होतीहै १५५ ॥

पाणिग्राहस्यसाध्वीस्त्रीजीवतोवामृतस्यवा ।
पतिलोकमभीप्सन्तीनाचरेत्किंचिदप्रियम् १५६ ॥

प० । पाणिग्राहस्य साध्वी स्त्री जीवतः वा मृतस्य वा पतिलोकं अभीप्सन्ती न आचरेत् किंचित् अप्रियम् ॥

यो० । पतिलोकं अभीप्सन्ती साध्वी स्त्री जीवतः वा मृतस्य पाणिग्राहस्य किंचित् अप्रियं न आचरेत् ॥

भा० । ता० । पतिके संग धर्मपूर्वक आचरण से संचय किया जो स्वर्गलोक उसको चाहती हुई साधुस्वभाव स्त्री जीवते और मरेहुये अपने पति की अप्रसन्नताका आचरण न करे अर्थात् पति के जीवते उनकी आज्ञाका पालन और मरेपीछे व्यभिचार का त्याग और शास्त्रोक्त श्राद्ध–इनको करती रहे १५६ ॥

कामंतुक्षपयेद्देहंपुष्पमूलफलैःशुभैः । नतुनामापिगृह्णीयात्पत्यौप्रेतेपरस्यतु १५७॥

प० । कामं तु क्षपयेत् देहं पुष्पमूलफलैः शुभैः न तु नाम अपि गृह्णीयात् पत्यौ प्रेते परस्य तु ॥

---

१ ऋतावुपेयात्सर्व्वत्र वाप्रतिषिद्ध वर्ज्जम् ॥

यो० । शुभैः पुष्पमूलफलैः कामं देहं क्षपयेत् परन्तु पत्यौ प्रेतेसति परस्य नाम अपि न गृह्णीयात् ॥

भा० । ता० । पवित्र—पुष्प मूल और फलों से अपने देह को चाहै कृश करदे परन्तु पति के मरे पीछे अन्य पुरुष का नाम भी न ले अर्थात् व्यभिचार में मनको न लगावे १५७ ॥

आसीतामरणात्क्षान्तानियताब्रह्मचारिणी।योधर्मएकपत्नीनांकांक्षन्तीतमनुत्तमम्१५८

प० । आसीत आमरणात् क्षान्ता नियता ब्रह्मचारिणी यः धर्मः एकपत्नीनां कांक्षंती तं अनुत्तमम् ॥

यो० । एकपत्नीनां अनुत्तमं यः धर्मः अनुत्तमं तं धर्मं कांक्षंती आमरणात् (मरणपर्यंतं) क्षांता — नियता — ब्रह्मचारिणी आसीत ॥

भा० । ता० । पतिव्रता स्त्रियों का जो सर्वोत्तम धर्म है उसको चाहतीहुई विधवा स्त्री मरण-पर्यंत क्षमासे युक्त और नियम सहित और ब्रह्मचर्य से रहै अर्थात् पुत्रके न होने पर भी पुत्रके लिये पर पुरुषका संग न करे १५८ ॥

अनेकानिसहस्राणिकुमारब्रह्मचारिणाम्।दिवंगतानिविप्राणामकृत्वाकुलसंततिम्१५९

प० । अनेकानि सहस्राणि कुमारब्रह्मचारिणां दिवं गतानि विप्राणां अकृत्वा कुलसंततिम् ॥

यो० । कुमारब्रह्मचारिणां विप्राणां अनेकानि सहस्राणि कुलसन्ततिं अकृत्वा दिवं गतानि (स्वर्गम्प्राप्तानि) ॥

भा० । ता० । बालक अवस्थासे ही जिन्होंने ब्रह्मचर्य धारणकिया अर्थात् विवाह नहीं किया ऐसे (बालखिल्य सनकादि) ब्राह्मणों के अनेक सहस्र कुलकी वृद्धि के लिये संतान के न पैदा करने पर भी स्वर्ग में चलेगये हैं १५९ ॥

मृतेभर्त्तरिसाध्वीस्त्रीब्रह्मचर्येव्यवस्थिता। स्वर्गंगच्छत्यपुत्रापियथातेब्रह्मचारिणः१६०

प० । मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता स्वर्गं गच्छति अपुत्रा अपि यथा ते ब्रह्मचारिणः ॥

यो० । भर्त्तरि मृतेसति ब्रह्मचर्ये व्यवस्थिता अपुत्रा अपि साध्वी स्त्री यथा ते ब्रह्मचारिणः (स्वर्गगताः) तथा स्वर्गं गच्छति ॥

भा० । ता० । साधु है आचरण जिसका ऐसी स्त्री पति के मरेपीछे पुत्र के न होने पर भी अर्थात् अन्य पुरुष के संग से पुत्रको पैदा न भी करके उस प्रकार स्वर्गमें जाती है जैसे वे ब्रह्म-चारी (सनकादि) गयेहैं १६० ॥

अपत्यलोभाद्यातुस्त्रीभर्त्तारमतिवर्त्तते। सेहनिन्दामवाप्नोतिपतिलोकाच्चहीयते १६१ ॥

प० । अपत्यलोभात् या तु स्त्री भर्त्तारं अतिवर्त्तते सा इह निन्दां अवाप्नोति पतिलोकात् च हीयते ॥

यो० । या स्त्री अपत्यलोभात् भर्त्तारं अतिवर्त्तते सा इह (लोके) निन्दां अवाप्नोति चपुनः पतिलोकात् हीयते-अर्थात् परपुरुषोत्पन्नपुत्रेण स्वर्गं न लभते इत्यर्थः ॥

भा० । ता० । जो स्त्री मेरेपुत्रहो उससे मैं स्वर्ग में प्राप्तहूंगी इसबुद्धि से अपने पतिका अव-

लंघनकरतीहै अर्थात् व्यभिचार से पुत्रको पैदाकरतीहै वह स्त्री इसलोक में निन्दाको प्राप्तहोती है और पतिके लोक (स्वर्ग) में नहींजाती १६१ ॥

नान्योत्पन्नाप्रजास्तीहनचाप्यन्यपरिग्रहे।नद्वितीयश्चसाध्वीनांक्वचिद्भर्त्तोपदिश्यते१६२

प० । न अन्योत्पन्ना प्रजा अस्ति इह न च अपि अन्यपरिग्रहे न द्वितीयः च साध्वीनां क्वचित् भर्त्ता उपदिश्यते ॥

यो० । इहलोके अन्योत्पन्ना चपुनः अन्यपरिग्रहे अपि प्रजा न अस्ति चपुनः साध्वीनां स्त्रीणां द्वितीयः भर्त्ता क्वचित् न उपदिश्यते शास्त्रेणेतिशेषः ॥

भा० । अन्यपुरुष से पैदाकी और अन्यपुरुष की स्त्रीमें पैदाकीहुई सन्तान स्त्री और पुरुष दोनोंकी नहींहोती और साधु (सज्जन) स्त्रियोंको दूसरापति किसीभी शास्त्रमें नहीं कहाहै ॥

ता० । पहिले श्लोकमें कहेमें कारण कहतेहैं कि जिससे पतिसेभिन्न पुरुष से उत्पन्न सन्तान नहींकहाती अर्थात् शास्त्रोक्त नहीं होती और अन्यपत्नी में पैदाकीहुई सन्तान पैदाकरनेवाले पुरुष की नहींहोती और यह बातभी अनियोग जहांहो वहां जाननी क्योंकि जहां गुरुआदिकी आज्ञाहोतीहै वहां अनेक पति होसक्तेहैं इससे दूसराभी पतिहोहै परन्तु कलियुग में देवरआदि से पुत्रकी उत्पत्ति मनेहै तिससे निन्दाहोने से साधु स्वभाववाली स्त्रियोंको जगत्में किसी शास्त्र मेंभी दूसराभर्त्ता (पति) नहींकहाहै—इससे पुनर्भू (जिसकेदूसरापतिहो) भी नहींहोती १६२॥

पतिंहित्वापकृष्टंस्वमुत्कृष्टंयानिषेवते।निन्द्यैवसाभवेल्लोकेपरपूर्वेतिचोच्यते १६३ ॥

प० । पतिं हित्वा अपकृष्टं स्वं उत्कृष्टं या निषेवते निन्द्या एव सा भवेत् लोके परपूर्वा इति च उच्यते ॥

यो० । या स्त्री स्वं अपकृष्टं पतिं हित्वा उत्कृष्टं पतिं निषेवते सा स्त्री लोके निन्द्या एव भवेत् चपुनः जनैः परपूर्वा इति उच्यते ॥

भा० । ता० । जो स्त्री अपने अपकृष्ट (नीचवर्णका) पतिको त्यागकर उत्कृष्ट (उत्तमवर्ण) पतिको सेवती है वहस्त्री लोकमें निंदाको प्राप्तहो और वह परपूर्वा (जिसका पहिले अन्यपति हो) कहातीहै १६३ ॥

व्यभिचारात्तुभर्तुःस्त्रीलोकेप्राप्नोतिनिन्द्यताम् ।
शृगालयोनिंप्राप्नोतिपापरोगैश्चपीड्यते १६४ ॥

प० । व्यभिचारात् तु भर्तुः स्त्री लोके प्राप्नोति निंद्यतां शृगालयोनिं प्राप्नोति पापरोगैः च पीड्यते ॥

यो० । भर्तुः (पत्युः) व्यभिचारात् स्त्री लोके निंद्यतां प्राप्नोति चपुनः शृगालयोनिं प्राप्नोति चपुनः पापरोगैः (कुष्ठादिभिः) पीड्यते ॥

भा० । ता० । स्त्री पतिके व्यभिचार (अवलंघन) से जगत् में निन्दाको प्राप्तहोती है और मरने के अनन्तर शृगाल (गीदड़) की योनिको प्राप्तहोतीहै और कुष्ठआदि पापरोगोंसे पीडित होतीहै १६४ ॥

पतिंयानाभिचरतिमनोवाग्देहसंयता।साभर्तृलोकमाप्नोतिसद्भिःसाध्वीतिचोच्यते१६५

प० । पतिं या न अभिचरति मनोवाग्देहसंयता सा भर्तृलोकं आप्नोति सद्भिः साध्वी इति च उच्यते ॥

यो० । मनोवाग्देहसंयता या स्त्री पतिं न अभिचरति सा भर्तृलोकं आप्नोति चपुनः सद्भिः साध्वी इति उच्यते ॥

भा० । मन वाणी और देहकी सावधानी से जो स्त्री अपने पतिका व्यभिचार नहीं करती वह स्त्री पतिके लोकको प्राप्तहोती और सत्पुरुष उसे साध्वी कहते हैं ॥

ता० । मन वाणी देह इनको वशमें रखकर जो स्त्री अपने पतिका व्यभिचार नहीं करती अर्थात् मन वाणी देहसे अपने पतिकोही जो सेवतीहै वह स्त्री अपनेपति की सेवासे सञ्चय किये पतिके लोकको प्राप्तहोतीहै और सज्जनपुरुष उसे साध्वीकहतेहैं अर्थात् मन वाणीसेभी अपने पतिका व्यभिचार न करे १६५ ॥

अनेननारीवृत्तेनमनोवाग्देहसंयता । इहाग्र्यांकीर्त्तिमाप्नोतिपतिलोकंपरत्रच १६६ ॥

प० । अनेन नारीवृत्तेन मनोवाग्देहसंयता इह अग्र्यां कीर्त्तिं आप्नोति पतिलोकं परत्र च ॥

यो० । मनोवाग्देहसंयता स्त्री अनेन नारीवृत्तेन इह अग्र्यां कीर्त्तिं आप्नोति चपुनः परत्र (परलोके) पतिलोकं आप्नोति ॥

भा० । ता० । मन वाणी और देह इनको वशमें रखकर स्त्री इस पूर्वोक्त स्त्रीधर्म के करनेसे अर्थात् श्रेष्ठ आचरण–पतिकीसेवा–व्यभिचार के त्याग आदिसे इसलोकमें उत्तम कीर्त्ति और परलोकमें पतिके लोकको प्राप्तहोतीहै १६६ ॥

एवंवृत्तांसवर्णांस्त्रींद्विजातिःपूर्वमारिणीम् । दाहयेदग्निहोत्रेणयज्ञपात्रैश्चधर्मवित् १६७

प० । एवंवृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीं दाहयेत् अग्निहोत्रेण यज्ञपात्रैः च धर्मवित् ॥

यो० । धर्मवित् द्विजातिः पूर्वमारिणीं एवंवृत्तां सवर्णां स्त्रीं अग्निहोत्रेण चपुनः यज्ञपात्रैः दाहयेत् (दाहंकुर्यात्) ॥

भा० । ता० । धर्मका ज्ञाता द्विजाति (ब्राह्मण क्षत्रिय वैश्य) इस पूर्वोक्त आचारण वाली अपने समान वर्णकी और अपनेसे पहिले मरीहुई स्त्रीको वेद और धर्मशास्त्रकी अग्नि और यज्ञ के श्रुव आदि पात्रोंसे दाहकरे अर्थात् जिसअग्निमें होमकरताथा उसीअग्निसे दग्ध करदे १६७ ॥

भार्यायैपूर्वमारिण्यैदत्वाग्नीनन्त्यकर्मणि । पुनर्दारक्रियांकुर्यात्पुनराधानमेवच १६८ ॥

प० । भार्यायै पूर्वमारिण्यै दत्वा अग्नीन् अंत्यकर्मणि पुनः दारक्रियां कुर्यात् पुनः आधानं एव च ॥

यो० । द्विजातिः पूर्वमारिण्यै भार्यायै अन्त्यकर्मणि अग्नीन् दत्वा दारक्रियां चपुनः आधानं पुनः कुर्यात् ॥

भा० । ता० । द्विजाति पुत्रहो वा न हो पहिले मरीहुई स्त्रीको अंत्यके कर्म (दाह) में अग्नियोंको देकर फिर भी गृहस्थाश्रमके निमित्त विवाहकरै और अग्निहोत्रको भी ग्रहणकरै अर्थात् स्त्री और अग्निके विना गृहस्थमें न रहै १६८ ॥

अनेनविधिनानित्यंपञ्चयज्ञान्नहापयेत् । द्वितीयमायुषोभागंकृतदारोगृहेवसेत् १६९ ॥
इतिमानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायांपञ्चमोऽध्यायः ५ ॥

प० । अनेन विधिना नित्यं पंचयज्ञान् न हापयेत् द्वितीयं आयुषः भागं कृतदारः गृहे वसेत् ॥

यो० । अनेन विधिना पंचयज्ञान नित्यं न हापयेत् — कृतदारः आयुषः द्वितीयं भागं गृहे वसेत् (तिष्ठेत्) ॥

भा० । ता० । द्विजाति इस पूर्वोक्त विधिसे पांच यज्ञोंको न छोड़े और विवाहको करके अवस्थाके दूसरे भाग पर्यन्त गृहस्थ आश्रम के धर्मोंको करताहुआ घरमें वसे—और तिसमें भी पांच यज्ञोंको सर्वोत्तम जानकर अवश्यकरै १६९ ॥

इति मन्वर्थभास्करे पंचमोऽध्यायः ५ ॥

अथषष्ठोऽध्यायः ॥

एवंगृहाश्रमेस्थित्वाविधिवत्स्नातकोद्विजः । वनेवसेत्तुनियतोयथावद्विजितेन्द्रियः १ ॥

प० । एवं गृहाश्रमे स्थित्वा विधिवत् स्नातकः द्विजः वने वसेत् तु नियतः यथावद्विजितेन्द्रियः ॥

यो० । स्नातकः (गृहस्थः) द्विजः विधिवत् एवं गृहाश्रमे स्थित्वा यथावद्विजितेन्द्रियः नियतः सन् वने वसेत् ॥

भा० । ता० । चारों आश्रमोंका अधिकारी द्विज समावर्त्तन कर्मके अनंतर इस पूर्वोक्त प्रकार से विधिपूर्वक गृहस्थ आश्रममें टिककर निश्चयको करके शास्त्रोक्त विधिसे जीतीहैं इंद्रिय जिसने अर्थात् कषायोंके पकने पर वानप्रस्थ आश्रममें टिकै १ ॥

गृहस्थस्तुयदापश्येद्वलीपलितमात्मनः । अपत्यस्यैवचापत्यंतदारण्यंसमाश्रयेत् २ ॥

प० । गृहस्थः तु यदा पश्येत् वलीपलितं आत्मनः अपत्यस्य एव च अपत्यं तदा अरण्यं समाश्रयेत् ॥

यो० । गृहस्थः यदा आत्मनः (देहस्य) वलीपलितं चपुनः अपत्यस्य एव अपत्यं पश्येत् — तदा अरण्यं समाश्रयेत् (वनंगच्छेत्) ॥

भा० । ता० । गृहस्थी जिस समय अपनेदेहका वलीपलित (त्वचाको ढीली) और अपने पुत्रके पुत्र (पोता) को देखले अर्थात् ऐसे वैराग्यकी दशाको जानकर वनका आश्रयले अर्थात् वसै २ ॥

संत्यज्यग्राम्यमाहारंसर्वंचैवपरिच्छदम् । पुत्रेषुभार्यांनिक्षिप्यवनंगच्छेत्सहैववा ३ ॥

प० । संत्यज्य ग्राम्यं आहारं सर्वं च एव परिच्छदम् पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत् सह एव वा ॥

यो० । ग्राम्यं आहारं चपुनः सर्वं परिच्छदं संत्यज्य पुत्रेषु भार्यां निक्षिप्य वा (भार्यया) सहएव वनं गच्छेत् ॥

भा० । ता० । व्रीही यव आदि ग्रामके भोजन और शय्या आदि संपूर्ण सामग्रियोंको त्यागकर और वनवासको न चाहतीहुई स्त्रीको पुत्रोंके आधीन करके और वनवास चाहतीहुईको अपने संगलेकर वनमें चलाजाय ३ ॥

अग्निहोत्रंसमादायगृह्यंचाग्निपरिच्छदम् । ग्रामादरण्यंनिःसृत्यनिवसेन्नियतेन्द्रियः ४ ॥

प० । अग्निहोत्रं समादाय गृह्यं च अग्निपरिच्छदम् ग्रामात् अरण्यं निःसृत्य निवसेत् नियतेन्द्रियः ॥

यो० । अग्निहोत्रं चपुनः गृह्यं अग्निपरिच्छदं समादाय ग्रामात् अरण्यं निःसृत्य नियतेन्द्रियः सन् अरण्ये निवसेत् ॥

भा० । ता० । अग्निहोत्र और घरके उपकरण और स्रुक् और स्रुव आदि सामग्रीको ग्रहण करके और ग्रामसे वनमें जाकर इन्द्रियोंको वशीभूतकरके वनमेंवसे—अर्थात् जितेन्द्रिय रहे ४ ॥

मुन्यन्नैर्विविधैर्मेध्यैःशाकमूलफलेनवा । एतानेवमहायज्ञान्निर्वपेद्विधिपूर्वकम् ५ ॥

प० । मुन्यन्नैः विविधैः मेध्यैः शाकमूलफलेन वा एतान् एव महायज्ञान् निर्वपेत् विधिपूर्वकम् ॥

यो० । विविधैः मेध्यैः मुन्यन्नैः (नीवारादिभिः) वा शाकमूलफलेन एतान् एव महायज्ञान् विधिपूर्वकम् निर्वपेत् (कुर्यात्) ॥

भा० । ता० । नानाप्रकार के पवित्र मुनियों के अन्न (नीवारआदि) से अथवा वनके शाक मूल और फलोंसे गृहस्थको करनेयोग्य इन्हीं पांचयज्ञोंको शास्त्रोक्तरीति से करे ५ ॥

वसीतचर्मचीरंवासायंस्नायात्प्रगेतथा । जटाश्चबिभृयान्नित्यंश्मश्रुलोमनखानिच ६ ॥

प० । वसीत चर्म चीरं वा सायं स्नायात् प्रगे तथा जटाः च बिभृयात् नित्यं श्मश्रुलोमनखानि च ॥

यो० । चर्म वा चीरं वसीत — सायं तथा प्रगे स्नायात् — जटाः चपुनः श्मश्रुलोमनखानि नित्यं बिभृयात् (धारयेत्) ॥

भा० । मृगआदि का चर्म चीर और वल्कल इनको धारे और सायंकाल और प्रातःकाल स्नानकरे और जटा श्मश्रु लोम नख इनकोधारे ॥

ता० । मृगआदि का चर्म वा चीर (पुरानेवस्त्र) इनका आच्छादन करे—हारीतऋषि ने तो इस वचनसे वल्कल का धारण करना भी कहाहै इससे वल्कल भी धारणकरे और सायंकाल और प्रातःकाल स्नानकरे और नित्य जटा और श्मश्रु (डाढ़ी) लोम और नख इनको धारण करे ६ ॥

यद्भक्ष्यंस्यात्ततोदद्याद्बलिंभिक्षांचशक्तितः । अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् ७

प० । यत् भक्ष्यं स्यात् ततः दद्यात् बलिं भिक्षां च शक्तितः अम्मूलफलभिक्षाभिः अर्चयेत् आश्रमागतान् ॥

यो० । यत् (स्वस्य) भक्ष्यं स्यात् ततः बलिं चपुनः भिक्षां शक्तितः दद्यात् — आश्रमागतान् (अतिथीन्) अम्मूलफलभिक्षाभिः अर्चयेत् (पूजयेत्) ॥

१ वल्कलशाली चर्मचीरकुशमुञ्जफलकवासाः ॥

भा० । ता० । वनमें जो अपने भोजनकी वस्तुहों उनसेही अपनी शक्ति के अनुसार बलि और भिक्षादे और अपने आश्रम में आयेहुये अभ्यागतों को जल मूल फल और भिक्षासेपूजे अर्थात् सत्कारकरे ७ ॥

स्वाध्यायेनित्ययुक्तःस्याद्दान्तोमैत्रःसमाहितः।दातानित्यमनादातासर्वभूतानुकम्पकः८

प० । स्वाध्याये नित्ययुक्तः स्यात् दान्तः मैत्रः समाहितः दाता नित्यं अनादाता सर्वभूतानुकंपकः ॥

यो० । दान्तः मैत्रः समाहितः द्विजः स्वाध्याये नित्ययुक्तः स्यात् दाता अनादाता — सर्वभूतानुकंपकः नित्यं स्यात् ॥

भा० । ता० । द्विज वेदके अभ्यास में सदैव युक्तरहे और शीत उष्णआदि द्वंद्वोंकोसहे और सबका उपकार करे और मनकोरोके और निरन्तरदानदे और प्रतिग्रह न ले और सम्पूर्ण भूतों पर दया रक्खे ८ ॥

वैतानिकंचजुहुयादग्निहोत्रंयथाविधि।दर्शमस्कन्दयन्पर्वपौर्णमासंचयोगतः९॥

प० । वैतानिकं च जुहुयात् अग्निहोत्रं यथाविधि दर्शं अस्कंदयन् पर्व पौर्णमासं च योगतः ॥

यो० । योगतः दर्शं पर्व चपुनः पौर्णमासं पर्व अस्कंदयन् (अपरित्यजन) सन् वैतानिकं अग्निहोत्रं यथाविधि (शास्त्रोक्तरीत्या) जुहुयात् ॥

भा० । अमावस्या और पूर्णिमा के योग (समय) में शास्त्रोक्तरीति से वैतानिक होम को अवश्यही करे ॥

ता० । गार्हपत्य अग्निके कुण्डकी अग्नियोंका जो आहवनीय और दक्षिणाग्नियोंके कुण्डोंमें विहार (लेजाना) उसे वितान कहतेहैं उसअग्नि में जो होमकियाजाय उसे वैतानिक कहते हैं उस वैतानिक होमको अमावस्या और पूर्णिमाके पर्वोंको नहींत्यागताहुआ वानप्रस्थ शास्त्रोक्त रीतिसेकरे और भार्या (स्त्री) पुत्रोंको भी सौंपदीहो तथापि इनका परित्याग न करे जैसे स्त्रीके रजस्वलाहोनेपर करताथा अर्थात् मावस और पूर्णिमाके दिन पूर्वोक्तहोमको अवश्यकरे ९ ॥

ऋक्षेष्ट्याग्रायणंचैवचातुर्मास्यानिचाहरेत्।उत्तरायणंचक्रमशोदाक्षस्यायनमेवच१०॥

प० । ऋक्षेष्ट्याग्रायणं च एवं चातुर्मास्यानि च आहरेत् उत्तरायणं च क्रमशः दाक्षस्य अयनं एवं च ॥

यो० । ऋक्षेष्ट्याग्रायणं चपुनः चातुर्मास्यानि चपुनः उत्तरायणं चपुनः दाक्षस्य अयनं क्रमशः (क्रमेण) आहरेत् (कुर्यात्) ॥

भा० । नक्षत्रयज्ञ और नये अन्नका यज्ञ और चातुर्मास्य—उत्तरायण और दक्षिणायन यज्ञों को क्रमसे करे ॥

ता० । नक्षत्रयज्ञ और नये अन्नका यज्ञ और चातुर्मास्य यज्ञ उत्तरायण और दक्षिणायनयज्ञ इनको क्रमसे करे—इसमें कोई आचार्य यह कहते हैं कि वेदोक्त यह सम्पूर्ण दर्श पौर्णमासआदि कर्म जो वानप्रस्थ का कहाहै वह कुछ करने के लिये नहीं कहा किंतु वानप्रस्थकी प्रशंसाके लिये कहाहै क्योंकि ये सब कर्म ग्राम में उत्पन्न व्रीहिआदि से कियेजातेहैं और स्मृतिका यह सामर्थ्य

नहींहै श्रुतिके अंगको बाधे—यह ठीकनहींहै क्योंकि इससे अग्रिमश्लोक (वासंत इत्यादि) में मुनियों के नीवारआदि से चरु पुरोडाश आदि विधि वानप्रस्थको जो कहीहै उसकाभी निषेध नहींहोसक्ता—गोविंदराज तो यह कहते हैं कि किसीप्रकार से वनमें उत्पन्न व्रीहि आदिकोंसेही इनकर्मों को वानप्रस्थकरै १० ॥

वासंतशारदैर्मेध्यैर्मुन्यन्नैःस्वयमाहृतैः । पुरोडाशांश्चरूंश्चैवविधिवन्निर्वपेत्पृथक् ११ ॥

प० । वासंतशारदैः मेध्यैः मुन्यन्नैः स्वयं आहृतैः पुरोडाशान् चरून् च एव विधिवत् निर्वपेत् पृथक् ॥

यो० । स्वयं आहृतैः मेध्यैः वासंतशारदैः मुन्यन्नैः पुरोडाशान चपुनः चरून विधिवत् पृथक् निर्वपेत् (संपादयेत्) ॥

भा० । ता० । वसंत और शरदऋतुमें पैदाहुये पवित्र और स्वयं इकट्ठे किये मुनियोंके नीवार आदि अन्नोंसे पुरोडाश और चरुओंको शास्त्रोक्त रीतिसे पृथक्२ करै ११ ॥

देवताभ्यस्तुतद्धुत्वावन्यंमेध्यतरंहविः । शेषमात्मनियुञ्जीतलवणंचस्वयंकृतम् १२ ॥

प० । देवताभ्यः तु तत् हुत्वा वन्यं मेध्यतरं हविः शेषं आत्मनि युंजीत लवणं च स्वयंकृतम् ॥

यो० । वन्यं मेध्यतरं तत् हविः देवताभ्यः हुत्वा शेषंहविः चपुनः स्वयंकृतं लवणं आत्मनि युंजीत (स्वयं भुंजीत) ॥

भा० । ता० । वनके नीवार आदिसे बनाई उस हविः (अन्न) को देवताओंको देकर शेष अन्नको और ऊषर आदिसे स्वयं बनायेहुये लवणको स्वयं भोजनकरै- अर्थात देवताओंके देनेसे शेष अन्नकोही स्वयं भक्षण करै १२ ॥

स्थलजौदकशाकानिपुष्पमूलफलानिच ।मेध्यवृक्षोद्भवान्यद्यात्स्नेहांश्चफलसंभवान् १३

प० । स्थलजौदकशाकानि पुष्पमूलफलानि च मेध्यवृक्षोद्भवानि अद्यात् स्नेहान् च फलसंभवान् ॥

यो० । स्थलजौदकशाकानि चपुनः मेध्यवृक्षोद्भवानि पुष्पमूलफलानि—चपुनः फलसंभवान् स्नेहान् अद्यात् (भक्षयेत्) ॥

भा० । ता० । स्थल और जलमें पैदाहुये शाक और पवित्र (यज्ञके) वृक्षोंमें पैदाहुये पुष्प मूल और फल और गोंदी आदि वृक्षोंके फलमेंसे उत्पन्न स्नेह—इनको वानप्रस्थ भक्षणकरै १३ ॥

वर्जयेन्मधुमांसंचभौमानिकवकानिच । भूस्तृणंशिग्रुकंचैवश्लेष्मातकफलानिच १४ ॥

प० । वर्जयेत् मधु मांसं च भौमानि कवकानि च भूस्तृणं शिग्रुकं च एव श्लेष्मातकफलानि च ॥

यो० । मधु चपुनः मांसं चपुनः भौमानिकवकानि—भूस्तृणं चपुनः शिग्रुकं—चपुनः श्लेष्मातकफलानि (वानप्रस्थः) वर्जयेत् ॥

भा० । सहत—मांस और सबप्रकार के कवक और भूस्तृण—और शिग्रु और श्लेष्मातक—इनको वानप्रस्थ वर्जदे ॥

ता० । सहत-मांस और भौम (जो भूमिमें पैदाहों) ऐसे कवक (छत्राक) और भूस्तृण (जो मालवेमें होताहै ऐसा शाक) और शिग्रु (वाह्लीकदेशमें प्रसिद्ध शाक) और श्लेष्मातक (बहेड़ा) के फल-इन सबको वानप्रस्थ वर्जदे-यहां कवकों का जो भौमानि विशेषण दियाहै उसका यह तात्पर्य नहीं है कि जो छत्राकार भूमिमें पैदाहों वेही वर्जितहैं किंतु वृक्षपर पैदाहुये भी वर्जितहैं-यहांपर गोविंदराज का तो यह कथनहै कि कवकोंका जो भौम विशेषण दियाहै उससे यह प्रतीतहोताहै अन्य वृक्ष आदिके कवक भक्षणके योग्यहैं-यह ठीकनहीं क्योंकि मनुजीने द्विजातियोंको सब प्रकारके कवक अभक्ष्य कहेहैं और वानप्रस्थको तो नियमकी अधिकताही उचितहै अर्थात् सब प्रकारके कवकत्यागने योग्यहैं-यमराजने तो इसै वचनसे यह कहाहै कि भूमिमें अथवा वृक्षमें पैदाहुये छत्राकोंको जो भक्षणकरतेहैं उनको ब्रह्महत्यारे जानना और वे ब्रह्महत्यारोंमें भी निंदितहोतेहैं अर्थात् वृक्षपर पैदाहुये कवक भी नहींखाने-और मेधातिथिने भौमानि इस पदसे गोजिह्वा (गोभी) का निषेध कहाहै यह भी ठीक नहीं क्योंकि भौमपद का गोजिह्वा अर्थ किसी भी अभिधानकोश आदिमें प्रसिद्ध नहींहै-यद्यपि कवकों का निषेध पांचवें अध्यायमें कहआये थे यहांपर पुनः जो निषेधहै सो भूस्तृण आदिके भक्षण का जो प्रायश्चित्तहै वही प्रायश्चित्त कवकोंके भक्षणमेंहै यह जतानेके लियेहै १४ ॥

त्यजेदाश्वयुजेमासिमुन्यन्नंपूर्वसंचितम् । जीर्णानिचैववासांसिशाकमूलफलानिच १५॥

प० । त्यजेत् आश्वयुजे मासि मुन्यन्नं पूर्वसंचितं जीर्णानि च एव वासांसि शाकमूल फलानि च ॥

यो० । पूर्वसंचितं मुन्यन्नं चपुनः जीर्णानि वासांसि चपुनः शाकमूलफलानि आश्वयुजे मासि त्यजेत् ॥

भा० । ता० । पहिला इकट्ठा किया मुनियों का नीवार आदि अन्न और जीर्णवस्त्र और शाक मूल फल इनसबको आश्विन के महीने में त्यागदे अर्थात् फेंकदे १५ ॥

नफालकृष्टमश्नीयादुत्सृष्टमपिकेनचित् । नग्रामजातान्यार्त्तोऽपिमूलानिचफलानिच १६

प० । न फालकृष्टं अश्नीयात् उत्सृष्टं अपि केनचित् न ग्रामजातानि आर्त्तः अपि मूलानि च फलानि च ॥

यो० । आर्त्तः (क्षुधापीडितः) अपि वानप्रस्थः फालकृष्टं केनचित् पुरुषेण उत्सृष्टं (त्यक्तं) अपि चपुनः ग्रामजातानि मूलानि-फलानि न अश्नीयात् (न भक्षयेत्) ॥

भा० । ता० । हलसे जोते हुये खेत में पैदाहुये-और किसी के त्यागे हुये अन्न को और ग्राम में विना हलके जोते पैदाहुये मूल और फलों को वानप्रस्थ भक्षण न करे १६ ॥

अग्निपक्वाशनोवास्यात्कालपक्वभुगेववा । अश्मकुट्टोभवेद्वापिदन्तोलूखलिकोऽपिवा १७

प० । अग्निपक्वाशनः वा स्यात् कालपक्वभुक् एव वा अश्मकुट्टः भवेत् वा अपि दंतोलूखलिकः अपि वा ॥

---

१ भूमिजं वृक्षजं वापि छत्राकं भक्षयंतिये ब्रह्मघ्नांस्तान् विजानीयात् ब्रह्मवादिषु गर्हितान् ॥

यो० । अथवा वनस्थः द्विजः अग्निपक्वाशनः वा कालपक्वभुक् एव स्यात्—अथवा अश्मकुट्टः वा दन्तोलूखलिकः भवेत् ॥

भा० । ता० । वानप्रस्थ द्विज अग्नि मे पकेहुये पदार्थको अथवा काल (समयपर) से पके हुये को भक्षण करै और उसको भी पत्थरसे कूटकर भक्षण करै अथवा अपने दांतोंसेही चबा २ कर भक्षणकरै अर्थात् यथा कथंचित् उदर को भरै विशेष कर स्वादिष्ट पदार्थों में मन को न चलावै १७ ॥

सद्यःप्रक्षालकोवास्यान्माससंचयिकोऽपिवा।षण्मासनिचयोवास्यात्समानिचयएववा १८

प० । सद्यःप्रक्षालकः वा स्यात् माससंचयिकः अपि वा षण्मासनिचयः वा स्यात् समानिचयः एव वा ॥

यो० । अथवा वनस्थः द्विजः—सद्यःप्रक्षालकः वा माससंचयिकः स्यात् अथवा षण्मासनिचयः वा समानिचयः स्यात् ॥

भा० । ता० । वानप्रस्थ द्विज एकही दिनके लिये अथवा एक मासके लिये अथवा छः महीने के लिये अथवा एक वर्ष के निर्वाहके लिये नीवार आदि का संचय करै—इन सब में पहिला २ श्रेष्ठ है १८ ॥

नक्तंचान्नंसमश्नीयाद्दिवावाहृत्यशक्तितः।चतुर्थकालिकोवास्यात्स्याद्वाप्यष्टमकालिकः १९

प० । नक्तं च अन्नं समश्नीयात् दिवा वा आहृत्य शक्तितः चतुर्थकालिकः वा स्यात् स्यात् वा अपि अष्टमकालिकः ॥

यो० । शक्तितः अन्नं आहृत्य नक्तं वा दिवा समश्नीयात् अथवा चतुर्थकालिकः स्यात् अथवा अष्टमकालिकः स्यात् ॥

भा० । अपनी शक्तिभर अन्नको लाकर रात्रि को अथवा दिनमें भोजन करै—अथवा चौथे कालमें वा आठवें कालमें भोजन करै ॥

ता० । अपनी सामर्थ्य से अन्नको लाकर रात्रिको अथवा दिनमें भोजन करै—अथवा दिन के चौथे कालमें वा आठवें काल में भोजन करै अर्थात् सायंकाल और प्रातःकाल भोजन करना मनुष्यों के लिये देवताओं ने [१]वेद वचन से कहा है उसमें भी एकदिन उपवास करके दूसरे दिन सायंकाल के समय भोजनकरै अथवा तीनरात्र उपवास करके चौथे दिन की रात्रिमें भोजन करै १९ ॥

चान्द्रायणविधानैर्वाशुक्लकृष्णेचवर्त्तयेत्।पक्षान्तयोर्वाप्यश्नीयाद्यवागूंक्वथितांसकृत् २०॥

प० । चान्द्रायणविधानैः वा शुक्लकृष्णे च वर्त्तयेत् पक्षांतयोः वा अपि अश्नीयात् यवागूं क्वथितां सकृत् ॥

यो० । अथवा चांद्रायणविधानैः शुक्लकृष्णे वर्त्तयेत्—वा पक्षांतयोः (अमावस्या पूर्णिमयोः) क्वथितां यवागूं सकृत् अश्नीयात् (भक्षयेत्) ॥

---

१. सायंप्रातर्मनुष्याणामशनंदेवनिर्मितम् ॥

भा० । वा शुक्ल और कृष्ण पक्षमें चान्द्रायणव्रत करे अथवा पूर्णिमा और अमावस को पकी हुई लप्सी को एकवार भक्षणकरे ॥

ता० । अथवा शुक्ल और कृष्णपक्ष में चान्द्रायण की विधि से वर्त्ते अर्थात् इस[1] वचनके अनुसार शुक्ल पक्षमें एक२ ग्रास कमकरके और कृष्णपक्ष में एक२ग्रास बढ़ाकर भोजन करे—अथवा पक्षके अंतों (पूर्णिमा और अमावस) में पकीहुई यवागू (लप्सी) को एकवार भोजन करे अर्थात् सायंकाल को वा प्रातःकालको २० ॥

पुष्पमूलफलैर्वापिकेवलैर्वर्त्तयेत्सदा । कालपक्वैःस्वयंशीर्णैर्वैखानसमतेस्थितः २१ ॥

प० । पुष्पमूलफलैः वा अपि केवलैः वर्त्तयेत् सदा कालपक्वैः स्वयंशीर्णैः वैखानसमते स्थितः ॥

यो० । वैखानसमते स्थितः द्विजः केवलैः कालपक्वैः स्वयंशीर्णैः पुष्पमूलफलैः वा सदा वर्त्तयेत (जीवेत) ॥

भा० । ता० । समय पर पके और स्वयंपतित (गिरे) जो पुष्प—मूल और फल उनसेही केवल वैखानस मतमें स्थित अर्थात् वानप्रस्थ के शास्त्रोक्त धर्मोंको करताहुआ द्विज वर्त्ते अर्थात् केवल उक्त पुष्प आदिकों काही भक्षण करे २१ ॥

भूमौविपरिवर्त्तेततिष्ठेद्वाप्रपदैर्दिनम् । स्थानासनाभ्यांविहरेत्सवनेषूपयन्नपः २२ ॥

प० । भूमौ विपरिवर्त्तेत तिष्ठेत् वा प्रपदैः दिनम् स्थानासनाभ्यां विहरेत् सवनेषु उपयन् अपः ॥

यो० । वनस्थः द्विजः भूमौ विपरिवर्त्तेत वा दिनं प्रपदैः तिष्ठेत् —अथवा सवनेषु (त्रिकाले) अपः उपयन् सन् स्थानासनाभ्यां विहरेत् (तिष्ठेत्) ॥

भा० । वानप्रस्थ द्विज भूमिपर लेटै और स्थान और आसन से विहारकरे और अथवा दिनभर अपने पैरोंके अग्रभागको भूमिपर टेककर खड़ारहे—और त्रिकाल स्नान करे ॥

ता० । वानप्रस्थ द्विज केवल भूमिपर लेटे और स्थान और आसन पर बैठकर विहारकरे अर्थात् जाय और आवे परंतु यह नियम आवश्यकभोजन आदिके समयको छोड़कर समझना—अथवा दिनभर अपने पैरोंके अग्र भागसेही खड़ारहे और कुछ काल बैठारहे और कुछ काल शयन आदिको करे—और मध्य२में वृथागमन न करे—और सायंकाल मध्याह्न—और प्रातःकाल के समय स्नानको करे यद्यपि पहिले सायंकाल और प्रातःकाल कोही इस[2] वचनसे स्नान कहा है तथापि नियमकी अधिकतासे उसके संग इसका विकल्पहै अर्थात् अधिक नियमका अभिलाषी वानप्रस्थ त्रिकाल और अल्प नियमका अभिलाषी द्विकाल स्नानको करे २२ ॥

ग्रीष्मेपञ्चतपास्तुस्याद्वर्षास्वभ्रावकाशिकः । आर्द्रवासास्तुहेमन्तेक्रमशोवर्द्धयंस्तपः २३

प० । ग्रीष्मे पंचतपाः तु स्यात् वर्षासु अभ्रावकाशिकः आर्द्रवासाः तु हेमन्ते क्रमशः वर्द्धयन् तपः ॥

यो० । आत्मनः तपः क्रमशः वर्द्धयन् सन ग्रीष्मे पंचतपाः -वर्षासु अभ्रावकाशिकः -हेमन्ते आर्द्रवासाः — स्यात् ॥

१ एकैकंह्रासयेत्पिण्डं शुक्लेकृष्णेचवर्द्धयेत् ॥
२ स्नायात्सायमथतथा ॥

भा० । अपने तपको बढ़ाताहुआ वानप्रस्थ—ग्रीष्म ऋतुमें पंचाग्निमें तपकरै—और वर्षाऋतु में वर्षाके स्थानमें नग्न बैठारहे—और हेमंत (जाड़े) ऋतुमें गीले वस्त्रोंको धारण करै ॥

ता० । अपने तपकी वृद्धिचाहताहुआ वानप्रस्थ द्विज ग्रीष्म (गरमी) कालमें पंचाग्निमें तपको करै अर्थात् अपनी चारों दिशाओंमें अग्निको जलावै और ऊपरसे सूर्यकी धूपको सहै—और वर्षाऋतुमें ऐसे स्थानमें बैठे जहां अपने ऊपर वर्षाहोनीहो और आप छत्री आदिको न धारै—और हेमंत (शीतकाल) में आर्द्र (गीले) वस्त्रोंको धारणकरै—इस प्रकार तीनों ऋतुओं के तपसे वर्षको बितायाकरै २३ ॥

उपस्पृशंस्त्रिषवणंपितॄन्देवांश्चतर्पयेत् । तपश्चरंश्चोग्रतरंशोषयेद्देहमात्मनः २४ ॥

प० । उपस्पृशन् त्रिषवणं पितॄन् देवान् च तर्पयेत् तपः चरन् च उग्रतरं शोषयेत् देहं आत्मनः ॥

यो० । त्रिषवणं उपस्पृशन् सन् पितॄन् चपुनः देवान् तर्पयेत्—चपुनः उग्रतरं तपः चरन् सन् आत्मनः देहं शोषयेत् ॥

भा० । ता० । सायंकाल प्रातःकाल और मध्याह्नमें स्नानकरताहुआ वानप्रस्थ पितर और देवताओंके निमित्त तर्पणकरै और उग्रतर (अति कठिन) तपको करताहुआ पक्षके और मासके उपवाससे अपने देहको इस वचनके अनुसार सुखादे—अर्थात् क्षीणकरै २४ ॥

अग्नीनात्मनिवैतानान्समारोप्ययथाविधि।अनग्निरनिकेतःस्यान्मुनिर्मूलफलाशनः २५

प० । अग्नीन् आत्मनि वैतानान् समारोप्य यथाविधि अनग्निः अनिकेतः स्यात् मुनिः मूलफलाशनः ॥

यो० । वैतानान् अग्नीन् यथाविधि आत्मनि समारोप्य अनग्निः—अनिकेतः—मुनिः—मूलफलाशनः—स्यात् ॥

भा० । वैतानहै नाम जिनका ऐसी अग्नियोंको विधिपूर्वक अपने देह में रखकर अग्नि और घरको त्यागदे और मौन रहै और मूल फलोंका भक्षण करै ॥

ता० । जिन अग्नियोंमें गृहस्थ आश्रमके अनुसार होमकरताथा उन अग्नियोंको वानप्रस्थ विधिसे (भस्मका पीना) अपने देहमें स्थापन करके लौकिक अग्नि और घर इनसे शून्य रहै अर्थात् अग्निहोत्र न करै और न बसनेके लिये घर बनावै और मौनव्रतको धारै और मूल और फलोंका भक्षण करै परन्तु इस वशिष्ठ वचनके अनुसार छःमहीने के अनन्तर अग्नि और गृहका त्यागकरै २५ ॥

अप्रयत्नःसुखार्थेषुब्रह्मचारीधराशयः । शरणेष्वममश्चैववृक्षमूलनिकेतनः २६ ॥

प० । अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः शरणेषु अममः च एव वृक्षमूलनिकेतनः ॥

यो० । सुखार्थेषु अप्रयत्नः ब्रह्मचारी—धराशयः चपुनः शरणेषु अममः—वृक्षमूलनिकेतनः—स्यात् ॥

भा० । ता० । सुखदेनेवाले जो—स्वादु फल भक्षण शीत आतपका निवारण आदि—उनके

१ पक्षोपवासिनःकेचित् केचिन्मासोपवासिनः ॥
२ ऊर्ध्वंषण्मासेभ्योप्युपरिअनग्निरनिकेतनः ॥

लिये यत्न न करै और ब्रह्मचारी (स्त्रीका परित्यागी) रहै और भूमिपर सोवै और निवासके स्थानोंमें ममताको त्यागदे—और वृक्षकी जड़में अपना स्थान रक्खै २६ ॥

तापसेष्वेवविप्रेषुयात्रिकंभैक्षमाहरेत् । गृहमेधिषुचान्येषुद्विजेषुवनवासिषु २७ ॥

प० । तापसेषुँ एवँ विप्रेषुँ यात्रिकं भैक्षं आहरेत्ँ गृहमेधिषुँ चँ अन्येषुँ द्विजेषुँ वनवासिषुँ ॥

यो० । तापसेषु एव द्विजेषु चपुनः वनवासिषु गृहमेधिषु अन्येषु द्विजेषु यात्रिकं भैक्षं आहरेत् ॥

भा० । ता० । फल मूल न मिलें तो तपस्वी (वानप्रस्थ) ब्राह्मणों से अथवा इतर वनवासी गृहस्थी द्विजों के यहांसे अपने प्राणों की रक्षाके लियेही भिक्षाकी याचना करै २७ ॥

ग्रामादाहृत्यवाश्नीयादष्टौग्रासान्वनेवसन् । प्रतिगृह्यपुटेनैवपाणिनाशकलेनवा २८ ॥

प० । ग्रामात् आहृत्य वाँ अश्नीयात्ँ अष्टौ ग्रासान् वने वसन् प्रतिगृह्य पुटेन एवँ पाणिना शकलेन वाँ ॥

यो० । वने वसन (सन) ग्रामात् अष्टौ ग्रासान् आहृत्य — पुटेन एव अथवा पाणिना शकलेन प्रतिगृह्य — अश्नीयात् (भक्षयेत्) ॥

भा० । ता० । वनमें वसता हुआ (वानप्रस्थ) द्विज—वनवासी द्विजों के न मिलने पर ग्राम में से आठग्रास (कवल) लाकर पत्तों के दोने अथवा शराव के टुकड़े में वा हाथ में रखकर भक्षण करले २८ ॥

एताश्चान्याश्चसेवेतदीक्षाविप्रोवनेवसन् । विविधाश्चौपनिषदीरात्मसंसिद्धयेश्रुतीः २९॥

प० । एताः चँ अन्याः चँ सेवेतँ दीक्षाः विप्रः वँने वसन् विविधाः चँ औपनिषदीः आत्मसंसिद्धये श्रुतीः ॥

यो० । विप्रः वने वसन् (सन) एताः (पूर्वोक्ताः) चपुनः अन्याः दीक्षाः चपुनः आत्मसंसिद्धये विविधाः औपनिषदीः श्रुतीः — सेवेत ॥

भा० । ता० । वनमें वसता हुआ ब्राह्मण इन पूर्वोक्त नियमों को चपुनः अन्य जो वानप्रस्थ शास्त्र में कहे नियम उनको सेवै (करै) और आत्मज्ञानकी सिद्धि के लिये नानाप्रकार की और उपनिषदोंमें कही श्रुतियों का अभ्यास करै २६ ॥

ऋषिभिर्ब्राह्मणैश्चैवगृहस्थैरेवसेविताः । विद्यातपोविवृद्ध्यर्थंशरीरस्यचशुद्धये ३० ॥

प० । ऋषिभिः ब्राह्मणैः चँ एवँ गृहस्थैः एवँ सेविताः विद्यातपोविवृद्ध्यर्थं शरीरस्य चँ शुद्धये ॥

यो० । यस्मात् ऋषिभिः चपुनः ब्राह्मणैः चपुनः गृहस्थैः विद्यातपोविवृद्ध्यर्थं चपुनः शरीरस्य शुद्धये सेविताः एताः श्रुतयः सेविताः अतः वानप्रस्थः एताः सेवेत — (अभ्यसेत्) ॥

भा० । ता० । जिससे ऋषि और ब्राह्मण गृहस्थियों ने विद्या और तपकी वृद्धिके लिये और शरीर की शुद्धि के लिये इन श्रुतियोंका सेवन कराहै इससे वानप्रस्थ द्विज भी इन पूर्वोक्त दीक्षा और श्रुतियों का अभ्यास करै ३० ॥

अपराजितांवास्थायव्रजेद्दिशमजिह्मगः।आनिपाताच्छरीरस्ययुक्तोवार्यनिलाशनः ३१॥

प० । अपराजितां वा आस्थाय व्रजेत् दिशं अजिह्मगः आनिपातात् शरीरस्य युक्तः वार्यनिलाशनः ॥

यो० । युक्तः वार्यनिलाशनः अजिह्मगः सन् शरीरस्य आनिपातात् अपराजितां दिशं वा आस्थाय व्रजेत्—(गच्छेत्) ॥

भा० । योगमार्ग में स्थित और जल और पवनको भक्षण करता—और सीधीहै गति जिसकी ऐसा वानप्रस्थ द्विज ऐशान दिशा में चलाजाय अर्थात् देह को त्यागदे ॥

ता० । यदि देह में ऐसी व्याधि की उत्पत्ति होजाय तो योगमार्ग में स्थित होकर जल और पवन इनको भक्षण करता हुआ अकुटिल (सीधी) है गमन जिसका ऐसा वानप्रस्थ ईशान दिशाका आश्रय लेकर शरीरके मरण पर्य्यन्त गमन करै अर्थात् ऐशानीदिशा में चलाजाय—और वानप्रस्थ का यह शास्त्रोक्त मरण है इससे इसे श्रुति के संग विरोध नहींहै कि जिसको अपनी अवस्था की इच्छाहो वह ऐशानी दिशाको गमन न करै क्योंकि इस श्रुति स्वकामिशब्द के पढ़ने से वृथामरणे का निषेध है और शास्त्रोक्त मरण का निषेध है [1] ३१ ॥

आसांमहर्षिचर्याणांत्यक्त्वान्यतमयातनुम् । वीतशोकभयोविप्रोब्रह्मलोकेमहीयते ३२॥

प० । आसां महर्षिचर्याणां त्यक्त्वा अन्यतमया तनुं वीतशोकभयः विप्रः ब्रह्मलोके महीयते ॥

यो० । आसां महर्षिचर्याणां मध्ये अन्यतमया (चर्यया) तनुं त्यक्त्वा वीतशोकभयः विप्रः ब्रह्मलोके महीयते (पूजांलभते) ॥

भा० । इन पूर्वोक्त कर्मोंमें किसी न किसी कर्म से अपने देहको त्यागकर और शोक और भयसे निवृत्तहोकर ब्रह्मलोक में पूजाको प्राप्तहोता है ॥

ता० । इन पूर्वोक्त वानप्रस्थों के कर्मों मेंसे किसी एक कर्म के अनुष्ठान से अपने देह को त्यागकर और दुःख के भयसे निवृत्त हुआ वानप्रस्थ ब्रह्मलोक में पूजा को प्राप्त होताहै अर्थात् मोक्षको प्राप्तहोता है—कदाचित् कोई यह कहे कि इसे श्रुति में तो यह लिखाहै कि ज्ञानकेविना मुक्ति नहीं होती और वानप्रस्थको केवल कर्मसे ही कैसे मोक्ष प्राप्तहोता है—सो ठीक नहीं क्योंकि यह कह आयेहैं कि आत्मज्ञान की सिद्धिके लिये अनेक प्रकारकी उपनिषदों की श्रुतियोंका वानप्रस्थ अभ्यास करै तिससे इसको भी कर्म से अन्तःकरण शुद्धि होने पर आत्मज्ञान होसक्ताहै [2] ३२ ॥

वनेषुचविहृत्यैवंतृतीयंभागमायुषः । चतुर्थमायुषोभागंत्यक्त्वासंगान्परिव्रजेत् ३३ ॥

प० । वनेषु च विहृत्य एवं तृतीयं भागं आयुषः चतुर्थं आयुषः भागं त्यक्त्वा संगान् परिव्रजेत् ॥

यो० । आयुषः तृतीयं भागं एवं वनेषु विहृत्य—संगान् त्यक्त्वा आयुषः चतुर्थं भागं—परिव्रजेत् (संन्यसेत्) ॥

भा० । इस प्रकार अपनी अवस्थाके तीसरे भागमें वनोंमें विहारकरके अवस्थाके चौथे भागमें विषयोंके संगोंको त्यागकर संन्यास का ग्रहण करै ॥

---

१ नपुनरायुषः स्वकामी न मेयात् ॥

२ ऋतेज्ञानान्न मुक्तिः ॥

ता० । अपनी अवस्थाके तीसरे भागमें इस प्रकार वनोंमें विचरकर—यद्यपि अवस्थाके प्रमाण का कोई निश्चयनहींहै और इसी से उसको कोई जानभीनहींसक्ता—तथापि तीसरेभाग से वह समय लेना जिसमें रागों (विषय) से निवृत्तिहोजाय वह वानप्रस्थका समयलेना अतएव शंख लिखित ने यहकहा है कि[1] वनवास के पीछे शांत और वृद्धको संन्यास ग्रहणकरना—अर्थात् विधिपूर्वक दुष्करतपको करनेसे विषयोंसे शांतिपर्य्यन्त वानप्रस्थके कर्मोंको करके आयुःके चौथे भाग में अर्थात् अवस्था के शेषसमय में विषयोंके संगोंको सर्वथा त्यागकर संन्यास आश्रमको ग्रहणकरै ३३ ॥

आश्रमादाश्रमंगत्वाहुतहोमोजितेन्द्रियः । भिक्षाबलिपरिश्रान्तःप्रव्रजन्प्रेत्यवर्द्धते३४

प० । आश्रमात् आश्रमं गत्वा हुतहोमः जितेंद्रियः भिक्षाबलिपरिश्रांतः प्रव्रजन् प्रेत्य वर्द्धते॥

यो० । हुतहोमः—जितेंद्रियः भिक्षाबलिपरिश्रांतः द्विजः आश्रमात् आश्रमंगत्वा प्रव्रजन् मन् प्रेत्य वर्द्धते ॥

भा० । ता० । अग्निहोत्र को करके—और इंद्रियोंको जीतकर—और भिक्षा और बलिवैश्वदेवकी सेवासे श्रमकोकरके—और एक आश्रममें से दूसरे आश्रम में जाकर अर्थात् ब्रह्मचर्य—गृहस्थ और वानप्रस्थ आश्रमों के धर्मोंको क्रमसे करके संन्यास आश्रम में टिकताहुआ द्विज परलोक में जाकर वृद्धिको प्राप्तहोताहै अर्थात् ब्रह्म में लीनहोताहै ३४ ॥

ऋणानित्रीण्यपाकृत्यमनोमोक्षेनिवेशयेत् । अनपाकृत्यमोक्षंतुसेवमानोव्रजत्यधः ३५॥

प० । ऋणानि त्रीणि अपाकृत्य मनः मोक्षे निवेशयेत् अनपाकृत्य मोक्षं तु सेवमानः व्रजति अधः ॥

यो० । त्रीणि ऋणानि अपाकृत्य (दूरीकृत्य) मोक्षे मनः निवेशयेत—त्रीणि ऋणानि अनपाकृत्य मोक्षं सेवमानस्तु अधः व्रजति (नरकं गच्छति) ॥

भा० । ता० । तीनों ऋणों (देव पितृ ऋषि) को दूरकरकेही मोक्षमें मनको लगावे—और तीनऋणों के विना दूरकिये जो मोक्षको सेवताहै वह नरकमें जाता है ३५ ॥

अधीत्यविधिवद्वेदान्पुत्रांश्चोत्पाद्यधर्मतः । इष्ट्वाचशक्तितोयज्ञैर्मनोमोक्षेनिवेशयेत्३६॥

प० । अधीत्य विधिवत् वेदान् पुत्रान् च उत्पाद्य धर्मतः इष्ट्वा च शक्तितः यज्ञैः मनः मोक्षे निवेशयेत् ॥

यो० । विधिवत् वेदान अधीत्य—चपुनः धर्मतः पुत्रान उत्पाद्य—चपुनः शक्तितः यज्ञैः इष्ट्वा मोक्षे मनः निवेशयेत् ॥

भा० । विधिसे वेदोंको पढ़—और धर्मसे पुत्रोंको पैदाकर—और शक्तिसे यज्ञोंको करके मोक्षमार्ग में मनको लगावे ॥

ता० । उत्पन्नहोताही ब्राह्मण तीनऋणोंवाला होता है क्योंकि इस[2] श्रुति में यह लिखा है कि यज्ञसे देवता—और प्रजासे पितरों—और वेदके पढ़ने से ऋषियों का ऋण दूरकरै—इससे

---

१ वनवासादूर्ध्वं श्रान्तस्य परिगतवयसः पारिव्राज्यम् ॥

२ जायमानो ब्राह्मणस्त्रिभिः ऋणैः ऋणवान् जायते यज्ञेन देवेभ्यः प्रजया पितृभ्यः स्वाध्यायेन ऋषिभ्यः ॥

शास्त्रोक्तरीति से वेदोंको पढ़कर—और धर्मसे (पर्वोंमें स्त्रीकेसंगका त्याग) पुत्रोंको पैदाकरके और शक्तिभर अश्वमेधआदि यज्ञोंकोकरके—मोक्षमें मनको लगावे अर्थात् मोक्षके अत्यन्त उपयोगी संन्यास आश्रमको ग्रहणकरै ३६ ॥

अनधीत्यद्विजोवेदाननुत्पाद्यतथासुतान्।अनिष्ट्वाचैवयज्ञैश्चमोक्षमिच्छन्व्रजत्यधः३७॥

प० । अनधीत्य द्विजः वेदान् अनुत्पाद्य तथा सुतान् अनिष्ट्वा च एव यज्ञैः च मोक्षं इच्छन् व्रजति अधः ॥

यो० । द्विजः वेदान् अनधीत्य — तथा सुतान् अनुत्पाद्य — चपुनः यज्ञैः अनिष्ट्वा मोक्षं इच्छन् सन् अधः व्रजति ॥

भा० । ता० । वेदोंकोविना पढ़े और पुत्रोंको पैदाकिये विना और यज्ञोंके कियेविना मोक्षकी इच्छाकरताहुआ द्विज नरकको प्राप्तहोताहै ३७ ॥

प्राजापत्यांनिरूप्येष्टिंसर्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन्समारोप्यब्राह्मणःप्रव्रजेद्गृहात् ३८ ॥

प० । प्राजापत्यां निरूप्य इष्टिं सर्ववेदसदक्षिणाम् आत्मनि अग्नीन् समारोप्य ब्राह्मणः प्रव्रजेत् गृहात् ॥

यो० । सर्ववेदसदक्षिणां प्राजापत्यां इष्टिं निरूप्य — आत्मनि अग्नीन् समारोप्य — ब्राह्मणः गृहात् प्रव्रजेत् ॥

भा० । प्राजापत्य यज्ञकोकरके और आचार्यको सर्वस्व (सबद्रव्यआदि) दक्षिणादेकर और अपने आत्मामेंही अग्नियों को स्थापनकरके ब्राह्मण अपने घर से चलाजाय अर्थात् संन्यासी होजाय ॥

ता० । प्रजापतिहै देवता जिसका और सर्वस्वहै दक्षिणा जिसमें और यजुर्वेदके उपाख्यान में कहीहुई यज्ञ (जो संन्यासलेनेके समय कीजातीहै) और यजुर्वेदकीहीविधिसे अपनेआत्मा में अग्नियोंको स्थापनकरके घरसे संन्यास के निमित्त चलाजाय अर्थात् वानप्रस्थ के धर्मों को करके चौथे आश्रम में गमनकरै क्योंकि घर वनमें भी होताहै—इससे मनुने चारों आश्रमों का समुच्चय भी दिखाया और इसे जाबालश्रुति में कहेहुये चारोंआश्रमों के विकल्प भी सूचित करादिये—कि ब्रह्मचर्य को समाप्तकरके गृहस्थी और गृहस्थहोकर वानप्रस्थ और वानप्रस्थ को समाप्त करके संन्यासले—इतरथा ब्रह्मचर्यसेही संन्यासले अथवा गृहस्थसे वा वानप्रस्थ से संन्यासी होजाय ३८ ॥

योदत्वासर्वभूतेभ्यःप्रव्रजत्यभयंगृहात् । तस्यतेजोमयालोकाभवन्तिब्रह्मवादिनः ३९॥

प० । यः दत्वा सर्वभूतेभ्यः प्रव्रजति अभयं गृहात् तस्य तेजोमयाः लोकाः भवन्ति ब्रह्मवादिनः ॥

यो० । यः ब्राह्मणः सर्वभूतेभ्यः अभयं दत्वा गृहात् प्रव्रजेत् — ब्रह्मवादिनः तस्य तेजोमया (लोका) भवंति ॥

भा० । ता० । जो ब्राह्मण सम्पूर्ण भूतों (स्थावर जंगम) को अभयदानदेकर घरसे चला जाताहै अर्थात् संन्यासी होताहै उस ब्रह्मवादी (ब्रह्मज्ञान के जनक उपनिषदों में स्थित) को

---

१ ब्रह्मचर्यं समाप्य गृहीभवेद्गृहीभूत्वा वनीभवेत् वनीभूत्वा प्रव्रजेत् इतरथा ब्रह्मचर्यादेवप्रव्रजेत् गृहाद्वा वनाद्वा ॥

तेजोमय लोकोंकी प्राप्तिहोती है अर्थात् सूर्य्यआदि के प्रकाशरहित ब्रह्मलोक आदिको वह प्राप्त होताहै ३९ ॥

यस्मादण्वपिभूतानांद्विजान्नोत्पद्यतेभयम् । तस्यदेहाद्विमुक्तस्यभयंनास्तिकुतश्चन ४० ॥

प० । यस्मात् अणु अपि भूतानां द्विजात् न उत्पद्यते भयं तस्य देहात् विमुक्तस्य भयं न अस्ति कुतश्चन ॥

यो० । यस्मात् द्विजात् भूतानां अणु अपि भयं न उत्पद्यते — देहात् विमुक्तस्य तस्य कुतश्चन भयं नास्ति ॥

भा० । ता० । जिस द्विजसे प्राणियोंको सूक्ष्मभी भय नहीं होताहै अर्थात् जो किसीको दुःख नहींदेता है देहसे विमुक्तहुये (मरे) उसको किसीसे भी भय नहीं होताहै ४० ॥

आगारादभिनिष्क्रान्तःपवित्रोपचितोमुनिः । समुपोढेषुकामेषुनिरपेक्षःपरिव्रजेत् ४१ ॥

प० । आगारात् अभिनिष्क्रांतः पवित्रोपचितः मुनिः समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ॥

यो० । आगारात् अभिनिष्क्रांतः -पवित्रोपचितः मुनिः द्विजः समुपोढेषु कामेषु निरपेक्षः सन् परिव्रजेत् (संन्यासीभवेत्)

भा० । ता० । घरसे निकसकर और पवित्र दण्ड कमण्डलु आदिसे युक्त—और मौनीहोकर और अनायास से मिलेहुये पदार्थों में इच्छाको त्यागकर द्विज संन्यासको ग्रहणकरे ४१ ॥

एकएवचरेन्नित्यंसिद्ध्यर्थमसहायवान् । सिद्धिमेकस्यसंपश्यन्नजहातिनहीयते ४२ ॥

प० । एकः एव चरेत् नित्यं सिद्ध्यर्थं असहायवान् सिद्धिं एकस्य संपश्यन् न जहाति न हीयते ॥

यो० । एकस्य सिद्धिं संपश्यन् सन् सिद्ध्यर्थं असहायवान् एकएव यः नित्यं चरेत् — स न जहाति न हीयते ॥

भा० । ता० । सबके संग त्यागनेवाले एकाकीही मुक्तिहोतीहै यह जानताहुआ द्विज किसीको सहाय न रखकर एक (अकेला) ही जो विचरताहै और पुत्रआदि की ममताको छोड़ता है किसीके भी त्यागकरने में उसे दुःखनहीं होता और न त्यागनेपर इससे कोई दुःखी होगा अर्थात् सदैव सुख दुःखमें ममताको त्यागकर मुक्तिको प्राप्तहोताहै ४२ ॥

अनग्निरनिकेतःस्याद्ग्राममन्नार्थमाश्रयेत् । उपेक्षकोऽशंकुसुकोमुनिर्भावसमाहितः ४३ ॥

प० । अनग्निः अनिकेतः स्यात् ग्रामं अन्नार्थं आश्रयेत् उपेक्षकः अशंकुसुकः मुनिः भाव-समाहितः ॥

यो० । अनग्निः अनिकेतः उपेक्षकः अशंकुसुकः — मुनिः भावसमाहितः स्यात् — अन्नार्थं ग्रामं आश्रयेत् ॥

भा० । ता० । लौकिक अग्नि के संयोग से रहित और व्याधिआदि के होनेपर भी उसकी चिकित्सा से हीन और घरकात्यागी और स्थिर बुद्धि—अथवा संचयरहित—ब्रह्मका मननकर्त्ता और भावसे ब्रह्ममें निष्ठ—संन्यासीरहै और दिनरात वनमें वसताहुआ भी भिक्षाके लिये ग्राम में प्रवेश करै ४३ ॥

कपालंवृक्षमूलानिकुचेलमसहायता । समताचैवसर्वस्मिन्नेतन्मुक्तस्यलक्षणम् ४४ ॥

प० । कपालं वृक्षमूलानि कुचेलं असहायता समता च एव सर्वस्मिन् एतत् मुक्तस्य लक्षणम् ॥

यो० । कपालं — वृक्षमूलानि — कुचेलं — असहायता — चपुनः सर्वस्मिन् समता — मुक्तस्य एतत् लक्षणं-भवति ॥

भा० । ता० । कपाल (मिट्टीका कर्परआदि भिक्षाकापात्र)–वसने के लिये वृक्षकामूल–फटा और मोटा कौपीन कन्थाआदि वस्त्र–सहायकात्याग–और ब्रह्मबुद्धिसे सर्वत्र समता (शत्रु मित्र के अभाव) ये मुक्त के चिह्न हैं अर्थात् मुक्ति के साधन हैं ४४ ॥

नाभिनन्देतमरणंनाभिनन्देतजीवितम् । कालमेवप्रतीक्षेतनिर्देशंभृतकोयथा ४५ ॥

प० । नँ अभिनंदेतँ मरणं नँ अभिनंदेतँ जीवितम् कालं एवँ प्रतीक्षेतँ निर्देशं भृतकः यथा ॥

यो० । मरणं न अभिनंदेत–जीवनं न अभिनंदेत (नकामयेत्) किन्तु यथानिर्देशं (भृतिं) भृतकः तथा स्वकर्माधीनं कालं एव प्रतीक्षेत ॥

भा० । ता० । मरण और जीवन दोनोंकी कामना न करे किंतु जिसप्रकार भृत्य (नोकर) भृति (नोकरी) की प्रतीक्षाकरता है इसप्रकार अपने कर्मों के आधीन मरणकीही प्रतीक्षाकरे (बाटदेखे) ४५ ॥

दृष्टिपूतंन्यसेत्पादंवस्त्रपूतंजलंपिबेत् । सत्यपूतांवदेद्वाचंमनःपूतंसमाचरेत् ४६ ॥

प० । दृष्टिपूतं न्यसेतँ पादं वस्त्रपूतं जलं पिबेतँ सत्यपूतां वदेतँ वाचं मनःपूतं समाचरेतँ ॥

यो० । दृष्टिपूतं पादं न्यसेत् — वस्त्रपूतं जलं पिबेत् — सत्यपूतांवाचं वदेत — मनःपूतं समाचरेत् ॥

भा० । ता० । केश और अस्थि आदिके बचावकेलिये देखकर भूमिपरपैररक्खे–और छोटे २ जीवोंके निवारणार्थ वस्त्र से पूत (छना) जलको पीवे -और सत्यसे पवित्र वाणीको कहे–और पवित्र मनसा सदा आचरणकरे निषिद्ध के संकल्प शून्यमनसे सदापवित्र रहे ४६ ॥

अतिवादांस्तितिक्षेतनावमन्येतकंचन । नचेमंदेहमाश्रित्यवैरंकुर्वीतकेनचित् ४७ ॥

प० । अतिवादान् तितिक्षेतँ नँ अवमन्येतँ कंचनँ नँ चँ इमं देहं आश्रित्य वैरं कुर्वीतँ केनचित् ॥

यो० । अतिवादान (परोक्तकटुवाक्यान) सहेत — कंचन पुरुषं न अवमन्येत — चपुनः इमंदेहं आश्रित्य केनचित वैरं न कुर्वीत ॥

भा० । ता० । अन्य के कहे अतिवादों (कटुवाक्य) को सहे–और किसी मनुष्यका भी तिरस्कार न करे–अनेक व्याधि से संयुक्त इसदेहके आश्रय से किसीकेभी संग वैर न करे ४७ ॥

क्रुध्यन्तंनप्रतिक्रुध्येदाक्रुष्टःकुशलंवदेत् । सप्तद्वारावकीर्णांचनवाचमनृतांवदेत् ४८ ॥

प० । क्रुध्यंतं नँ प्रतिक्रुध्येतँ आक्रुष्टः कुशलं वदेतँ सप्तद्वारावकीर्णां चँ नँ वाचं अनृतां वदेतँ ॥

यो० । क्रुध्यन्तं प्रति न क्रुध्येत (संजातकोधाय कस्मैचित्प्रतिकोपं न कुर्यात्) आक्रुष्टः (निन्दितश्चान्येन) कुशलं वदेत (नतुनिन्देत्) चपुनः सप्तद्वारावकीर्णां अनृतां वाचं न वदेत (किन्तुब्रह्ममात्रविषयां वदेत्) ॥

भा० । क्रुद्धहुये मनुष्य पर क्रोध न करै–और अपनी निन्दा करने पर भी भद्र (अच्छा) वचन कहे और सातद्वारोंके विषयोंके लिये मिथ्यावाणीको न कहे–अर्थात् ब्रह्मविषयक वाणी कोही कहे ॥

ता० । क्रोधकरतेहुये मनुष्यपर क्रोध न करै–और यदि अपने ऊपर कोईक्रोधकरे तो कुशल

(अच्छे) वचनकहै—अर्थात् निंदा न करै—और सातद्वारोंसे अवकीर्ण (निक्षिप्त) अर्थात् श्रोत्र त्वचा—नेत्र—जिह्वा—नासिका—मन—बुद्धि—इनसातोंद्वारोंको वशमेंकरके अनृत (मिथ्या) वाणी को न कहै सिद्धांत यह है कि इनसातद्वारों के जो शब्दआदि सातविषय हैं उनकी वार्ताको न कहै क्योंकि वेही सब विषय मिथ्या हैं—अर्थात् ब्रह्मविषयकी वाणी को कहै—इसमें कोई यह शंका करतेहैं कि मनसेही ब्रह्मकी उपासना होती है और ब्रह्मविषय आदि सब वाणियों का उच्चारण भी मनकाही व्यापारहै तो यह कैसे होसक्ताहै कि ब्रह्मविषय वाणी कोही कहै अन्य विषय वाणीको न कहै—इसका यह समाधान है कि अनृत इस विशेषण से यह सूचित किया कि असत्य (विनाशी) है विषय जिसका ऐसी वाणीको न कहै और अविनाशि ब्रह्मविषयक (ओंकारउपनिषत् आदि) सत्यरूप वाणी का तो उच्चारण करै—गोविन्दराज तो यह कहतेहैं कि—धर्म अर्थ—अर्थ काम २—धर्म अर्थ काम ३ ये सात वाणीका विषय होनेसे वाणीके द्वारहैं उनमें विक्षिप्त (विरुद्ध) वाणी को न कहै अर्थात् इनसातों में झूठ न बोले और कोई यह कहतेहैं कि सात भुवन वाणीका विषय होने से वाणीके द्वार हैं और विनाशी हैं उनके विषय असत्य वाणी न कहै अर्थात् सात भुवनोंके भोगके निमित्त मिथ्या न बोले किन्तु ब्रह्मविषयक वाणी कोही कहै ४८ ॥

अध्यात्मरतिरासीनोनिरपेक्षोनिरामिषः । आत्मनैवसहायेनसुखार्थीविचरेदिह ४९ ॥

प० । अध्यात्मरतिः आसीनः निरपेक्षः निरामिषः आत्मना एव सहायेन सुखार्थी विचरेत् इह ॥

यो० । सुखार्थी संन्यासी अध्यात्मरतिः – आसीनः – निरपेक्षः निरामिषः – सन आत्मना एव सहायेन इह विचरेत् ॥

भा० । मोक्षके सुखको चाहता हुआ संन्यासी आत्मा (ब्रह्म) मेंही प्रीति को रखकर—और योगासन से बैठाहुआ और अपेक्षा से रहित—और विषयों का त्यागी होकर—इस संसार में विचरै ॥

ता० । मोक्षरूप सुखका अभिलाषी संन्यासी—आत्माकेही विषे है रति जिसकी अर्थात् सदैव ब्रह्मके ध्यानमें तत्पर—और स्वस्तिक आदि योगीके आसन लगाये—और दण्ड कमण्डलु आदिकोंमें भी विशेषकर अपेक्षासे रहित—और विषयों की अभिलाषा से शून्य—होकर केवल अपने देहकीही सहायतासे—इस जगत्में विचरै—अर्थात् सबके संग और ममताको त्यागदे ४९ ॥

नचोत्पातनिमित्ताभ्यांननक्षत्राङ्गविद्यया।नानुशासनवादाभ्यांभिक्षांलिप्सेतकर्हिचित् ५०

प० । न च उत्पातनिमित्ताभ्यां न नक्षत्रांगविद्यया न अनुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥

यो० । चपुनः उत्पातनिमित्ताभ्यां – नक्षत्रांगविद्यया – अनुशासनवादाभ्यां कर्हिचित् भिक्षां न लिप्सेत (न इच्छेत्) ॥

भा० । ता० । भूकम्प आदि उत्पात—और नेत्रस्पंद (फरकना) आदि निमित्तों के फलों को कहके—और ज्योतिष शास्त्रकी विद्यासे—ऐसा नीतिमार्ग है ऐसे रहना चाहिये इस प्रकार

की शिक्षा और वाद विवाद से—भिक्षाके लेने की इच्छा न करै अर्थात् विना याचना किये जो मिलै उसी से निर्वाह करै ५० ॥

नतापसैर्ब्राह्मणैर्वावयोभिरपिवाश्वभिः । आकीर्णंभिक्षुकैर्वान्यैरागारमुपसंव्रजेत् ५१ ॥

प० । न तापसैः ब्राह्मणैः वा वयोभिः अपि वा श्वभिः आकीर्णं भिक्षुकैः वा अन्यैः आगारं उपसंव्रजेत् ॥

यो० । तापसैः ब्राह्मणैः वा वयोभिः (पक्षिभिः) वा श्वभिः—वा अन्यैः भिक्षुकैः आकीर्णं आगारं (गृहं) न उपसंव्रजेत् (प्रविशत) ॥

भा० । ता० । अन्य तपस्वी वानप्रस्थ—अथवा भक्षण करनेवाले पक्षी—वा कुत्ते—अथवा इतर भिक्षुक—इनमें व्याप्त (भरा) घरमें प्रवेश न करै अर्थात् ऐसेघरमें प्रवेशकरै जिसमें इतर अन्नका अभिलाषी न हो ५१ ॥

कॢप्तकेशनखश्मश्रुःपात्रीदण्डीकुसुम्भवान् । विचरेन्नियतोनित्यंसर्वभूतान्यपीडयन् ५२

प० । कॢप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् विचरेत् नियतः नित्यं सर्वभूतानि अपीडयन् ॥

यो० । कॢप्तकेशनखश्मश्रुः पात्री—दण्डी—कुसुम्भवान—नियतःसन् संन्यासी सर्वभूतानि अपीडयन् सन् नित्यं विचरेत् (परिभ्रमेत्) ॥

भा० । ता० । कटे हैं केश नख और श्मश्रु जिसकी—भिक्षापात्रसहित और दण्ड और कमण्डलु से संयुक्त और सम्पूर्ण भूतोंको पीडित न करके और इंद्रियोंको वशमें रखकर संन्यासी सदैव विचरै ५२ ॥

अतैजसानिपात्राणितस्यस्युर्निर्व्रणानिच । तेषामद्भिःस्मृतंशौचंचमसानामिवाध्वरे ५३

प० । अतैजसानि पात्राणि तस्य स्युः निर्व्रणानि च तेषां अद्भिः स्मृतं शौचं चमसानां इव अध्वरे ॥

यो० । तस्य (संन्यासिनः) अतैजसानि निर्व्रणानि पात्राणि स्युः—तेषां (पात्राणां) शौचं—चमसानां अध्वरे इव अद्भिः (जलैः) स्मृतम्—(कथितम्) मनुनेति शेषः ॥

भा० । संन्यासी के पात्र—सोने आदि धातुओंके नहीं होते और छिद्रसे रहित होते हैं और उनकी शुद्धि केवल जलसे इसप्रकार होतीहै जैसे चमसाओं की यज्ञमें ॥

ता० । उस संन्यासीके पात्र सुवर्ण आदि धातुओं से भिन्न और छिद्ररहित—होतेहैं क्योंकि यमराजने इस वचनसे यह कहाहै कि सोने चांदी तांबे लोहे के पात्रों में भिक्षाग्रहण करनेका धर्म संन्यासी का नहींहै यदि ग्रहण कर भी ले तो नरक में जाता है—और उनसंन्यासीके पात्रों की इस प्रकार जलसे शुद्धि होतीहै जैसे यज्ञमें चमसों (यज्ञके पात्र) विशेष की ५३ ॥

अलाबुंदारुपात्रंचमृन्मयंवैदलंतथा । एतानियतिपात्राणिमनुःस्वायंभुवोऽब्रवीत् ५४॥

प० । अलाबुं दारुपात्रं च मृन्मयं वैदलं तथा एतानि यतिपात्राणि मनुः स्वायंभुवः अब्रवीत् ॥

---

१ सुवर्णरूप्यपात्रेषु ताम्रकांस्यायसेषुच गृह्णन्भिक्षांनधर्मोस्ति गृहीत्वानरकंव्रजेत् ॥

यो० । अलाबुं — चपुनः दारुपात्रं — मृन्मयं — तथा वैदलं (वंशनिर्मितं) — एतानि यतिपात्राणि स्वायम्भुवः मनुः अब्रवीत् (उक्तवान्) ॥

भा० । ता० । अलाबु (तुंबा)—काठकापात्र—मिट्टीकापात्र—और वैदल(बांसका पात्र)इतने पात्र स्वायम्भुवमनुने संन्यासीके लिये कहेहैं—और गोविन्दराजने तो वैदलसे वृक्षकी त्वचा का पात्र लियाहै ५४ ॥

एककालंचरेद्भैक्षंनप्रसज्जेतविस्तरे । भैक्षेप्रसक्तोहियतिर्विषयेष्वपिसज्जति ५५ ॥

प० । एककालं चरेत् भैक्षं न प्रसज्जेत् विस्तरे भैक्षे प्रसक्तः हि यतिः विषयेषु अपि सज्जति ॥

यो० । संन्यासी एककालं भैक्षं चरेत् — विस्तरे न प्रसज्जेत् — हि (यतः) भैक्षे प्रसक्तः यतिः विषयेषु अपि सज्जति (आसक्तो भवति) ॥

भा० । ता० । संन्यासी दिनमें एक समय भिक्षामांगे—और विस्तारमें आसक्ति न करै अर्थात् मनको न लगावे क्योंकि भिक्षाकी अधिकतामें आसक्तहुआ संन्यासी विषयों में भी आसक्त होजाताहै ५५ ॥

विधूमेसन्नमुसलेव्यङ्गारेभुक्तवज्जने । वृत्तेशरावसंपानेभिक्षांनित्यंयतिश्चरेत् ५६ ॥

प० । विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने वृत्ते शरावसंपाते भिक्षां नित्यं यतिः चरेत् ॥

यो० । विधूमे — सन्नमुसले — व्यंगारे — भुक्तवज्जने — शरावसंपाते वृत्ते — सति — यतिः भिक्षां चरेत् (याचेत)॥

भा० । धूमा—और मुसल का शब्द—भोजनकी अग्नि—गृहस्थके मनुष्योंका भोजन—और भोलवोंका फेंकना—ये सब जब होचुकें उस समय संन्यासी भिक्षाकरै अर्थात् अपने भोजनकी इच्छासे किसीके भोजनमें बाधा न दे ॥

ता० । जिस समय पाक का धूमा न रहै और मुसल का शब्द भी निवृत्तहोजाय अर्थात् कोई चावलआदिको न कूटताहो—और भोजनकी अग्नि भी शांतहोगईहो—और गृहस्थकेसब मनुष्य भोजनकरचुके हों और शरावों (भोलवा) का संपात (फेंकना) भी होचुकाहो उस समय संन्यासी प्रतिदिन भिक्षाकी याचना करे (मांगे)—अर्थात् जब छः घटी दिन शेष रहै उस समय भिक्षाके लिये ग्राममें जाय—क्योंकि याज्ञवल्क्य ऋषिने यही कहाहै कि सायंकाल के समय दिनमें प्रमत्त न होकर भिक्षाटनकरै ५६ ॥

अलाभेनविषादीस्याल्लाभेचैवनहर्षयेत्।प्राणयात्रिकमात्रःस्यान्मात्रासंगाद्विनिर्गतः५७

प० । अलाभे न विषादी स्यात् लाभे च एव न हर्षयेत् प्राणयात्रिकमात्रः स्यात् मात्रासंगात् विनिर्गतः ॥

यो० । संन्यासी भिक्षायाः — अलाभे विषादी न स्यात् — चपुनः लाभेसति न हर्षयेत — किन्तु मात्रासंगात् विनिर्गतः सन् प्राणयात्रिकमात्रः स्यात् ॥

भा० । ता० । भिक्षाके न मिलनेपर संन्यासी दुःखी न हो—और मिलनेपर आनंद न मानै—किंतु उतनेही अन्नके भोजन में तत्पर रहै जितनेमें अपने प्राणों का निर्वाहहो—और विषयों

१ अप्रमत्तश्चरेद्भैक्षंसायाह्नेनाभिसन्धितः ॥

के संगसे रहित रहे अर्थात् दण्ड कमण्डलु आदिकों में भी श्रेष्ठ और अधम बुद्धि न करे ५७ ॥

अभिपूजितलाभांस्तुजुगुप्सेतैवसर्वशः । अभिपूजितलाभैश्चयतिर्मुक्तोऽपिबद्ध्यते ५८

प० । अभिपूजितलाभान् तु जुगुप्सेत एव सर्वशः अभिपूजितलाभैः च यतिः मुक्तः अपि बद्ध्यते ॥

यो० । सर्वशः अभिपूजितलाभान् जुगुप्सेत एव — मुक्तः अपि यतिः अभिपूजितलाभैः बद्ध्यते (बन्धनंप्राप्नोति) ॥

भा० । ता० । सत्कारपूर्वक जितनेलाभहैं उनकी जुगुप्सा (निंदा) करै—क्योंकि सत्कार-पूर्वक लाभहोनेपर देनेवाले का स्नेह और ममता आदि से मुक्तहोकर भी यति (संन्यासी) बन्धनको प्राप्तहोताहै ५८ ॥

अल्पान्नाभ्यवहारेणरहःस्थानासनेनच । ह्रियमाणानिविषयैरिन्द्रियाणिनिवर्त्तयेत ५९॥

प० । अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ह्रियमाणानि विषयैः इन्द्रियाणि निवर्त्तयेत् ॥

यो० । विषयैः ह्रियमाणानि (आकृष्यमाणानि) इन्द्रियाणि अल्पान्नाभ्यवहारेण — चपुनः रहःस्थानासनेन निवर्तयेत् ॥

भा० । ता० । रूप आदि विषयोंमें लगीहुई इंद्रियोंको अल्प अन्नके भोजन और एकांत स्थानमें वास—से निवृत्तकरै (हटावे)—अर्थात् विषयोंमें आसक्त न हो क्योंकि ५९ ॥

इन्द्रियाणांनिरोधेनरागद्वेषक्षयेणच । अहिंसयाचभूतानाममृतत्वायकल्पते ६० ॥

प० । इंद्रियाणां निरोधेन रागद्वेषक्षयेण च अहिंसया च भूतानां अमृतत्वाय कल्पते ॥

यो० । इंद्रियाणां निरोधेन चपुनः रागद्वेषक्षयेण — चपुनः भूतानां अहिंसया — संन्यासी अमृतत्वाय (मोक्षाय) कल्पते मोक्षयोग्योभवतीत्यर्थः ॥

भा० । ता० । विषयोंसे इंद्रियोंके अवरोध और रागद्वेषके नाशसे और संपूर्ण भूतोंकी हिंसा के त्यागसे संन्यासी मोक्षके योग्य होताहै ६० ॥

अवेक्षेतगतीर्नृणांकर्मदोषसमुद्भवाः । निरयेचैवपतनंयातनाश्चयमक्षये ६१ ॥

प० । अवेक्षेत गतीः नृणां कर्मदोषसमुद्भवाः निरये च एव पतनं यातनाः च यमक्षये ॥

यो० । कर्मदोषसमुद्भवाः नृणां गतीः चपुनः निरये पतनं — चपुनः यमक्षये यातनाः अवेक्षेत (पश्येत) ॥

भा० । कर्मके दोषोंसे पैदाहुई मनुष्योंकी गति और नरकमें पतन और यमलोककी पीडा इनको देखै अर्थात् इनसे भयभीतहोकर शास्त्रोक्त कर्मकरै ॥

ता० । अब इंद्रियोंके नियम (रोकना) का उपाय और विषयोंसे विरक्तिके लिये संसार के तत्त्वकी चिंताका उपदेश कहतेहैं कि—शास्त्रोक्त कर्मके न करने और निषिद्धकर्मके करनेसे मनुष्योंको पशु आदि योनिकी प्राप्तिको और नरकों में पतन को और यमलोकमें यातना अर्थात् तीक्ष्ण खड्गसे छेदन आदि के दुःख जो श्रुति और पुराणोंमें कहेहैं उनको देखै ६१ ॥

विप्रयोगंप्रियैश्चैवसंयोगंचतथाप्रियैः । जरयाचाभिभवनंव्याधिभिश्चोपपीडनम् ६२॥

प० । विप्रयोगं प्रियैः च एव संयोगं च तथा अप्रियैः जरया च अभिभवनं व्याधिभिः च उपपीडनम् ॥

यो० । चपुनः प्रियैः (पुत्रादिभिः) विप्रयोगं — तथा अप्रियैः (हिंसकादिभिः) संयोगं — चपुनः जरया अभिभवनं — चपुनः व्याधिभिः उपपीडनं — (अवेक्षेत) ॥

भा० । ता० । इष्ट पुत्र आदिके वियोग (मरण)—और अनिष्ट सिंह आदिके संयोग—और वृद्ध अवस्थासे तिरस्कार—और व्याधियोंसे पीडा—अपने कर्म दोषसे पैदाहुये इनको देखै ६२ ॥

देहादुत्क्रमणंचास्मात्पुनर्गर्भेचसंभवम् । योनिकोटिसहस्रेषुसृतीश्चास्यान्तरात्मनः ६३

प० । देहात् उत्क्रमणं च अस्मात् पुनः गर्भे च संभवं योनिकोटिसहस्रेषु सृतीः च अस्य अन्तरात्मनः ॥

यो० । चपुनः अस्य अन्तरात्मनः (जीवस्य) — अस्मात् देहात् उत्क्रमणं (मरणं) चपुनः पुनः गर्भे संभवं — चपुनः योनिकोटिसहस्रेषु सृतीः (जन्मानि) अवेक्षेत ॥

भा० । इसजीव का इसदेहसे मरण और फिर गर्भ में उत्पत्ति—और कोटियोंसहस्र निषिद्ध योनियों में जीवका गमन—इनकी चिंताकरै ॥

ता० । देहसे इसअन्तरात्मा (जीव)का उत्क्रमण (मरण) को—और फिर गर्भमें उत्पत्ति अर्थात् मर्मके बींधनेवाले जीवोंसे गर्भकीपीडा और महारोगोंसे दुःख—और श्लेष्मआदि दोषों से कंठमें उग्रवेदना आदि गर्भ के दुःखोंको—और कुत्ता शृगालआदि निकृष्ट कोटियों योनिमें जीवके जन्मोंको देखै—अर्थात् चिंताकरै ६३ ॥

अधर्मप्रभवंचैवदुःखयोगंशरीरिणाम् । धर्मार्थप्रभवंचैवसुखसंयोगमक्षयम् ६४ ॥

प० । अधर्मप्रभवं च एव दुःखयोगं शरीरिणां धर्मार्थप्रभवं च एव सुखसंयोगं अक्षयम् ॥

यो० । चपुनः शरीरिणां अधर्मप्रभवं दुःखयोगं — चपुनः धर्मार्थप्रभवं अक्षयं सुखसंयोगं — चिंतयन् ॥

भा० । ता० । और अधर्म से पैदाहुये देहधारी जीवोंके दुःख के सम्बन्ध और धर्म से पैदा हुये ब्रह्म के साक्षात्कारसे मोक्षरूप अविनाशी सुखके सम्बन्ध की चिन्ताकरै अर्थात् उक्त सुख कीही अभिलाषा करै ६४ ॥

सूक्ष्मतांचान्ववेक्षेतयोगेनपरमात्मनः । देहेषुचसमुत्पत्तिमुत्तमेष्वधमेषुच ६५ ॥

प० । सूक्ष्मतां च अन्ववेक्षेत योगेन परमात्मनः देहेषु च समुत्पत्तिं उत्तमेषु अधमेषु च ॥

यो० । योगेन परमात्मनः सूक्ष्मतां — चपुनः उत्तमेषु अधमेषु देहेषु समुत्पत्तिं अन्ववेक्षेत ॥

भा० । योगाभ्यास से परमात्मा की सूक्ष्मता और उत्तम अधम देहोंमें उत्पत्ति (जन्म) की चिन्ता करै ॥

ता० । अन्य विषयों से चित्त की वृत्ति का रोकना जो योग जिससे परमात्मा (जीव) की स्थूल शरीर की अपेक्षा सर्वान्तर्यामी होनेसे सूक्ष्मता (निरवयवता) को देखै—और देहके त्याग होने पर उत्तम अधम (देवता पशुआदि) शरीरों में शुभ अशुभ फल भोग के लिये जीव की उत्पत्ति की चिन्ता करै ६५ ॥

दूषितोऽपिचरेद्धर्मंयत्रतत्राश्रमेरतः । समःसर्वेषुभूतेषुनलिंगंधर्मकारणम् ६६ ॥

प० । दूषितः अपि चरेत् धर्मं यत्र तत्र आश्रमे रतः समः सर्वेषु भूतेषु न लिंगं धर्म्मकारणं ॥

यो० । यत्रतत्राश्रमेरतः दूषितः अपि सर्वेषुभूतेषु समः सन् धर्मंचरेत् — कुतः धर्मकारणं लिंगं न भवति ॥

भा० । ता० । जिस किसी आश्रम में टिकाहुआ मनुष्य उस आश्रमके विरुद्ध आचरण से दूषित होनेपर भी सब भूतों में सम (ब्रह्म) बुद्धि से धर्मका आचरण करे क्योंकि दण्ड आदि लिंगका धारणही धर्मका कारण नहींहै किन्तु शास्त्रोक्त धर्मका करनाहै—और यहबात भी धर्म्म की प्रधानता के लिये है कुछ लिंग के त्यागने के लिये नहींहै ६६ ॥

फलंकतकवृक्षस्ययद्यप्यम्बुप्रसादकम् । ननामग्रहणादेवतस्यवारिप्रसीदति ६७ ॥

प० । फलं कतकवृक्षस्य यद्यपि अम्बुप्रसादकम् न नामग्रहणात् एव तस्य वारि प्रसीदति ॥

यो० । यद्यपि कतकवृक्षस्य फलं अम्बुप्रसादकं भवति — तथापि तस्य नामग्रहणात् एव वारि (जलं) न प्रसीदति (स्वच्छंनभवति) ॥

भा० । ता० । यद्यपि कतक (निर्मली) के वृक्षका फल जलको प्रसन्न (स्वच्छ) करनेवाला होताहै तथापि उसफलके नाम लेनेसेही जलस्वच्छ नहींहोता किंतु जलमें गेरनेसे होताहै इसी प्रकार संन्यास के चिह्नका धारणही धर्म का कारणनहीं किंतु शास्त्रोक्तकर्म का करनाही धर्मका कारण है ६७ ॥

संरक्षणार्थंजन्तूनांरात्रावहनिवासदा । शरीरस्यात्ययेचैवसमीक्ष्यवसुधांचरेत् ६८ ॥

प० । संरक्षणार्थं जंतूनां रात्रौ अहनि वा सदा शरीरस्य अत्यये च एव समीक्ष्य वसुधां चरेत् ॥

यो० । शरीरस्य अत्ययेच (पीडायामपि) जंतूनां संरक्षणार्थं रात्रौ वा अहनि सदा वसुधां समीक्ष्य (दृष्ट्वा) चरेत् ॥

भा० । ता० । शरीरको पीडा अवस्था मेंभी रात्रि अथवा दिनमें सदैव छोटे २ जीवों (चेंटी आदि) की भलीप्रकार रक्षा के लिये पृथ्वीको देखकर विचरे ६८ ॥

अह्नारात्र्याचयाञ्जन्तून्हिनस्त्यज्ञानतोयतिः ।
तेषांस्नात्वाविशुद्ध्यर्थंप्राणायामान्षडाचरेत् ६९ ॥

प० । अह्ना रात्र्या च यान् जंतून् हिनस्ति अज्ञानतः यतिः तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् षट् आचरेत् ॥

यो० । यतिः यान् जंतून् अह्ना वा रात्र्या वा अज्ञानतः हिनस्ति — तेषां विशुद्ध्यर्थं स्नात्वा षट् प्राणायामान् आचरेत् (कुर्यात्) ॥

भा० । ता० । रात्रि अथवा दिनमें संन्यासी जिन जीवोंकीहिंसा अज्ञानसेकरताहै—उनजीवों के मरने की हिंसा की शुद्धि के लिये स्नानकरके छः प्राणायामकरे और सातव्याहृति—गायत्री

शिरःमंत्र[1] इनको तीनवार पढ़नेसे प्राणायाम होताहै इसवसिष्ठजी के वचनानुसार प्राणायाम जानना ६९ ॥

प्राणायामाब्राह्मणस्यत्रयोऽपिविधिवत्कृताः । व्याहृतिप्रणवैर्युक्ताविज्ञेयंपरमंतपः ७०॥

प० । प्राणायामाः ब्राह्मणस्य त्रयः अपि विधिवत्कृताः व्याहृतिप्रणवैः युक्ताः विज्ञेयं परमं तपः ॥

यो० । विधिवत्कृताः व्याहृतिप्रणवैः युक्ताः त्रयः अपि प्राणायामाः ब्राह्मणस्य परमं तपः विज्ञेयम् (ज्ञातव्यम्) ॥

भा० । व्याहृति और ओंकार शिरःमंत्रसंयुक्त—और विधिपूर्वक कियेहुये तीन भी प्राणायाम ब्राह्मण का परमतप जानना ॥

ता० । सात व्याहृति और ओंकारसहित—और विधिपूर्वक कियेहुये तीनोंप्राणायाम ब्राह्मण का परमतप जानना अर्थात् पूरक कुंभक रेचकविधिसे किये प्राणायामही ब्राह्मणका परमतपहै[2] और पूरक कुंभक रेचकका स्वरूप योगि याज्ञवल्क्य ने इसप्रकार कहाहै कि[3] नासिकासे ऊपर खींचेहुये ऊर्ध्वश्वासको पूरक और निश्चलश्वासको कुंभक और छोड़ेहुये श्वासको रेचककहते हैं इससे तीनप्राणायाम तो अवश्यकरने यदि अधिककरै तो अधिकपाप का नाशहोताहै ७० ॥

दह्यन्तेध्मायमानानांधातूनांहियथामलाः ।
तथेन्द्रियाणांदह्यन्तेदोषाःप्राणस्यनिग्रहात् ७१ ॥

प० । दह्यंते ध्मायमानानां धातूनां हि यथा मलाः तथा इंद्रियाणां दह्यंते दोषाः प्राणस्य निग्रहात् ॥

यो० । ध्मायमानानां धातूनां यथा मलाः दह्यन्ते — तथा प्राणस्य निग्रहात् इंद्रियाणां दोषाः दहंते (नश्यंति) ॥

भा० । ता० । जैसे अग्निमें तपाई हुई धातु (सोनाआदि) ओंके मैल दग्ध होतेहैं (जलते हैं) इसी प्रकार प्राणायाम करने से प्राणों के रोकने से इन्द्रियों के दोष (विषयों में आसक्ति आदि) दग्ध होते हैं अर्थात् नष्टहोते हैं ७१ ॥

प्राणायामैर्दहेद्दोषान्धारणाभिश्चकिल्बिषम् ।
प्रत्याहारेणसंसर्गान्ध्यानेनानीश्वरान्गुणान् ७२॥

प० । प्राणायामैः दहेत् दोषान् धारणाभिः च किल्बिषम् प्रत्याहारेण संसर्गान् ध्यानेन अनीश्वरान् गुणान् ॥

यो० । प्राणायामैः दोषान् (रागादीन्) — धारणाभिः किल्बिषम् (पापं) प्रत्याहारेण संसर्गान् (विषयसम्बन्धान्) ध्यानेन अनीश्वरान् गुणान् (क्रोधलोभमोहादीन्) दहेत् (नाशयेत्) ॥

भा० । प्राणायामोंसे रागआदि दोषोंको—और धारणासे पापको—और प्रत्याहार संसर्गोंको—और ध्यानसे क्रोध आदि अनीश्वर (जीव) के गुणों को दग्धकरदे अर्थात् नष्टकरै ॥

---

१ ओंभूः ओंभुवः ओंस्वः ओंमहः ओंजनः ओंतपः ओंसत्यं ओंतत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहिधियोयोनः प्रचोदयात् आपोज्योतिरसोमृतं ब्रह्मभूर्भुवःस्वरोम् ॥

२ सव्याहृतिंसप्रणवांगायत्रींशिरसासह त्रिःपठेदायतप्राणः प्राणायामःसउच्यते ॥

३ नासिकोत्कृष्टउच्छ्वासोध्मानःपूरकउच्यते कुम्भको निश्चलश्वासो मुच्यमानस्तुरेचकः ॥

ता० । पूर्वोक्त प्राणायामों के करनेसे राग आदि दोषोंको—और धारणाओंसे अर्थात् अपनेको अपेक्षितदेशमें बैठकर परब्रह्मआदिमें जो मनको स्थिरकरना उसधारणासे पापको—और प्रत्याहारसे अर्थात् विषयोंसे इन्द्रियों के रोकनेसे विषयोंके सम्बन्धोंको—और ब्रह्मके ध्यानसे अर्थात्—सोहमस्मि—वह ब्रह्ममैंहूं इस एकाकार चिंतन से अनीश्वर (जो ईश्वर में नहीं) गुणों (क्रोध लोभ मोह आदि) को दग्धकरदे अर्थात् नष्ट करदे ७२ ॥

उच्चावचेषुभूतेषुदुर्ज्ञेयामकृतात्मभिः । ध्यानयोगेनसंपश्येद्गतिमस्यान्तरात्मनः ७३ ॥

प० । उच्चावचेषु भूतेषु दुर्ज्ञेयां अकृतात्मभिः ध्यानयोगेन संपश्येत् गतिं अस्य अन्तरात्मनः ॥

यो० । अकृतात्मभिः दुर्ज्ञेयां उच्चावचेषु भूतेषु अस्य अन्तरात्मनः गतिं ध्यानयोगेन संपश्येत् ॥

भा० । जिनका मन वशमें नहीं उनको जानने के अयोग्य जो उत्तम अधम योनियों में इस अन्तरात्माकी गति (जन्म) उसको ध्यानके अभ्यास से देखे ॥

ता० । उत्तम और अधम (देव पशुआदि) जातियोंमें इस अन्तरात्मा की उस गति को देखै (जो गति मलीन अन्तःकरण मनुष्यों के जानने अयोग्यहै) ध्यानके योगसे भलीप्रकार देखै—और फिर अज्ञान—काम्य—और निषिद्ध कर्मों से यह जीव की गति होती है यह जानकर ब्रह्मनिष्ठ होजाय ७३ ॥

सम्यग्दर्शनसंपन्नःकर्मभिर्ननिबध्यते । दर्शनेनविहीनस्तुसंसारंप्रतिपद्यते ७४ ॥

प० । सम्यग्दर्शनसंपन्नः कर्मभिः न निबध्यते दर्शनेन विहीनः तु संसारं प्रतिपद्यते ॥

यो० । सम्यग्दर्शनसम्पन्नः पुरुषः कर्मभिः न निबध्यते – दर्शनेन विहीनः तु संसारं प्रतिपद्यते (प्राप्नोति) ॥

भा० । ब्रह्मज्ञान से युक्त पुरुष कर्म के बन्धनों को प्राप्त नहीं होता—और जो ब्रह्मज्ञानरहित है वह संसार को प्राप्तहोता है ॥

ता० । ब्रह्मज्ञानी कर्मों से नहीं बँधता अर्थात् कर्म से उसका फिर जन्म नहीं होता क्योंकि पूर्वसंचित पुण्य पापका ब्रह्मज्ञानसे इस[1] श्रुति और स्मृतिके अनुसार नाश होजाताहै कि जैसे मुंजकी रुई अग्निमें गेरने से दग्ध होजाती है इसीप्रकार इसके सम्पूर्ण पाप नष्टहोजाते हैं और यह ब्रह्मरूप होजाता है तिस कार्य्यकारण रूप ब्रह्मके ज्ञान होनेपर इसके सब कर्म नष्ट होजाते हैं—इससे पुण्य पाप दोनोंका सम्बन्ध नहीं रहता और ब्रह्मज्ञानके अनन्तर दैवाधीन पाप होने पर भी पापका सम्बन्ध नहीं होता—क्योंकि इस[2] श्रुति में यह लिखाहै जैसे कमल के पत्ते को जलका सम्बन्ध नहीं होता—इसी प्रकार ज्ञानी को देहमें पापका सम्बन्ध नहीं होता—और देहके आरंभक पुण्य पापका सम्बन्ध भी नहीं होता—यहीबात ब्रह्ममीमांसा में इस[3] श्रुतिमें व्यासजी

१ तद्यथा इषीकातूलमग्नौ प्रोतं प्रदूयेत एवंहास्य सर्वेपाप्मानः प्रदूयंते इत्या ब्रह्मैवभवतीति क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे इतिस्मृतेः ॥

२ पुष्करपलाशमापो न श्लिष्यंते एवमेवं देहे पाप कर्म न श्लिष्यते ॥

३ तदधिगमे उत्तरपूर्वार्धयोरश्लेषविनाशौ तद्व्यपदेशात् ॥

ने निर्णयकी है कि उस ब्रह्म उपदेश की प्राप्ति के समय पहिले कर्म का नाश और अगले कर्म का असम्बन्ध होताहै और जो ब्रह्मके साक्षात्कार से हीन है वह तो जन्म मरणके प्रबन्ध को प्राप्त होताहै ७४ ॥

अहिंसयेन्द्रियासंगैर्वैदिकैश्चैवकर्मभिः । तपसश्चरणैश्चोग्रैःसाधयन्तीहतत्पदम् ७५ ॥

प० । अहिंसया इंद्रियासंगैः वैदिकैः च एव कर्मभिः तपसः चरणैः च उग्रैः साधयंति इह तत्पदम् ॥

यो० । ज्ञानिनः अहिंसया इंद्रियासंगैः चपुनः वैदिकैः कर्मभिः चपुनः उग्रैः तपसः चरणैः इह (संसारे) तत्पदं साधयंति (प्राप्नुवंति) ॥

भा० । अहिंसा–इंद्रियोंका विषयोंमें असम्बन्ध–और वेदोक्त कर्म–उग्र तप इनसे ब्रह्मपदको ज्ञानवान् सिद्ध करते हैं ॥

ता० । निषिद्ध हिंसाके त्यागसे–इंद्रियोंके विषयोंसे–असंगसे–और वेदोक्त नित्यकर्मों (संध्या वंदन आदि) करनेसे क्योंकि इस वचनमें काम्य कर्मको वर्जित कहाहै और उग्र (कृच्छ्र चांद्रायण आदि) तपके करने से इसलोक में ब्रह्ममें लयरूप ब्रह्मपदको प्राप्तहोते हैं–पहिले सम्यग्दर्शनको मोक्षका हेतु कहा इस श्लोकसे सम्यग्दर्शन के सहकारी कर्मको मोक्षकाहेतु कहा ७५ ॥

अस्थिस्थूणंस्नायुयुतंमांसशोणितलेपनम् । चर्मावनद्धंदुर्गन्धिपूर्णंमूत्रपुरीषयोः ७६ ॥

जराशोकसमाविष्टंरोगायतनमातुरम् । रजस्वलमनित्यंचभूतावासमिमंत्यजेत् ७७ ॥

प० । अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् चर्मावनद्धं दुर्गंधिपूर्णं मूत्रपुरीषयोः ॥

प० । जराशोकसमाविष्टं रोगायतनं आतुरं रजस्वलं अनित्यं च भूतावासं इमं त्यजेत् ॥

यो० । अस्थिस्थूणं स्नायुयुतं – मांसशोणितलेपनं – चर्मावनद्धं – मूत्रपुरीषयोः दुर्गंधिपूर्णं – जराशोकसमाविष्टं – रोगायतनं आतुरं – रजस्वलं चपुनः अनित्यं इमं भूतावासं देहं त्यजेत् ॥

भा० । ता० । अस्थि जिसमें स्थूणा(थूनी) हैं स्नायुरूपरज्जुसे जो बँधाहै–मांस और रुधिरसे जो लिप्तहै–चर्मसे जो ढकाहै–और मूत्र और पुरीष (विष्ठा) की दुर्गंधिसे जो पूर्णहै–जरा और दुःखसे जो संयुतहै–रोगोंका जो आधारहै और क्षुधा तृषा शीतउष्ण आदिसे जोआतुर (कातर) है और प्रायः जो रजोगुणसे संयुक्तहै और जो विनाशीहै–और पृथिवी आदिपांचों भूतोंका जो आवास (घर) है–ऐसे इस देहको त्यागदे अर्थात् ऐसा कर्म न करे जिससे फिर देहका सम्बन्धहो ७६ । ७७ ॥

नदीकूलंयथावृक्षोवृक्षंवाशकुनिर्यथा । तथात्यजन्निमंदेहंकृच्छ्राद्ग्राहाद्विमुच्यते ७८ ॥

प० । नदीकूलं यथा वृक्षः वृक्षं वा शकुनिः यथा तथा त्यजन् इमं देहं कृच्छ्रात् ग्राहात् विमुच्यते ॥

यो० । नदीकूलं त्यजन् यथावृक्षः – वा वृक्षं त्यजन् यथा शकुनिः (पक्षी) कृच्छ्राद्विमुक्तो भवति तथा इमं देहं त्यजन् सन् कृच्छ्राद् ग्राहात् ज्ञानी विमुच्यते (मुक्तोभवति) ॥

१. काम्यकर्मता न प्रशस्ता ॥

भा० । जैसे नदीके कूलको वृक्ष और वृक्षको पक्षी त्यागताहै इस प्रकार इस देहको त्यागता हुआ ज्ञानी दुःखरूप ग्राहसे छूटजाता है ॥

ता० । ब्रह्मके उपासक को देहके त्यागके समयमेंही मोक्षहोताहै—परंतु प्रारब्ध कर्मोंका भोगसेही नाशहोताहै—इससे देहके त्यागनेके दो प्रकारहैं कि१—जो मनुष्य कर्माधीन देहके त्यागकी प्रतीक्षाकरै (बाट देखे) वह इस प्रकार देहको त्यागे जैसे नदीके कूल (तट) को वृक्ष—अर्थात् वृक्ष अपने पड़नेको नहींजानता हुआ ही नदीके वेगसे गिरजाताहै—२—और जो ज्ञान और कर्मकी श्रेष्ठतासे भीष्म आदिके समान स्वाधीन मृत्युहो वह इस प्रकार देहको त्यागे जैसे वृक्षको पक्षी अर्थात् जैसे पक्षी वृक्षको अपनी इच्छासे त्यागताहै—इस प्रकार देहको त्यागता हुआ मुमुक्षु दुःखरूप ग्राहसे छूटजाताहै ७८ ॥

प्रियेषुस्वेषुसुकृतमप्रियेषुचदुष्कृतम् । विसृज्यध्यानयोगेनब्रह्माभ्येतिसनातनम् ७९ ॥

प० । प्रियेषु स्वेषु सुकृतं अप्रियेषु च दुष्कृतं विसृज्य ध्यानयोगेन ब्रह्म अभ्येति सनातनम् ॥

यो० । स्वेषु प्रियेषु सुकृतं (पुण्यं) चपुनः अप्रियेषु दुष्कृतं (पापं) ध्यानयोगेन विसृज्य सनातनं ब्रह्म अभ्येति (प्राप्नोति) ॥

भा० । ब्रह्मज्ञानी अपने मित्रों में पुण्यको और अपने शत्रुओं में पापको छोड़कर ध्यान के योगसे सनातन ब्रह्मको प्राप्तहोता है ॥

ता० । ब्रह्म ज्ञानी अपने मित्रोंमें हितकारियोंमें सुकृत (पुण्य) को और अपने अप्रिय (शत्रु) में दुष्कृत (पाप) को निःक्षेप (त्याग) कर ध्यानके योगसे नित्य ब्रह्मको प्राप्तहोताहै अर्थात् ब्रह्ममें लीन होताहै क्योंकि इस श्रुति[1] में यह लिखाहै इस ब्रह्मज्ञानीके पुत्र दाय (भाग) को पुत्र और साधकृत्य (कर्म) को मित्र और पापकृत्य को शत्रु प्राप्तहोतेहैं और इसीप्रकार इस[2] श्रुतिमें यह लिखाहै उन दोनों पुण्य पापोंमेंसे सुकृतको ज्ञाति के प्रिय मनुष्य और दुष्कृत को ज्ञातिके अप्रिय मनुष्य प्राप्तहोतेहैं—और ब्रह्म मीमांसामें पूर्वोक्त आदि श्रुति वाक्योंका उदाहरण देकर पुण्य पापकी हानि होनेपर भी ब्रह्मकी उपासना का निर्णय इस[3] आदि सूत्रोंसे व्यासजीने—कियाहै कि पुण्य पाप की हानि होनेपर भी मोक्षके लिये कृशअवस्थामें भी वेदोंमें ब्रह्मको गावे—इसमें कोई यह शंका करतेहैं कि अन्य के पुण्य पाप अन्य में कैसे चले जाते हैं—इसका यह समाधान है कि धर्म और अधर्म की व्यवस्थामें शास्त्र प्रमाण है और इतरमें पुण्य पाप के जानेमें भी शास्त्रही प्रमाण है—इससे शास्त्रके द्वारा पुण्य पाप का अन्य में जाना सिद्ध होसक्ता है—इसप्रकार शास्त्रसे बाधित होनेसे यह अनुमान भी नहीं होसक्ता कि अन्यके पुण्य पाप—अन्य में नहीं जासके—स्थानके भेदसे—अन्य के भोजनवत्—क्योंकि यदि अनुमानसे शास्त्रका बाधहोय तो यह भी अनुमान प्रमाण होजायगा कि प्राणी का शिर—शुद्ध है—प्राणीका अंगहोनेसे—शंखवत्—सिद्धांत यह है कि शास्त्रोक्त होनेसे शंख शुद्ध है और शिर नहीं—और मेधातिथि और गोविंदराज तो इस श्लोक का यह अर्थ करतेहैं—कि यदि ज्ञानी के प्यारको

१ तस्यपुत्रा दायमुपयंति सुहृदः साधुकृत्यं द्विषतः पापकृत्यं ॥

२ ततस्तेषु सुकृतदुष्कृतेष तेतस्य प्रियाज्ञातयः सुकृतमुपयंत्यप्रियादुष्कृतम् ॥

३ सुकृतदुष्कृतयोर्हानिमात्रश्रवणेप्युपासनं प्रतिपत्तव्यं- हानौतूपायनशब्दशेषत्वात् कुशाच्छंदस्तुत्युपगानवत् ॥

अथवा द्वेष (वैर) को कोई करै तो उनमें अपने ही पुण्य पापको कारण मानकर अर्थात् मेरी प्रीति में मेराही पुण्य कारणहै और द्वेषमें पाप–उनके करनेवाले रागद्वेषियोंको त्यागकर नित्य ब्रह्मभावको प्राप्तहोताहै–यह मेधातिथि गोविंदराज का अर्थ ठीक नहीं है क्योंकि विसृज्य (त्यागकर) इस क्रिया में श्लोकमें कहेहुये पुण्य पाप रूप कर्म को छोड़कर उसके करनेवाले रागद्वेषी पुरुषों को कर्म मानना अयोग्य है और उन कर्मोंमें भी विसृज्य इस क्रिया को त्याग कर प्रकल्प्य (मानकर) इस अपूर्व क्रिया को मानना भी अयोग्यहै और इस मनुकी व्याख्या में इसै प्रमाण से व्यासजी का कहा वेदार्थही प्रमाणहै और अब के पण्डितोंने जो अभिमानसे कल्पना करलिया है वह प्रमाण नहीं है ७६ ॥

यदाभावेनभवतिसर्वभावेषुनिःस्पृहः । तदासुखमवाप्नोतिप्रेत्यचेहचशाश्वतम् ८० ॥

प० । यदा भावेन भवति सर्वभावेषु निःस्पृहः तदा सुखं अवाप्नोति प्रेत्य च इह च शाश्वतं ॥

यो० । यदा सर्वभावेषु भावेन विषयेषु (दोषबुद्ध्या) निःस्पृहः भवति तदा प्रेत्य चपुनः इह शाश्वतं (अविनाशी) सुखं अवाप्नोति मुक्तोभवतीत्यर्थः ॥

भा० । ता० । जब मन से विषयों में दोष बुद्धि के द्वारा सब पदार्थों में इच्छाको त्यागताहै तभी इह लोकमें संतोष के सुख को और परलोकमें मोक्षके सुखको प्राप्तहोता है ८० ॥

अनेनविधिनासर्वांस्त्यक्त्वासंगान्शनैःशनैः। सर्वद्वन्द्वविनिर्मुक्तोब्रह्मण्येवावतिष्ठते ८१ ॥

प० । अनेन विधिना सर्वान् त्यक्त्वा संगान् शनैः शनैः सर्वद्वंद्वविनिर्मुक्तः ब्रह्मणि एव अवतिष्ठते ॥

यो० । अनेन विधिना शनैः शनैः सर्वान् संगान् त्यक्त्वा सर्वद्वंद्वविनिर्मुक्तः सन् ब्रह्मणि एव अवतिष्ठते (लीयते) ॥

भा० । ता० । इस पूर्वोक्त विधि से पुत्र स्त्री आदि में ममतारूप सम्पूर्ण संगों को शनैः २ त्यागकर मान अपमान आदि सब द्वंद्वोंसे रहित होकर ब्रह्मज्ञानी ब्रह्ममें ही लीन होताहै ८१ ॥

ध्यानिकंसर्वमेवैतद्यदेतदभिशब्दितम् । नह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुते ८२॥

प० । ध्यानिकं सर्वं एव एतत् यत् एतत् अभिशब्दितम् न हि अनध्यात्मवित् कश्चित् क्रियाफलं उपाश्नुते ॥

यो० । यत् एतत् (पूर्वं) अभिशब्दितं तत्सर्वं ध्यानिकं एव (परमात्मध्यानजन्यं एवभवति) हि (यतः) कश्चित् अपि अनध्यात्मवित् क्रियाफलं न उपाश्नुते (नभुनक्ति) ॥

भा० । जो यह पूर्व कहा है वहसब परमात्मा के ध्यान से होता है क्योंकि जिसको अध्यात्म ज्ञान नहीं है वह कोई भी उक्त ध्यानरूप कर्म के फलको प्राप्त नहीं होता ॥

ता० । जो यह पुत्र आदिमें ममता का और मान अपमान का त्याग और ब्रह्म में स्थिति (लय) कहा है वह सब परमात्मा के ध्यानसे होता है अर्थात् उक्त ध्यानी कोही ममता और मान अपमान आदि नहीं होते और वह ब्रह्मरूप होताहै क्योंकि कोई भी अनध्यात्मवित् है

---

१ व्यासव्याख्यातवेदार्थमेवमस्यामनुस्मृतेः मन्येनकल्पितंगर्वाद्वार्चीनैर्विचक्षणैः ॥

अर्थात् अपने जीवात्माको ब्रह्मरूप नहीं जानता वहउक्त ध्यानके ममताका और मान अपमान के त्याग आदि फलको भी प्राप्त नहीं होता ८२ ॥

अधियज्ञंब्रह्मजपेदाधिदैविकमेवच। आध्यात्मिकंचसततंवेदान्ताभिहितंचयत् ८३ ॥

प० अधियज्ञं ब्रह्म जपेत् आधिदैविकं एव च आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् ॥

यो० । अधियज्ञं चपुनः आधिदैविकं–चपुनः आध्यात्मिकं चपुनः वेदान्ताभिहितं यत् ब्रह्म तत् जपेत् ॥

भा० । अधियज्ञ वेद को और आधिदैविक और आध्यात्मिक वेदको और वेदांतों में कहा जो वेद उसको निरन्तर जपै ॥

ता० । पहिले ब्रह्मके ध्यानके स्वरूपकी उपासना कही अब इस श्रुति के अनुसार[1] ब्रह्म की उपासनाका जो अंग (साधन) वेदका जप उसको कहते हैं कि इस आत्मा के जानने की इच्छा ब्राह्मण वेदान्त के जपसे करते हैं–अर्थात् ज्ञानका साधन वेदका जप कहते हैं–कि अधियज्ञ (जिसमें यज्ञ करने की विधि कही हो) वेदको और आधिदैविक (जिस में इन्द्र आदि देवताओं की स्तुति कही हो) वेदको–और आध्यात्मिक (जिसमें जीवका स्वरूप कहाहो) वेद को और जो वेदान्तों में कहाहो (सत्यंज्ञानमनन्तंब्रह्म इत्यादि) उस वेद को निरन्तर जपै अर्थात् ज्ञानके मोक्षके उपाय जपोंसे तत्पर रहै ८३ ॥

इदंशरणमज्ञानामिदमेवविजानताम्। इदमन्विच्छतांस्वर्गमिदमानन्त्यमिच्छताम् ८४

प० । इदं शरणं अज्ञानां इदं एव विजानतां इदं अन्विच्छतां स्वर्गं इदं आनंत्यं इच्छताम् ॥

यो० । इदं (वेद रूपं ब्रह्म) अज्ञानां शरणं–विजानतां इदं एव शरणं–स्वर्गं अन्विच्छतां (पुरुषाणां) इदं शरणं–आनंत्यं (मोक्षं) इच्छतां इदं शरणं (भवति) ॥

भा० । ता० । जो वेदका अर्थ नहीं जानते उनकी भी गति पाठमात्र से वेदहीहै और जो अर्थ जानते हैं उनकी गति पापनाशक होनेसे वेदही है–और स्वर्ग और मोक्ष की इच्छा करने वाले पुरुषों की भी गति वेदही है क्योंकि स्वर्ग मोक्ष की प्राप्ति के उपाय वेदसे ही जाने जाते हैं ८४ ॥

अनेनक्रमयोगेनपरिव्रजतियोद्विजः। सविधूयेहपाप्मानंपरंब्रह्माधिगच्छति ८५ ॥

प० । अनेन कर्मयोगेन परिव्रजति यः द्विजः सः विधूय इह पाप्मानं परं ब्रह्म अधिगच्छति ॥

यो० । यः द्विजः अनेन क्रमयोगेन परिव्रजति–सः इह पाप्मानं विधूय (विनाश्य) परंब्रह्म अधिगच्छति (प्राप्नोति)

भा० । ता० । जो द्विज इसक्रम से संन्यास आश्रमको ग्रहणकरता है वह इसीलोक में पाप को नष्टकरके परब्रह्म को प्राप्तहोताहै अर्थात् ब्रह्मसाक्षात्कार से उपाधि शरीर के नाशहोनेपर ब्रह्म में एकताको प्राप्तहोताहै ८५ ॥

एषधर्मोऽनुशिष्टोवोयतीनांनियतात्मनाम्। वेदसंन्यासिकानांतुकर्मयोगंनिबोधत ८६॥

प० । एषः धर्मः अनुशिष्टः वः यतीनां नियतात्मनां वेदसंन्यासिकानां तु कर्मयोगं निबोधत ॥

१ तमेतं वेदान्तवचनेन ब्राह्मणाविविदिषन्ति ॥

यो० । नियतात्मनां यतीनां एषः धर्मः (पूर्वोक्तः) वः (युष्मभ्यं) अनुशिष्टः (कथितः) वेदसंन्यासिकानां तु कर्मयोगं यूयं निबोधत (शृणुत) ॥

भा० । वशमें है मन जिनके ऐसे यतियोंका यह धर्म तुमको कहा अब वेद संन्यासियों (कुटीचक) के कर्मयोगको तुम सुनो ॥

ता० । नियत (वशीभूत) है मन जिनका ऐसे यतियों (संन्यासी) का अर्थात् कुटीचक बहूदक हंस परमहंस इनचारों का यह पूर्वोक्त धर्म तुमको कहा—अब वेदोक्तकर्मके करनेवाले जो कुटीचकरूप वेदसंन्यासी केवल उनकेही धर्मको तुमसुनो क्योंकि इस महाभारत के वचनानुसार चारप्रकार के भिक्षुः (संन्यासी) होते हैं तिनमें कुटीचक पुत्रके भी यहां वसकर भिक्षा खासक्ता है—गोविंदराज तो यहकहते हैं कि जिसने वेदोक्त अग्निहोत्रआदि कर्म त्यागदियेहों और ज्ञानके सम्पादक वेदोक्तकर्मको जो करताहो ऐसे गृहस्थीको वेद संन्यासी कहते हैं—सो ठीक नहींहै क्योंकि अग्निहोत्र करनेवाले गृहस्थीको अंत्येष्टिकर्म के समय अग्नियोंका त्याग करना और चौथे आश्रममें आत्मामें ही अग्नियोंका आरोप (मानना) शास्त्रने कहा है जब ये दोनों नहीं तो वैसेही अग्नियोंका त्यागहोजायगा—इससे गृहस्थीको वेदसंन्यासी बतातेहुये गोविंदराजने अग्नियोंका त्यागवैसेहीअर्थात् कहा—और मेधातिथिने निराश्रमीको वेद संन्यासी कहाहै उसके मतमेंभी चार आश्रमोंकानियम नहींबनसक्ता—इससे हमाराही कथनश्रेष्ठहै८६ ॥

ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिस्तथा । एतेगृहस्थप्रभवाश्चत्वारःपृथगाश्रमाः ८७ ॥

प० । ब्रह्मचारी गृहस्थः चँ वानप्रस्थः यतिः तथा एते गृहस्थप्रभवाः चत्वारः पृथगाश्रमाः ॥

यो० । ब्रह्मचारी चपुनः गृहस्थः वानप्रस्थः तथायतिः एते चत्वारः पृथगाश्रमाः गृहस्थप्रभवाः — भवंति ॥

भा० । ता० । यद्यपि वेद संन्यासीके प्रज्ञात कर्मके त्यागके पीछे यह वक्तव्यथा कि यह वेद संन्यासी आश्रम वालाहै वा नहीं—तथापि अब चारही आश्रमोंको कहतेहैं—ब्रह्मचारी गृहस्थ वानप्रस्थ और यति—गृहस्थीसे पैदाहुये ये चार आश्रम पृथक्२ होतेहैं ८७ ॥

सर्वेऽपिक्रमशस्त्वेतेयथाशास्त्रंनिषेविताः । यथोक्तकारिणंविप्रंनयन्तिपरमांगतिम् ८८ ॥

प० । सर्वे अपि क्रमशः तु एते यथाशास्त्रं निषेविताः यथोक्तकारिणं विप्रं नयंति परमां गतिं ॥

यो० । यथाशास्त्रं क्रमशः निषेविताः सर्वे अपि एते यथोक्तकारिणं विप्रं परमां गतिं नयंति (प्रापयंति) ॥

भा० । ता० । शास्त्रके अनुसार सेवन किये ये चारों भी आश्रम (अर्थात् दो वा एक) यथोक्त (शास्त्र रीतिसे) करने वाले ब्राह्मणको परमगति (मोक्ष) को प्राप्तकरतेहैं ८८ ॥

सर्वेषामेवचैतेषांवेदस्मृतिविधानतः । गृहस्थउच्यतेश्रेष्ठःसत्रीनेतान्बिभर्तिहि ८९ ॥

प० । सर्वेषां एव चँ एतेषां वेदस्मृतिविधानतः गृहस्थः उच्यते श्रेष्ठः सः त्रीन् एतान् बिभर्ति हि ॥

यो० । एतेषां सर्वेषां अपिमध्ये वेदस्मृतिविधानतः गृहस्थः श्रेष्ठः (मन्वादिभिः) उच्यते — हि (यतः) सः (गृहस्थः) एतान् त्रीन् बिभर्ति (पोषयति) ॥

१ चतुर्धाभिक्षवस्तुस्युः कुटीचकबहूदकौ हंसःपरमहंसश्चयोयःपश्चात्सउत्तमः ॥

भा० । ता० । वेद संन्यासीका पुत्रके ऐश्वर्यमें वास कहेंगे इसलिये गृहस्थकी उत्तमता कहते हैं कि संपूर्ण इन ब्रह्मचारी आदि आश्रमोंमें प्रायः अग्निहोत्र आदि वेद और स्मृतिमें उक्तकर्म के करनेसे गृहस्थको मनु आदिकोंने श्रेष्ठ कहाहै क्योंकि यह गृहस्थी तीनों आश्रमोंको भिक्षाके देनेसे पुष्ट करताहै (पालताहै)—क्योंकि यह कहाहै कि प्रतिदिन ज्ञान और अन्नके लिये गृहस्थके आश्रय होतेहैं ८६ ॥

यथानदीनदाःसर्वेसागरेयान्तिसंस्थितिम्।तथैवाश्रमिणःसर्वेगृहस्थेयान्तिसंस्थितिम्९०

प० । यथा नदीनदाः सर्वे सागरे यांति संस्थितिं तथा एव आश्रमिणः सर्वे गृहस्थे यांति संस्थितिम् ॥

यो० । यथा सर्वे नदीनदाः सागरे संस्थितिं यांति तथैव सर्वे आश्रमिणः गृहस्थे संस्थितिं यांति (लभंते) ॥

भा० । ता० । जिसप्रकार संपूर्ण नदी और नद सागर में संस्थिति (भलीप्रकार टिकना) को प्राप्तहोतेहैं तिसीप्रकार गृहस्थ से भिन्न तीनों आश्रम भी गृहस्थमेंही स्थिति को प्राप्तहोते हैं अर्थात् गृहस्थ के आश्रयमें जीतेहैं ९० ॥

चतुर्भिरपिचैवैतैर्नित्यमाश्रमिभिर्द्विजैः । दशलक्षणकोधर्मःसेवितव्यःप्रयत्नतः ९१ ॥

प० । चतुर्भिः अपि च एव एतैः नित्यं आश्रमिभिः द्विजैः दशलक्षणकः धर्मः सेवितव्यः प्रयत्नतः ॥

यो० । चतुर्भिः आश्रमिभिः चापि एतैः द्विजैः दशलक्षणकः धर्मः प्रयत्नतः नित्यं सेवितव्यः (कर्त्तव्यः) ॥

भा० । ता० । चारों भी आश्रमवाले इन द्विजोंको दशलक्षणवाला धर्म बड़े यत्नसे प्रतिदिन सेवनकरना—अर्थात् दशप्रकार धर्म के अनुसारही चलना ९१ ॥

धृतिःक्षमादमोऽस्तेयंशौचमिन्द्रियनिग्रहः।धीर्विद्यासत्यमक्रोधोदशकंधर्मलक्षणम्९२

प० । धृतिः क्षमा दमः अस्तेयं शौचं इंद्रियनिग्रहः धीः[1] विद्या सत्यं अक्रोधः दशकं धर्मलक्षणम् ॥

यो० । एतत् धृतिः आदिदशकं धर्मलक्षणं (स्वरूपं) भवति ॥

भा० । संतोष—क्षमा—मनको वशमें रखना—न्यायसे धनको लेना—शुद्ध रहना—विषयोंसे इंद्रियोंको हटाना—शास्त्रके तत्त्वको जानना—आत्मा का ज्ञान—सत्यबोलना क्रोध न करना—यह दश प्रकार का धर्म का स्वरूप है ॥

ता० । उसी दशप्रकार के धर्मका स्वरूप और संख्याको दिखाते हैं—कि १ धृतिः (संतोष) २ क्षमा (यदि कोई अपना तिरस्कारभी करै तो उसका उपकारही करना)३—दम अर्थात् विकार के हेतु विषय के समीप आनेपर भी मनको वशमेंरखना क्योंकि इसे सनंदनके वचनसे यही दम पायाजाताहै—और गोविंदराजने शीत आतपआदि द्वंद्वोंके सहनेको दमकहाहै—४ अस्तेय अर्थात् अन्यायसे धनको ग्रहण न करना—५ शौच अर्थात् शास्त्रके अनुसार मिट्टी और जलसे

१ यस्मात्त्रयोऽप्याश्रमिणोज्ञानेनान्नेनचान्वहम् ॥

१ विकारहेतुविषयसन्निधानेप्यविक्रियत्वंमनसोदमनं दमः ॥

देहको शुद्धरखना—६ इंद्रियनिग्रह अर्थात् रूपआदि विषयों से चक्षुःआदि इंद्रियोंको हटाना—७ धी (शास्त्र के तत्त्वको जानना) ८ विद्या (आत्माको जानना) ९ सत्य (यथार्थबोलना) १० अक्रोध अर्थात् क्रोधकाहेतुहोनेपरभी क्रोधको न करना—यह दशप्रकारका धर्मकास्वरूपहै ९२ ॥

दशलक्षणानिधर्मस्ययेविप्राःसमधीयते । अधीत्यचानुवर्त्तन्तेतेयान्तिपरमांगतिम् ९३

प० । दशलक्षणानि धर्मस्य ये विप्राः समधीयंते अधीत्य च अनुवर्तंते ते यांति परमां गतिं ॥

यो० । ये विप्राः धर्मस्य दशलक्षणानि समधीयते—चपुनः अधीत्य अनुवर्त्तंते ते परमांगतिं यांति (प्राप्नुवंति) ॥

भा० । ता० । जो ब्राह्मण इनधर्म के दशलक्षणों को पढ़ते हैं और पढ़कर उसके अनुसार चलतेहैं वे ब्राह्मण ब्रह्मज्ञानकी उत्कटता (अधिकता) से मोक्षरूप परमगतिको प्राप्तहोतेहैं ९३ ॥

दशलक्षणकंधर्ममनुतिष्ठन्समाहितः । वेदान्तंविधिवच्छ्रुत्वासंन्यसेदनृणोद्विजः ९४ ॥

प० । दशलक्षणकं धर्मं अनुतिष्ठन् समाहितः वेदांतं विधिवत् श्रुत्वा संन्यसेत् अनृणः द्विजः ॥

यो० । समाहितः दशलक्षणकं धर्मं अनुतिष्ठन् सन् विधिवत् वेदांतं श्रुत्वा अनृणः द्विजः संन्यसेत् ॥

भा० । ता० । दशलक्षणधर्मको सावधान मनसे करके और गृहस्थ अवस्थामेंही वेदांत को विधिवत् सुनकर—दूरकियेहैं तीनोंऋण जिसने ऐसा द्विज संन्यासको आश्रयकरै ९४ ॥

संन्यस्यसर्वकर्माणिकर्मदोषानपानुदन् । नियतोवेदमभ्यस्यपुत्रैश्वर्येसुखंवसेत् ९५ ॥

प० । संन्यस्य सर्वकर्माणि कर्मदोषान् अपानुदन् नियतः वेदं अभ्यस्य पुत्रैश्वर्ये सुखं वसेत् ॥

यो० । सर्वकर्माणि संन्यस्य—कर्मदोषान् अपानुदन—नियतः द्विजः वेद अभ्यस्य—पुत्रैश्वर्ये सुखं वसेत् ॥

भा० । ता० । गृहस्थी के सम्पूर्ण अग्निहोत्रआदि कर्मों को त्यागकर—और अज्ञानसे जो जीव मरें उसपाप को प्राणायामआदिसे नष्टकरताहुआ और जितेंद्रियहोकर वेद (उपनिषद) को पढ़कर द्विज पुत्रके ऐश्वर्यमेंही सुखसे बसै- अर्थात् वस्त्र भोजनकी चिंतासे रहितहोकर पुत्र की दी भिक्षाकोही ग्रहण करतारहै—यहधर्म केवल कुटीचक संन्यासीकाहीहै ९५ ॥

एवंसंन्यस्यकर्माणिस्वकार्यपरमोऽस्पृहः । संन्यासेनापहत्यैनःप्राप्नोतिपरमांगतिम् ९६

प० । एवं संन्यस्य कर्माणि स्वकार्यपरमः अस्पृहः संन्यासेन अपहत्य एनः प्राप्नोति परमां गतिं ॥

यो० । स्वकार्यपरमः अस्पृहः द्विजः एवं कर्माणि संन्यस्य—संन्यासेन एनः (पापं) अपहत्य परमांगतिं (मोक्षं) प्राप्नोति ॥

भा० । ता० । ब्रह्मज्ञानरूप अपने कार्य में तत्पर और स्वर्गआदिकीभी इच्छासे रहित द्विज इसप्रकार अग्निहोत्रआदि कर्मोंको त्यागकर और संन्यास से पापको दूरकरके मोक्षरूप परम-गतिको प्राप्तहोताहै ९६ ॥

एषवोऽभिहितोधर्माब्राह्मणस्यचतुर्विधः । पुण्योऽक्षयफलःप्रेत्यराज्ञांधर्मंनिबोधत ९७

इतिमानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायांषष्ठोऽध्यायः ६ ॥

प० । एषः वः अभिहितः धर्मः ब्राह्मणस्य चतुर्विधः पुण्यः अक्षयफलः प्रेत्य राज्ञां धर्मं निबोधत ॥

यो० । ब्राह्मणस्य – पुण्यः प्रेत्य अक्षयफलः एषः चतुर्विधः धर्मः वः (युष्माकं) अभिहितः (उक्तः)--राज्ञां धर्मं यूयं निबोधत (शृणुत) ॥

भा० । ता० । पवित्र और परलोक में अक्षयफल का दाता यह ब्राह्मण का चारप्रकार का (ब्रह्मचर्यआदि) धर्म तुमको कहा अब राजाओं के धर्मको तुम सुनो ९७ ॥

इति मन्वर्थभास्करे षष्ठोऽध्यायः ६ ॥

अथसप्तमोऽध्यायः ॥

राजधर्मान्प्रवक्ष्यामियथावृत्तोभवेन्नृपः । संभवश्चयथातस्यसिद्धिश्चपरमायथा १ ॥

प० । राजधर्मान् प्रवक्ष्यामि यथावृत्तः भवेत् नृपः संभवः च यथा तस्य सिद्धिः च परमा यथा ॥

यो० । नृपः यथावृत्तः भवेत् – तस्य संभवः (उत्पत्तिः) यथा – चपुनः तस्य परमा सिद्धिः यथा – भवेत् – तथा राजधर्मान् अहं प्रवक्ष्यामि (कथयिष्यामि) ॥

भा० । राजाके वर्त्ताव के भेद और राजाकी उत्पत्ति–और उसके इसलोक परलोकमें सिद्धि के प्रकारको तुमको कहताहूं ॥

ता० । इसश्लोक धर्मशब्द से इसलोक के और परलोक के लिये कर्त्तव्य कर्म लेते हैं और राजशब्दसे भी जो राजसिंहासनपर बैठाहो वहलेते हैं केवल क्षत्रियही नहीं–क्योंकि जो देश और पुरआदिकों की पालनाकरै वही नृपशब्दका अर्थ है--राजाको जैसा आचरण (वर्त्ताव) करना चाहिये–वैसेही उसके करनेयोग्य धर्मोंको–और उस राजाकी जिसप्रकार उत्पत्ति उस प्रकारको और जैसे इसलोक और परलोक में इसको फलकी प्राप्तिहोती है उसप्रकार को मैं तुमको कहताहूं १ ॥

ब्राह्मंप्राप्तेनसंस्कारंक्षत्रियेणयथाविधि । सर्वस्यास्ययथान्यायंकर्त्तव्यंपरिरक्षणम् २ ॥

प० । ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि सर्वस्य अस्य यथान्यायं कर्त्तव्यं परिरक्षणम् ॥

यो० । यथाविधि ब्राह्मं संस्कारं प्राप्तेन क्षत्रियेण (राज्ञा) अस्य सर्वस्य (जगतः) यथान्यायं परिरक्षणं कर्त्तव्यम् ॥

भा० । विधिपूर्वक वेदोक्त संस्कार को प्राप्तहुये क्षत्रियको सम्पूर्ण इस जगत् की नीति के अनुसार रक्षाकरनी ॥

ता० । शास्त्रोक्तरीति से ब्राह्म (वेदकीप्राप्ति का उपाय) संस्कार को प्राप्तहुये क्षत्रियको–अपने देश (राज्य) में टिकेहुये इस सम्पूर्ण जगत्की नीति के अनुसार रक्षा करनी इससे यह बात दर्शाई कि राज्यका अधिकारी क्षत्रियही है अन्यनहीं–इसीसे शास्त्रके तत्त्वजानना और जीवन के लिये जगत्की रक्षा ये दो कर्म क्षत्रिय के कहेंगे और ब्राह्मण विपत्ति में क्षत्रिय धर्म से जीवे–और वैश्य भी क्षत्रियधर्म से और शूद्र क्षत्रिय वैश्य के धर्म से विपत्ति में जीवे–यह

नारद मुनि ने कहाहै कि ब्राह्मण किसीसमय भी शूद्रका कर्म न करै–और शूद्र ब्राह्मण के कर्मको न करै क्योंकि इनके करनेसे ये दोनों पतित होजातेहैं–इनदोनों का उत्तम जाति और नीचजातिका कर्मनहीं है किंतु मध्यम (क्षत्रिय वैश्य) जातिके कर्मकोही ये दोनोंकरैं–क्योंकि मध्यमजाति के कर्म सबके साधारण हैं–और क्षत्रियकर्म यहहै कि रक्षा और धर्म के लिये वेद और तप–और धर्मपूर्वक रक्षाकरनेवाले क्षत्रियका धर्मसे छठाभाग होताहै अर्थात् रक्षाकेलिये छठाभागले यदि अपने भोगके लिये ग्रहणकरै तो नरक में जाता है २ ॥

अराजकेहिलोकेऽस्मिन्सर्वतोविद्रुतेभयात् । रक्षार्थमस्यसर्वस्यराजानमसृजत्प्रभुः ३ ॥

प० । अराजके हि लोके अस्मिन् सर्वतः विद्रुते भयात् रक्षार्थं अस्य सर्वस्य राजानं असृजत् प्रभुः ॥

यो० । हि (यतः) अराजके अस्मिन् लोके भयात् सर्वतः विद्रुते सति – अस्य सर्वस्य (जगतः) रक्षार्थंप्रभुः (ब्रह्मा) राजानं असृजत् (सृष्टवान्) ॥

भा० । ता० । क्योंकि राजा से हीन यह जगत् चारोंओरसे चलायमान हुआ तब इस सम्पूर्ण जगत् की रक्षा के लिये प्रभुने राजाको रचा तिससे राजाको जगत् की रक्षा अवश्य करनी ३ ॥

इन्द्रानिलयमार्काणामग्नेश्चवरुणस्यच । चन्द्रवित्तेशयोश्चैवमात्राभिर्निर्मितोनृपः ४ ॥

प० । इन्द्रानिलयमार्काणां अग्नेः च वरुणस्य च चन्द्रवित्तेशयोः च एव मात्राभिः निर्मितः नृपः ॥

यो० । इन्द्रानिलयमार्काणां – चपुनः अग्नेः चपुनः वरुणस्य – चपुनः चन्द्रवित्तेशयोः मात्राभिः (अंशैः) नृपः (प्रभुणा) निर्मितः (सृष्टः) ॥

भा० । ता० । इन्द्र–पवन–यम–सूर्य्य–अग्नि–वरुण–चन्द्रमा और कुवेर–इन आठों की मात्रा (अंश) ओंसे राजा को प्रभु ने रचा–अर्थात् राजा में इन आठों लोकपालों के अंश होते हैं ४ ॥

यस्मादेषांसुरेन्द्राणांमात्राभ्योनिर्मितोनृपः । तस्मादभिभवत्येषसर्वभूतानितेजसा ५ ॥

प० । यस्मात् एषां सुरेन्द्राणां मात्राभ्यः निर्मितः नृपः तस्मात् अभिभवति एषः सर्वभूतानि तेजसा ॥

यो० । यस्मात् एषां सुरेन्द्राणां मात्राभ्यः नृपः निर्मितः तस्मात् एषः (नृपः) तेजसा सर्वभूतानि अभिभवति (तिरस्करोति) ॥

भा० । ता० । जिससे इन देवताओंके इन्द्रोंकी मात्राओंसे परमेश्वरने राजाको रचा तिससे यह राजा अपने तेज से सम्पूर्ण भूतों का तिरस्कार करताहै अर्थात् सब प्राणियोंमें राजाही अधिक तेजस्वी होता है ५ ॥

---

१ नकथंचनकुर्वीत ब्राह्मणःकर्मवार्षलं वृषलःकर्मचब्राह्मं पतनीयेहितेतयोः- उत्कृष्टंचापकृष्टंच तयोःकर्मनविद्यते मध्यमेकर्मणीहित्वा सर्वसाधारणेहिते रक्षणंवेदधर्मार्थं तपःक्षत्रस्यरक्षणं- सर्वतोधर्मषड्भागोराज्ञोभवतिरक्ष्यतः ॥

तपत्यादित्यवच्चैषचक्षूंषिचमनांसिच । नचैनंभुविशक्नोतिकश्चिदप्यभिवीक्षितुम् ६ ॥

प० । तपति आदित्यवत् च एषः चक्षूंषि च मनांसि च न च एनं भुवि शक्नोति कश्चित् अपि अभिवीक्षितुम् ॥

यो० । एषः (राजा) पश्यतां पुरुषाणां चक्षूंषि चपुनः मनांसि आदित्यवत् तपति — चपुनः एनं (राजानं) भुवि कश्चित् अपि मनुष्यः अभिवीक्षितुं (सन्मुखंद्रष्टुं) न शक्नोति ॥

भा० । ता० । यह राजा देखने वाले मनुष्यों के नेत्र और मनों को सूर्य्य के समान तपायमान करता है—और इसराजा के पृथिवी पर कोई सन्मुख देखने को समर्थ नहीं होता ६ ॥

सोऽग्निर्भवतिवायुश्चसोऽर्कःसोमःसधर्मराट् । सकुबेरःसवरुणःसमहेन्द्रःप्रभावतः ७ ॥

प० । सः अग्निः भवति वायुः च सः अर्कः सोमः सः धर्मराट् सः कुबेरः सः वरुणः सः महेन्द्रः प्रभावतः ॥

यो० । सः राजा प्रभावतः अग्निः वायुः अर्कः सोमः धर्मराट् — कुबेरः वरुणः महेन्द्रः भवति ॥

भा० । ता० । पूर्वोक्त अग्नि आदि के अंशों से उत्पत्ति और अग्नि आदिकों के समान कार्य करने से नवमें अध्याय में राजाको तेजस्वी कहेंगे—इससे वह राजा अपने प्रभावसे अग्निवायु सूर्य चन्द्र—धर्मराज—कुबेर वरुण और इन्द्ररूप होताहै ७ ॥

बालोऽपिनावमन्तव्योमनुष्यइतिभूमिपः । महतीदेवताह्येषानररूपेणतिष्ठति ८ ॥

प० । बालः अपि न अवमन्तव्यः मनुष्यः इति भूमिपः महती देवता हि एषा नररूपेण तिष्ठति ॥

यो० । मनुष्यः इति बुद्ध्या बालः अपि राजा पुरुषेण न अवमन्तव्यः कुतः एषा महती देवता नररूपेण तिष्ठति ॥

भा० । ता० । यह मनुष्य है इस बुद्धिसे बालक राजाका भी अपमान न करै क्योंकि यह कोई एक महती (बड़ी) देवता मनुष्य रूपमें टिकरहीहै और देवता के अपमान में अधर्म्म आदि आठदोष कहे हैं ८ ॥

एकमेवदहत्यग्निर्नरंदुरुपसर्पिणम् । कुलंदहतिराजाग्निःसपशुद्रव्यसंचयम् ९ ॥

प० । एकं एव दहति अग्निः नरं दुरुपसर्पिणं कुलं दहति राजाग्निः सपशुद्रव्यसंचयं ॥

यो० । अग्निः दुरुपसर्पिणं एकं एव नरं दहति — राजाग्निः सपशुद्रव्यसंचयं कुलं दहति ॥

भा० । ता० । जो अग्नि के समीप विना कहेजाय उस दुरुपसर्पी एकही मनुष्यको अग्नि दग्ध करती है और राजारूप अग्नि तो पशु और द्रव्यसंचय सहित कुलको दग्ध करदेतीहै ९ ॥

कार्यंसोऽवेक्ष्यशक्तिंचदेशकालौचतत्त्वतः । कुरुतेधर्मसिद्ध्यर्थंविश्वरूपंपुनःपुनः १० ॥

प० । कार्यं सः अवेक्ष्य शक्तिं च देशकालौ च तत्त्वतः कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः ॥

यो० । सः राजा कार्यं — स्वस्वशक्तिं चपुनः देशकालौ तत्त्वतः अवेक्ष्य — धर्मसिद्ध्यर्थं पुनः पुनः विश्वरूपं (अनेकरूपं) कुरुते — (धारयति) ॥

भा० । वहराजा कार्य शक्ति देशकाल इनको यथार्थ देखकर धर्मकी सिद्धि के लिये अनेक रूप धारता है ॥

ता० । वहराजा कार्य और अपनीशक्ति और देशकाल को यथार्थरीति से देखकर धर्म की सिद्धिकेलिये बहुतसे रूपोंको करता है—यदि अशक्तिकी दशाहोय तो क्षमाकरता है और शक्ति होनेपर जड़से उखाड़देताहै इसीप्रकार एकही देशकालमें अपने प्रयोजन के अनुसार शत्रु मित्र वा उदासीन होजाताहै तिससे मैं राजाका प्याराहूं इसबुद्धिसे राजाका अपमान न करै १० ॥

यस्यप्रसादेपद्माश्रीर्विजयश्चपराक्रमे । मृत्युश्चवसतिक्रोधेसर्वतेजोमयोहिसः ११ ॥

प० । यस्य प्रसादे पद्मा श्रीः विजयः च पराक्रमे मृत्युः च वसति क्रोधे सर्वतेजोमयः हि सः

यो० । यस्य (राज्ञः) प्रसादे पद्मा श्रीः — चपुनः पराक्रमे विजयः — क्रोधेच मृत्युः — वसति सः राजा सर्वतेजोमयः (भवति) ॥

भा० । ता० । जिस राजाकी प्रसन्नतामें महती श्री वसतीहै और जिसके पराक्रममें विजय वसताहै और जिसके क्रोधमें मृत्यु वसता है वह राजा संपूर्ण तेजका रूपहै अर्थात् राजाकी प्रसन्नतासे अधिक धन—और पराक्रमसे विजय—और क्रोधसे मृत्यु होतीहै इससे ऐसे तेजस्वी राजाको लक्ष्मी और विजय और जीवनका अभिलाषी मनुष्य सदाप्रसन्न रक्खे ११ ॥

तंयस्तुद्वेष्टिसंमोहात्सविनश्यत्यसंशयम् । तस्यह्याशुविनाशायराजाप्रकुरुतेमनः १२॥

प० । तं यः तु द्वेष्टि संमोहात् सः विनश्यति असंशयं तस्य हि आशु विनाशाय राजा प्रकुरुते मनः ॥

यो० । यः पुरुषः संमोहात् तं द्वेष्टि सः असंशयं विनश्यति — हि — (यतः) तस्य विनाशाय राजा आशु मनः प्रकुरुते (नियुंक्ते) ॥

भा० । ता० । जो पुरुष उस राजाका द्वेष करताहै वह निश्चयसे नष्टहोजाताहै क्योंकि उसके विनाशके लिये राजा शीघ्रही मनको नियुक्त करताहै (लगाताहै) १२ ॥

तस्माद्धर्मयमिष्टेषुसव्यवस्येन्नराधिपः । अनिष्टंचाप्यनिष्टेषुतंधर्मंनविचालयेत् १३ ॥

प० । तस्मात् धर्मं यं इष्टेषु सः व्यवस्येत् नराधिपः अनिष्टं च अपि अनिष्टेषु तं धर्मं न विचालयेत् ॥

यो० । तस्मात् सः नराधिपः इष्टेषुयं धर्मं — अनिष्टेषु च यं अनिष्टं व्यवस्येत् (व्यवस्थापयेत्) तं धर्मं न विचालयेत् ॥

भा० । ता० । तिससे वह राजा अपने इष्टों (अपेक्षितों) में जिस धर्मकी और अनिष्टों में जिस अनिष्टकी व्यवस्था करदे उस राजाके धर्म्म (नियम) को चलायमान न करै अर्थात् राजाकी अनुमति में रहै १३ ॥

तस्यार्थेसर्वभूतानांगोप्तारंधर्ममात्मजम् । ब्रह्मतेजोमयंदण्डमसृजत्पूर्वमीश्वरः १४ ॥

प० । तस्य अर्थे सर्वभूतानां गोप्तारं धर्मं आत्मजं ब्रह्मतेजोमयं दंडं असृजत् पूर्वं ईश्वरः ॥

यो० । तस्य (राज्ञः) अर्थे सर्वभूतानां गोप्तारं — धर्मं आत्मजं ब्रह्मतेजोमयं दंडं ईश्वरः पूर्वं असृजत् (सृष्टवान्) ॥

भा० । ता० । उस राजाके लिये सब प्राणियोंका रक्षक धर्मरूप अपना पुत्र और ब्रह्मका तेजरूप दंडको ब्रह्माने पहिले रचा १४ ॥

तस्यसर्वाणिभूतानिस्थावराणिचराणिच । भयाद्भोगायकल्पन्तेस्वधर्मान्नचलन्तिच १५

प० । तस्य सर्वाणि भूतानि स्थावराणि चराणि च भयात् भोगाय कल्पंते स्वधर्मात् न चलंति च ॥

टी० । तस्य दंडस्य भयात् स्थावराणि चराणि सर्वाणि भूतानि भोगाय कल्पंते चपुनः स्वधर्मात् न चलंति – (स्वधर्मेतिष्ठंति) ॥

भा० । उसी दंडके भयसे चराचर प्राणी भोगोंको भोगतेहैं और अपने धर्मसे चलायमान नहीं होते ॥

ता० । उसदंडके भयसे सब चराचर प्राणी भोगको करतेहैं अन्यथा दुर्बल प्राणीके धन और स्त्री आदिको प्रबल ग्रहण करनेपर और प्रबलके कोभी अति प्रबल ग्रहण करनेपर किसी का भी भोग सिद्ध न होगा–स्थावर वृक्ष आदिके काटलेनेपर स्थावरों के भोगमें बाधापड़जाय–और दंडहीके भयसे नित्य और नैमित्तिक कर्मकरनेसे अपने२ धर्मसे चलायमान नहींहोते १५ ॥

तंदेशकालौशक्तिंचविद्यांचावेक्ष्यतत्त्वतः । यथार्हतःसंप्रणयेन्नरेष्वन्यायवर्त्तिषु १६ ॥

प० । तं देशकालौ शक्तिं च विद्यां च अवेक्ष्य तत्त्वतः यथार्हतः संप्रणयेत् नरेषु अन्यायवर्त्तिषु ॥

टी० । देशकालौ – चपुनः शक्तिं – चपुनः विद्यां तत्त्वतः अवेक्ष्य अन्यायवर्त्तिषु नरेषु तं दंडं यथार्हतः संप्रणयेत् (प्रवर्त्तयेत्) ॥

भा० । ता० । देश काल–और दंडकी शक्ति और विद्या आदिको यथार्थ रीतिसे देखकर और इस अपराधपर यह दंड योग्यहै इत्यादि शास्त्रके अनुसार देखकर अन्यायके करनेवाले मनुष्यों पर उस दंडको राजा प्रवृत्तकरै अर्थात् अपराधके अनुसार दंडदे १६ ॥

सराजापुरुषोदण्डःसनेताशासिताचसः । चतुर्णामाश्रमाणांचधर्मस्यप्रतिभूःस्मृतः १७

प० । सः राजा पुरुषः दंडः सः नेता शासिता च सः चतुर्णां आश्रमाणां च धर्मस्य प्रतिभूः स्मृतः ॥

टी० । सः दंडः एव राजा – पुरुषः सः नेता – सः शासिता – सःएव चतुर्णां आश्रमाणां धर्मस्य प्रतिभूः (साक्षी) मुनिभिः स्मृतः ॥

भा० । वह दंडही–राजा वही पुरुष–वही नेता वही शिक्षक–वही चारों आश्रमोंके धर्मोंका साक्षी मुनियोंने कहाहै ॥

ता० । वस्तुतः वह दंडही राजाहै क्योंकि दंडकेही भयसे उसमें राजशक्ति होतीहै–और वह दंडही पुरुषहै उससे अन्य सब स्त्रीहै क्योंकि दंडके योग्य होनेसे स्त्रीके समान हैं–वही नेता कार्य्यों का प्राप्तकरनेवालाहै–वही शिक्षाका दाताहै और चारोंआश्रमों के धर्मों का प्रतिभूः (साक्षी) भी दंडही है अर्थात् दंडके भयसेही मनुष्य अपने २ धर्म में स्थितरहते हैं–यह सब मुनियों ने कहाहै १७ ॥

दण्डःशास्तिप्रजाःसर्वादण्डएवाभिरक्षति । दण्डःसुप्तेषुजागर्त्तिदण्डंधर्मंविदुर्बुधाः १८॥

प० । दंडः शास्ति प्रजाः सर्वाः दंडः एव अभिरक्षति दंडः सुप्तेषु जागर्त्ति दंडं धर्मं विदुः बुधाः ॥

यो० । सर्वाः प्रजाः दंडः शास्ति — दंडः एव अभिरक्षति — सुप्तेषु दंडः जागर्ति — बुधाः दंडं धर्मं विदुः ॥

भा० । सम्पूर्ण प्रजा को दण्डही शिक्षा देता है और दण्डही रक्षाकरता है और मनुष्योंके सोने पर दण्डही जागता है और पण्डितों ने दण्डको ही धर्म कहाहै ॥

ता० । सम्पूर्ण प्रजाओं को दण्डही आज्ञादेता है इससे शासिता दण्डका नाम ठीक कहा है और दण्डही सम्पूर्णप्रजाओं की रक्षाकरताहै इससे राजादण्डका ठीक नाम है और मनुष्योंके सोने पर भी दण्डही जागता है क्योंकि दण्डकेही भयसे चोर आदि प्रवृत्त नहीं होते और धर्म का कारण होनेसे पण्डितों ने दण्डकोही धर्म कहाहै—कारणको भी कार्य माना गया है क्योंकि इस लोक और परलोक के भयसे ही धर्म को करते हैं १८ ॥

समीक्ष्यसधृतःसम्यक्सर्वारञ्जयतिप्रजाः।असमीक्ष्यप्रणीतस्तुविनाशयतिसर्वतः १९॥

प० । समीक्ष्य सः धृतः सम्यक् सर्वाः रंजयति प्रजाः असमीक्ष्य प्रणीतः तु विनाशयति सर्वतः ॥

यो० । समीक्ष्य धृतः सः दण्डः सर्वाः प्रजाः सम्यक् रंजयति — असमीक्ष्य प्रणीतः तु सर्वतः विनाशयति ॥

भा० । ता० । शास्त्र के अनुसार भलीप्रकार दियाहुआ वह दण्ड सम्पूर्ण प्रजा को अनुरक्त (राजासे प्रसन्न) करता है और विनाविचारे तो दिया वह दण्ड सबको नष्ट करताहै अर्थात् स्त्री पुत्र समेत विनष्ट करदेताहै १९ ॥

यदिनप्रणयेद्राजादण्डंदण्ड्येष्वतन्द्रितः।शूलेमत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः२०

प० । यदि न प्रणयेत् राजा दण्डं दंड्येषु अतंद्रितः शूले मत्स्यान् इव अपक्ष्यन् दुर्बलान् बलवत्तराः ॥

यो० । यदि अनलसः राजा दण्ड्येषु दण्डम् प्रणयेत् — तर्हि बलवत्तराः मनुष्याः दुर्बलान् शूले मत्स्यान् इव अपक्ष्यन् — (पचेयुः) ॥

भा० । ता० । आलस्यको त्यागकर दण्ड देनेके योग्योंको दण्ड नदे तो बलवान् मनुष्य दुर्बल मनुष्यों को इसप्रकार पकाले जैसे शूलपर मत्स्यों को पकाते हैं अर्थात् बलवान् दुर्बलों की हिंसा करडालें २० ॥

अद्यात्काकःपुरोडाशंश्वाचलिह्याद्धविस्तथा ।
स्वाम्यंचनस्यात्कस्मिंश्चित्प्रवर्त्तेताधरोत्तरम् २१ ॥

प० । अद्यात् काकः पुरोडाशं श्वा च लिह्यात् हविः तथा स्वाम्यं च न स्यात् कस्मिंश्चित् प्रवर्त्तेत अधरोत्तरम् ॥

यो० । यदि राजा दण्डम् आचरिष्यत् तदा काकः पुरोडाशं अद्यात् चपुनः तथा श्वा हविः लिह्यात् — कस्मिंश्चित् स्वाम्यं च न स्यात् अधरोत्तरं (अपि) प्रवर्त्तेत ॥

भा० । ता० । जो राजा दण्ड को नदे तो यज्ञों के विषे सर्वथा हविके अयोग्य काकभी पुरोडाश को भक्षण करले और कुत्ता हविः को चाटले—और किसी वस्तु में किसीका भी स्वाम्य नहो क्योंकि उससे बलवान् उसपसे ग्रहण करले—और चारों वर्णोंमें छोटा जो शूद्रहै वह भी प्रधान ब्राह्मण के समान वर्त्ताव करनेलगे २१ ॥

सर्वोदण्डजितोलोकोदुर्लभोहिशुचिर्नरः । दण्डस्यहिभयात्सर्वंजगद्भोगायकल्पते २२॥

प० । सर्वः दण्डजितः लोकः दुर्लभः हि शुचिः नरः दण्डस्य हि भयात् सर्वं जगत् भोगाय कल्पते ॥

यो० । सर्वः लोकः दण्डजितः भवति — शुचिः नरः दुर्लभः अस्ति — हि (यतः) दण्डस्य भयात् सर्वजगत् भोगाय कल्पते (समर्थो भवति) ॥

भा० । ता० । दण्डसे ही नियम से रहना हुआ सम्पूर्ण जगत् सन्मार्ग में टिकता है क्योंकि स्वभाव से शुद्ध मनुष्य तो दुर्लभ है और दण्डके ही भयसे सम्पूर्ण जगत् आवश्यक भोजन आदिके भोग करने को समर्थ होताहै २२ ॥

देवदानवगन्धर्वारक्षांसिपतगोरगाः । तेऽपिभोगायकल्पन्तेदण्डेनैवनिपीडिताः २३ ॥

प० । देवदानवगन्धर्वाः रक्षांसि पतगोरगाः ते अपि भोगाय कल्पंते दण्डेन एव निपीडिताः ॥

यो० । देवदानवगन्धर्वाः रक्षांसि—पतगोरगाः (ये सन्ति) ते अपि दण्डे (एव निपीडिताः सन्तः भोगाय कल्पन्ते (समर्थाः भवंति) ॥

भा० । देवता—दानव—गन्धर्व—राक्षस—पक्षी—सर्प—भी दण्डकेही भयसे भोगकरनेको समर्थ होतेहैं—अर्थात् वर्षादान आदि के उपकार से भोगके सम्पादकहोते हैं ॥

ता० । पहिले दण्डको भोगका सम्पादक कह भी आयेहैं तोभी दृढ़ताके लिये पुनः कहते हैं—कि इन्द्र सूर्य वायु आदि देवता—दानव—गन्धर्व—राक्षस—पक्षी सर्प जो हैं वेभी जगदीश्वर के दण्ड से पीडित हुये ही भोगकरने को समर्थ होतेहैं क्योंकि इस[1] श्रुति से यह प्रतीत होताहै कि इस ईश्वरके भय से अग्नि सूर्य तपते हैं-इन्द्र वायु—और मृत्यु येभी इसीके भयसे दौड़ते हैं अर्थात् ईश्वरकी आज्ञा को करतेहैं २३ ॥

दुष्येयुःसर्ववर्णाश्चभिद्येरन्सर्वसेतवः । सर्वलोकप्रकोपश्चभवेद्दण्डस्यविभ्रमात् २४ ॥

प० । दुष्येयुः सर्ववर्णाः च भिद्येरन् सर्वसेतवः सर्वलोकप्रकोपः च भवेत् दंडस्य विभ्रमात् ॥

यो० । दंडस्य विभ्रमात (अकरणात) सर्ववर्णाः दुष्ययुः — सर्वसेतवः भिद्येरन — सर्वलोकप्रकोपश्च भवेत् ॥

भा० । ता० । दंडके न देनेसे संपूर्ण वर्ण दूषितहोजायँ अर्थात् परस्पर की स्त्रियोंके गमनसे वर्णसंकर होजायँ—और शास्त्रकी सब मर्यादा अर्थात् धर्म अर्थ काम मोक्षके फल नष्टहोजायँ—और संपूर्ण जगत्का कोप होजाय अर्थात् चोरी और साहस आदिके होनेसे सब जगत्में क्षोभ होजाय २४ ॥

यत्रश्यामोलोहिताक्षोदण्डश्चरतिपापहा । प्रजास्तत्रनमुह्यंतिनेताचेत्साधुपश्यति २५ ॥

प० । यत्र श्यामः लोहिताक्षः दंडः चरति पापहा प्रजाः तत्र न मुह्यंति नेता चेत् साधु पश्यति ॥

यो० । श्यामः लोहिताक्षः पापहा दंडः यत्र चरति — तत्र प्रजाः न मुह्यंति — चेत् (यदि) नेता (दंडदाता) साधु पश्यति — दंयादंय दंडस्य सम्यक जानाति ॥

---

१ भयादस्याग्निस्तपति भयात्तपतिसूर्यः भयादिंद्रश्च वायुश्च मृत्युर्धावतिपंचमः ॥

भा० । ता० । जिस देशमें शास्त्रद्वारा ज्ञान–श्यामरूप और रक्त नेत्र और पापका नाशक–दंडविचरताहै अर्थात् शास्त्रके अनुकूल दंड दियाजाताहै वहां प्रजा व्याकुल नहींहोती यदि दंड देनेवाला भलीप्रकार दंडकेदेने को जानताहो २५ ॥

तस्याहुःसंप्रणेतारंराजानंसत्यवादिनम् । समीक्ष्यकारिणंप्राज्ञंधर्मकामार्थकोविदम् २६॥

प० । तस्य आहुः संप्रणेतारं राजानं सत्यवादिनम् समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम् ॥

यो० । तस्य संप्रणेतारं सत्यवादिनं – समीक्ष्यकारिणं – प्राज्ञं – धर्मकामार्थकोविदं राजानं – बुधाः आहुः ॥

भा० । ता० । उसदंडके देनेवाला सत्यवादी–शास्त्रोक्तकरनेवाला–और प्राज्ञ अर्थात् तत्त्व अतत्त्वका ज्ञाता–और धर्म अर्थ काममें पंडित–जो राजा अर्थात् राजसिंहासनपर स्थितपुरुष वही कहाहै अर्थात् उक्तदंडको दे २६ ॥

तंराजाप्रणयन्सम्यक्त्रिवर्गेणाभिवर्द्धते । कामात्माविषमःक्षुद्रोदण्डेनैवनिहन्यते २७॥

प० । तं राजा प्रणयन् सम्यक् त्रिवर्गेण अभिवर्द्धते कामात्मा विषमः क्षुद्रः दंडेन एव निहन्यते ॥

यो० । तं दंडं राजा सम्यक् प्रणयन् सन् त्रिवर्गेण अभिवर्द्धते – कामात्मा – विषमः क्षुद्रः राजा दंडेन एव निहन्यते ॥

भा० । ता० । उस दंड यथोचित देतेहुये राजा के धर्म अर्थ काम वृद्धिको प्राप्तहोते हैं–और जो राजा कामीहै और जो विषम (अनुचित) दंडकोदेता है वहराजा उसीदंडसे माराजाता है अर्थात् प्रत्युत वही अपने अत्याचारसे मृत्युको प्राप्तहोताहै २७ ॥

दण्डोहिसुमहत्तेजोदुर्द्धरश्चाकृतात्मभिः । धर्माद्विचलितंहन्तिनृपमेवसबान्धवम् २८॥

प० । दंडः हि सुमहत् तेजः दुर्द्धरः च अकृतात्मभिः धर्मात् विचलितं हंति नृपं एव सबान्धवम् ॥

यो० । हि (यतः) सुमहत्तेजः चपुनः अकृतात्मभिः दुर्द्धरः दंडः धर्मात् विचलितं सबांधवं नृपं एव हंति ॥

भा० । ता० । अत्यंत महान् तेज वाला और शास्त्रके ज्ञानसे जो हीनहैं उनको दुर्द्धर–दंड धर्मसे चलायमान राजाको बंधुओं सहित नष्ट करदेताहै २८ ॥

ततोदुर्गंचराष्ट्रंचलोकंचसचराचरम् । अंतरिक्षगतांश्चैवमुनीन्देवांश्चपीडयेत् २९ ॥

प० । ततः दुर्गं च राष्ट्रं च लोकं च सचराचरम् अंतरिक्षगतान् च एव मुनीन् देवान् च पीडयेत् ॥

यो० । ततः अनंतरं दुर्गं – राष्ट्रं (देशं) चराचरं लोकं चपुनः अंतरिक्षगतान् मुनीन् चपुनः देवान् दंडः पीडयेत् ॥

भा० । ता० । पूर्वोक्त राजाके नष्ट करनेके अनंतर वह दंड–दुर्ग (किला)–देश और चराचर जगत् और अंतरिक्षमें रहनेवाले मुनि–और देवता इनको नष्ट करदेताहै क्योंकि देवता और

मुनि ये सब इस श्रुतिके अनुसार यज्ञकी हवि से जीतेहैं इससे दंड न होय तो यज्ञोंके नष्टहोनेसे हविके न मिलनेपर देवता और मुनि स्वयमेव नष्टहोजायँ २९ ॥

सोऽसहायेनमूढेनलुब्धेनाकृतबुद्धिना । नशक्योन्यायतोनेतुंसक्तेनविषयेषुच ३० ॥

प० । सः असहायेन मूढेन लुब्धेन अकृतबुद्धिना न शक्यः न्यायतः नेतुं सक्तेन विषयेषु च ॥

यो० । असहायेन — मूढेन — लुब्धेन — अकृतबुद्धिना — विषयेषु सक्तेन च राज्ञा सः दण्डः न्यायतः नेतुं न शक्यः ॥

भा० । ता० । मंत्रि–सेनापति पुरोहित आदिसे रहित और मूर्ख–लोभी और शास्त्रसे संस्कृत बुद्धिसे हीन–और विषयोंमें आसक्त–जो राजा वह उस दंडको नहीं देसक्ताहै ३० ॥

शुचिनासत्यसंधेनयथाशास्त्रानुसारिणा । प्रणेतुंशक्यतेदण्डःसुसहायेनधीमता ३१ ॥

प० । शुचिना सत्यसंधेन यथाशास्त्रानुसारिणा प्रणेतुं शक्यते दंडः सुसहायेन धीमता ॥

यो० । शुचिना — सत्यसंधेन — यथाशास्त्रानुसारिणा — सुसहायेन — धीमता — राज्ञा दंडः प्रणेतुं शक्यते — नान्येन ॥

भा० । ता० । धन और देह आदिमें शुद्ध–और सत्यप्रतिज्ञ–शास्त्रके अनुसार जो वर्त्ते–अच्छे२ जिसके मंत्रि आदि सहायहों और जो धीमान् (तत्त्वका ज्ञाता) हो वह राजा दंडको देसक्ताहै इतर नहीं ३१ ॥

स्वराष्ट्रेन्यायवृत्तःस्याद्भृशदण्डश्चशत्रुषु।सुहृत्स्वजिह्मःस्निग्धेषुब्राह्मणेषुक्षमान्वितः ३२

प० । स्वराष्ट्रे न्यायवृत्तः स्यात् भृशदंडः च शत्रुषु सुहृत्सु अजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ॥

यो० । राजा — स्वराष्ट्रे न्यायवृत्तः — शत्रुषु च भृशदंडः — स्निग्धेषु सुहृत्सु अजिह्मः — ब्राह्मणेषु क्षमान्वितः — स्यात् ॥

भा० । ता० । राजा अपने देशमें शास्त्रोक्त रीतिके अनुसार व्यवहार करै (वर्त्ते)–और शत्रुओंको तीक्ष्ण दंडदे–और स्वभावसे प्रीतिवाले मित्रोंमें अकुटिल–और ब्राह्मणोंमें क्षमाशील–रहे ३२ ॥

एवंवृत्तस्यनृपतेःशिलोञ्छेनापिजीवतः।विस्तीर्यतेयशोलोकेतैलबिन्दुरिवाम्भसि ३३॥

प० । एवंवृत्तस्य नृपतेः शिलोञ्छेन अपि जीवतः विस्तीर्यते यशः लोके तैलबिन्दुः इव अंभसि ॥

यो० । एवंवृत्तस्य — शिलोञ्छेनापिजीवतः नृपतेः (राज्ञः) यशः — अंभसि तैलबिन्दुः इव लोके विस्तीर्यते (विस्तारं गच्छति) ॥

भा० । ता० । इस प्रकार वर्त्ताव करनेवाले–और शिलोञ्छवृत्ति (हूंछना) से भी जीवतेहुये (कोशसे हीन) राजाका यश लोकमें इस प्रकार विस्तारको प्राप्तहोताहै जैसे जलमें तेलकी बूंद फैलजातीहै–अर्थात् जगत्में कीर्त्तिहोतीहै ३३ ॥

अतस्तुविपरीतस्यनृपतेरजितात्मनः । संक्षिप्यतेयशोलोकेघृतबिन्दुरिवाम्भसि ३४ ॥

प० । अतः तु विपरीतस्य नृपतेः अजितात्मनः संक्षिप्यते यशः लोके घृतबिन्दुः इव अंभसि ॥

---

१ हविःप्रदानजीवनादेवाः ॥

यो० । अतः विपरीतस्य – अजितात्मनः नृपतेः यशः – लोके अम्भसि घृतबिन्दुः इव संक्षिप्यते – संकोचंगच्छति ॥

भा० । ता० । इससे विपरीत आचरण करनेवाले–और जिसने इंद्रियोंको न जीताहो ऐसे राजाका यश जगत्में इस प्रकार संकोचको प्राप्त होताहै जैसे जलमें घीकी बूंद ३४ ॥

स्वेस्वेधर्मेनिविष्टानांसर्वेषामनुपूर्वशः । वर्णानामाश्रमाणांचराजासृष्टोऽभिरक्षिता ३५॥

प० । स्वे स्वे धर्मे निविष्टानां सर्वेषां अनुपूर्वशः वर्णानां आश्रमाणां च राजा सृष्टः अभिरक्षिता ॥

यो० । अनुपूर्वशः स्वे स्वे धर्मे निविष्टानां सर्वेषां वर्णानां चपुनः आश्रमाणां अभिरक्षिता राजा ब्रह्मणा सृष्टः (रचितः) ॥

भा० । ता० । क्रमसे अपने२ धर्ममें टिकेहुये संपूर्ण ब्राह्मण आदि वर्ण और ब्रह्मचर्य आदि आश्रमोंका सब प्रकारसे रक्षाकरनेवाला राजाही ब्रह्माने रचाहै अर्थात् धर्मनिष्ठोंकी रक्षाके न करनेपर राजाको पापहोताहै और अपनेधर्मसे हीनोंकी रक्षा न करे तो कुछ पाप नहींहोता ३५ ॥

तेनयद्यत्सभृत्येनकर्त्तव्यंरक्षताप्रजाः । तत्तद्वोऽहंप्रवक्ष्यामियथावदनुपूर्वशः ३६ ॥

प० । तेन यत् यत् सभृत्येन कर्त्तव्यं रक्षता प्रजाः तत् तत् वः अहं प्रवक्ष्यामि यथावत् अनुपूर्वशः ॥

यो० । सभृत्येन – प्रजाः रक्षता तेन राज्ञा यत् यत् कर्त्तव्यं – तत् तत् वः (युष्माकं) यथावत् अनुपूर्वशः अहं प्रवक्ष्यामि (कथयिष्यामि) ॥

भा० । ता० । भृत्यों सहित और प्रजाकी रक्षा करनेवाले उस राजाको जो २ करने योग्य है वह२ सब तुमको मैं कहूं क्रमसे यथार्थ रीतिपर कहूंगा ३६ ॥

ब्राह्मणान्पर्युपासीतप्रातरुत्थायपार्थिवः । त्रैविद्यवृद्धान्विदुषस्तिष्ठेत्तेषांचशासने ३७॥

प० । ब्राह्मणान् पर्युपासीत प्रातः उत्थाय पार्थिवः त्रैविद्यवृद्धान् विदुषः तिष्ठेत् तेषां च शासने ॥

यो० । पार्थिवः प्रातः उत्थाय त्रैविद्यवृद्धान् ब्राह्मणान् पर्युपासीत चपुनः तेषां शासने (आज्ञायां) तिष्ठेत् ॥

भा० । ता० । राजा प्रतिदिन प्रातःकालके समय उठकर–वेदत्रयी (ऋक्यजुःसामवेद) और नीति शास्त्रके जाननेवाले ब्राह्मणोंकी सेवाकरै और उन ब्राह्मणोंकी आज्ञामेंही टिके ३७॥

वृद्धांश्चनित्यंसेवेतविप्रान्वेदविदःशुचीन् । वृद्धसेवीहिसततंरक्षोभिरपिपूज्यते ३८ ॥

प० । वृद्धान् च नित्यं सेवेत विप्रान् वेदविदः शुचीन् वृद्धसेवी हि सततं रक्षोभिः अपि पूज्यते ॥

यो० । वेदविदः शुचीन् – वृद्धान् विप्रान् नित्यं सेवेत – हि (यतः) सततं वृद्धसेवी राजा रक्षोभिः अपि पूज्यते (पूजांलभते) ॥

भा० । ता० । वेदके जाननेवाले शुद्ध और वृद्ध ब्राह्मणोंकी प्रतिदिन सेवाकरै क्योंकि वृद्धोंकी सेवाकरनेवाले राजाकी राक्षस भी पूजा करतेहैं अर्थात् स्वभावसे क्रूर राक्षस भी जब उक्त राजाके हितको करेंगे तो मनुष्य क्यों न करेंगे ३८ ॥

तेभ्योऽधिगच्छेद्विनयंविनीतात्मापिनित्यशः ।
विनीतात्माहिनृपतिर्नविनश्यतिकर्हिचित् ३९ ॥

प० । तेभ्यः अधिगच्छेत् विनयं विनीतात्मा अपि नित्यशः विनीतात्मा हि नृपतिः न विनश्यति कर्हिचित् ॥

यो० । विनीतात्मा अपि राजा तेभ्यः (वृद्धविप्रेभ्यः)—नित्यं विनयं अधिगच्छेत् (अभ्यसेत्) हि (यतः) विनीतात्मा नृपतिः कर्हिचित् न विनश्यति ॥

भा० । ता० । स्वाभाविक बुद्धि और शास्त्रजन्य ज्ञानसे विनीत भी राजा विनयकी अधिकता के लिये उन वृद्धब्राह्मणों से प्रतिदिन विनय का अभ्यास करै—क्योंकि विनीतात्मा राजा कभी भी नाशको प्राप्त नहींहोता ३९ ॥

बहवोऽविनयान्नष्टाराजानःसपरिच्छदाः । वनस्थाअपिराज्यानिविनयात्प्रतिपेदिरे ४० ॥

प० । बहवः अविनयात् नष्टाः राजानः सपरिच्छदाः वनस्थाः अपि राज्यानि विनयात् प्रतिपेदिरे ॥

यो० । अविनयात् बहवः राजानः सपरिच्छदाः नष्टाः—वनस्थाः अपि विनयात् पुनः राज्यानि प्रतिपेदिरे (राज्यंप्राप्ताः) ॥

भा० । ता० । विनय से रहित बहुतसे राजा—हस्ति अश्व कोशआदि सामग्री सहित भी बहुतसे राजा अविनयसेही नष्टहोगये—और वनमें टिकेहुये (सामग्रीहीन) भी बहुतसे राजा विनयसेही राज्यको प्राप्तहुये ४० ॥

वेनोविनष्टोऽविनयान्नहुषश्चैवपार्थिवः । सुदासोयवनश्चैवसुमुखोनिमिरेवच ४१ ॥

प० । वेनः विनष्टः अविनयात् नहुषः च एव पार्थिवः सुदासः यवनः च एव सुमुखः निमिः एव च ॥

यो० । वेनः चपुनः नहुषः—सुदासः—चपुनः यवनः—सुमुखः चपुनः निमिः—पार्थिवः अविनयात् विनष्टः (नाशंगतः) ॥

भा० । ता० । राजा वेन—और नहुष और सुदास यवन और सुमुख और निमि—ये सब राजा अविनयसेही नाशको प्राप्तहुये—इससे राजा कभी भी अन्यायको न करै ४१ ॥

पृथुस्तुविनयाद्राज्यंप्राप्तवान्मनुरेवच । कुबेरश्चधनैश्वर्यंब्राह्मण्यंचैवगाधिजः ४२ ॥

प० । पृथुः तु विनयात् राज्यं प्राप्तवान् मनुः एव च कुबेरः च धनैश्वर्यं ब्राह्मण्यं च एव गाधिजः ॥

यो० । पृथुः चपुनः मनुः विनयात् राज्यं—चपुनः कुबेरः धनैश्वर्यं—चपुनः गाधिजः ब्राह्मण्यं—प्राप्तवान् ॥

भा० । पृथु और मनुराज्यको और कुबेरधनाधिपत्यको गाधीकापुत्र विश्वामित्र ब्राह्मणत्व को—विनय से प्राप्तहुये ॥

ता० । पृथु और मनुको विनयसे राज्यप्राप्तहुआ और कुबेर विनय से धनाधिपति हुये क्षत्री भी गाधी के पुत्र विश्वामित्र उसीदेह में विनयकी कृपा से ब्राह्मण होगये यद्यपि राज्यलाभ के

प्रकरण में ब्राह्मणत्व की प्राप्ती का प्रस्ताव न था तोभी विनयकी श्रेष्ठता के लिये यहांपर कही क्योंकि शास्त्रोक्तकर्म को करना शास्त्र निषिद्धको त्यागनारूप यह विनयऐसाहै जिससे क्षत्री भी दुर्लभ ब्राह्मणत्व को प्राप्तहोगये ४२ ॥

त्रैविद्येभ्यस्त्रयींविद्यांदण्डनीतिंचशाश्वतीम्।
आन्वीक्षिकींचात्मविद्यांवार्तारम्भांश्चलोकतः ४३ ॥

प० । त्रैविद्येभ्यः त्रयीं विद्यां दंडनीतिं चँ शाश्वतीं आन्वीक्षिकीं चँ आत्मविद्यां वार्त्तारंभान् चँ लोकतः ॥

यो० । त्रैविद्येभ्यः त्रयीं विद्यां चपुनः शाश्वतीं दंडनीतिं चपुनः आन्वीक्षिकीं — आत्मविद्यां अधिगच्छेत् — चपुनः वार्त्तारंभान् लोकतः अधिगच्छेत् ॥

भा० । त्रिवेदीके ज्ञाताओंसे तीनोंवेद और सनातन दंडनीति—और आन्वीक्षिकी (न्याय) और ब्रह्मविद्या—इनका अभ्यासकरे और खेती—वाणिज्य आदि वार्त्ता उसके आरंभोंको लोक से सीखे ॥

ता० । वेदत्रयी (ऋक्यजुस्साम) के ज्ञाताओंसे तीनों वेदोंकी विद्याओंको जाने अर्थात् वेदत्रयीके अर्थ ग्रंथोंका अभ्यास करता रहे यद्यपि ब्रह्मचर्य अवस्थाहीमें वेदका अभ्यास करना लिखाहै और समावृत्तको (गृहस्थ) तो राज्यका अधिकारहै इससे राज्यके समय त्रिवेदी का पठन असंगतहै—तथापि ब्रह्मचर्य अवस्थामें पढ़ीहुई त्रिवेदीके अभ्यासके लिये यह उपदेशहै—और अर्थ शास्त्ररूप और नित्य (परंपरागत) योग क्षेमका उपदेश करनेवाली दंडनीति को ज्ञाताओंसे जाने—और आन्वीक्षिकी (तर्कविद्या) और ब्रह्म (जिसकी दयासे प्रतापकी वृद्धिमें आनन्दकी और दुःखकी अवस्थामें विषादकी शांति होतीहै) को सीखे अर्थात् तिस तिस विद्याके ज्ञाताओंसे इनपूर्वोक्त विद्याओंका अभ्यास राजा सदैव करता रहे—और वार्त्ता (खेती—वाणिज्य—पशु पालनादि) और वार्त्ताके आरंभ (धन संचयके उपाय) इनको—इनके जाननेवाले किसान वैश्य—गोपाल आदिकों से जाने ४३ ॥

इन्द्रियाणांजयेयोगंसमातिष्ठेद्दिवानिशम्। जितेन्द्रियोहिशक्नोतिवशेस्थापयितुंप्रजाः ४४

प० । इंद्रियाणां जये योगं समातिष्ठेत् दिवानिशं जितेन्द्रियः हि शक्नोति वशे स्थापयितुं प्रजाः ॥

यो० । इंद्रियाणांजये दिवानिशं योगं समातिष्ठेत् — हि (यतः) जितेन्द्रियः प्रजाः वशे स्थापयितुं शक्नोति ॥

भा० । इंद्रियोंके जयमें रातिदिन यत्नकरै क्योंकि जितेंद्रिय राजाही प्रजाओंको वशमें करसकाहै ॥

ता० । इंद्रियोंके जय (विषयोंमें आसक्ति का निवारण) में सदैव काल यत्नकरै क्योंकि जो राजा जितेन्द्रियहै वही प्रजा नियमन (वशीकरण) करनेको समर्थ होताहै—और विषय भोगमें व्यग्र (आसक्त) है वह नहीं होता—यद्यपि पहिले ब्रह्मचारीके धर्मोंमें इंद्रियोंका जय कहि आयेहैं—और वह जय संपूर्ण पुरुषार्थोंमें ग्रहण करने योग्यहै—तथापि राजाके धर्मोंमें इंद्रियोंकी

जयकी मुख्यताके ज्ञानार्थ—और जो आगे कहेंगे उन राजाके व्यसनोंकी निवृत्तिका कारणहोनेसे यहांपर फिर इंद्रियोंके जयका वर्णन किया ४४ ॥

दशकामसमुत्थानितथाष्टौक्रोधजानिच । व्यसनानिदुरंतानिप्रयत्नेनविवर्जयेत् ४५ ॥

प० । दश कामसमुत्थानि तथा अष्टौ क्रोधजानि च व्यसनानि दुरंतानि प्रयत्नेन विवर्जयेत् ॥

यो० । कामसमुत्थानिदश — तथा क्रोधजानि च अष्टौ दुरंतानि व्यसनानि प्रयत्नेन राजा विवर्जयेत् ॥

भा० । कामसे उत्पन्न दश—और क्रोधसे उत्पन्न आठ दुरंतव्यसनोंको प्रयत्न करिके राजा वर्जिदे ॥

ता० । कामसे पैदाहुये दश—और क्रोध से पैदाहुये जो आठ दुरंत व्यसन (जो आगे कहेंगे) हैं—उनको यत्नसे राजा वर्जदेइ—क्योंकि ये व्यसन प्रथम सुखदेते हैं अंतमें दुःखदेते हैं और इनका अंत दुर्लभहै—और इनके दुःखसे व्यसन वाला मनुष्य निवृत्त नहीं होसका ४५ ॥

कामजेषुप्रसक्तोहिव्यसनेषुमहीपतिः । वियुज्यतेऽर्थधर्माभ्यांक्रोधजेष्वात्मनैवतु ४६ ॥

प० । कामजेषु प्रसक्तः हि व्यसनेषु महीपतिः वियुज्यते अर्थधर्माभ्यां क्रोधजेषु आत्मना एव तु ॥

यो० । हि (यतः) कामजेषु व्यसनेषु प्रसक्तः महीपतिः अर्थधर्माभ्यां क्रोधजेषु प्रसक्तस्तु आत्मना एव वियुज्यते ॥

भा० । ता० । कामसे पैदाहुये व्यसनोंमें आसक्त राजा धर्मार्थसे और क्रोधसे पैदाहुये व्यसनोंमें आसक्त राजा अपने देहसे वियुक्त होताहै (अर्थात् उस राजाके धर्म अर्थ और देह नाशको प्राप्तहोते हैं) ४६ ॥

मृगयाक्षादिवास्वप्नःपरिवादःस्त्रियोमदः । तौर्यत्रिकंवृथाटयाचकामजोदशकोगणः ४७

प० । मृगया अक्षाः दिवास्वप्नः परिवादः स्त्रियः मदः तौर्यत्रिकं वृथाट्या च कामजः दशकः गणः ॥

यो० । मृगया अक्षाः दिवास्वप्नः — परिवादः स्त्रियः मदः तौर्यत्रिकं (नृत्यगीतवादित्राणि) चपुनः वृथाट्या एषः दशकः गणः कामजो ज्ञेयः ॥

भा० । ता० । इन दशोंका गण (समूह) कामसे उत्पन्न जानना कि मृगया (मृगोंकावध) अक्षों (फांसे) की क्रीडा जो संपूर्ण कार्योंकी नष्टकरनेवाली होतीहै—दिनमें निद्रा—अन्यके दोषोंका कथन—स्त्रीका भोग—मदिरापीने से पैदाहुआ मद—नृत्य—गीत—बाजा—और वृथा भ्रमण ४७ ॥

पैशुन्यंसाहसंद्रोहईर्ष्यासूयार्थदूषणम् । वाग्दण्डजंचपारुष्यंक्रोधजोऽपिगणोष्टकः ४८ ॥

प० । पैशुन्यं साहसं द्रोहः ईर्ष्या असूया अर्थदूषणं वाग्दण्डजं च पारुष्यं क्रोधजः अपि गणः अष्टकः ॥

यो० । पैशुन्यं — साहसं — द्रोहः ईर्ष्या — असूया — अर्थदूषणं — चपुनः वाग्दण्डजंपारुष्यं (वाक्पारुष्यंदण्डपारुष्यं) क्रोधजोऽपि अष्टकः गणो ज्ञेयः ॥

भा० । पैशुन्य–साहस–द्रोह–ईर्ष्या–असूया–(धनकादूषण) और कठोरवाणी और कठोर दंड इन आठोंका समूह क्रोधसे उत्पन्न जानना ॥

ता० । पैशुन्य (अर्थात् अविज्ञात दोषोंको प्रकट करना) साहस (सज्जनकाभी बंधन आदिसे निग्रह करना (दंडदेना) द्रोह (छलसे बधकरना) ईर्ष्या (अन्य के गुणों को नहीं सहना) असूया–(अन्यके गुणोंमें दोषोंको प्रकटकरना) अर्थ दूषण (अन्यके धनको हरना वा देनेयोग्य धनको न देना) वाग्पारुष्य (गाली वा कठोरवचन कहना) दण्डपारुष्य (अनुचित दण्डदेना) यह आठप्रकार का गण क्रोधसे जानना ४८ ॥

द्वयोरप्येतयोर्मूलंयंसर्वेकवयोविदुः । तंयत्नेनजयेल्लोभंतज्जावेतावुभौगणौ ४९ ॥

प० । द्वयोः अपि एतयोः मूलं यं सर्वे कवयः विदुः तं यत्नेन जयेत् लोभं तज्जौ एतौ उभौ गणौ ॥

यो० । सर्वे कवयः एतयोः द्वयोः अपि यं मूलं विदुः तं लोभं यत्नेन जयेत् (कुतः) एतौ उभौ गणौ तज्जौभवतः ॥

भा० । ता० । इनदोनों गणोंका संपूर्ण कवि मूल (कारण) जानते हैं उस लोभको राजा यत्नसे जीते क्योंकि ये दोनोंसमूह (कामजःक्रोधजः) लोभसेही पैदाहोते हैं ४९ ॥

पानमक्षाःस्त्रियश्चैवमृगयाचयथाक्रमम् । एतत्कष्टतमंविद्याच्चतुष्कंकामजेगणे ५० ॥

प० । पानं अक्षाः स्त्रियः च एव मृगया च यथाक्रमं एतत् कष्टतमं विद्यात् चतुष्कं कामजे गणे ॥

यो० । पानं अक्षाः स्त्रियः चपुनः मृगया एतत् चतुष्कं कामजे गणे यथाक्रमं कष्टतमं (दुःखहेतुं) विद्यात् जानीयात्॥

भा० । ता० । कामसे उत्पन्न समूह में इनचारोंको क्रमसे अत्यंत दुःखदाई जानना कि मदिराका पान–अक्षोंकीक्रीडा–स्त्रीसंभोग–मृगया–क्योंकि बहुधा कामसे उत्पन्न दशों में ये चारही निंदित हैं ५० ॥

दण्डस्यपातनञ्चैववाक्पारुष्यार्थदूषणे । क्रोधजेऽपिगणेविद्यात्कष्टमेतत्त्रिकंसदा ५१ ॥

प० । दंडस्य पातनं च एव वाग्पारुष्यार्थदूषणे क्रोधजे अपि गणे विद्यात् कष्टं एतत् त्रिकं सदा ॥

यो० । दंडस्य पातनं चपुनः वाग्पारुष्यार्थदूषणे – क्रोधजेऽपिगणे एतत् त्रिकं सदा कष्टं विद्यात् (जानीयात्) ॥

भा० । ता० । दंडकादेना–गाली वा कठोरवचन कहना और अर्थदूषण इनतीनोंको और क्रोधसे पैदाहुये समूह से सदैव दुखदाईजाने ५१ ॥

सप्तकस्यास्यवर्गस्यसर्वत्रैवानुषङ्गिणः । पूर्वंपूर्वंगुरुतरंविद्याद्व्यसनमात्मवान् ५२ ॥

प० । सप्तकस्य अस्य वर्गस्य सर्वत्र एव अनुषंगिणः पूर्वं पूर्वं गुरुतरं विद्यात् व्यसनं आत्मवान् ॥

यो० । सर्वत्रएव अनुषंगिणः अस्य सप्तकस्य वर्गस्य मध्ये आत्मवान् पुरुषः पूर्वपूर्वव्यसनं गुरुतरं विद्यात् ॥

भा० । आत्मज्ञानी राजा सर्वत्र होनेवाले इनसातों व्यसनों के समूह में पहिले पहिले व्यसनको अत्यन्त दुखदाई जाने ५२ ॥

ता० । संपूर्ण राजमण्डल के विषे होनेवाले इस मदिरापान आदि और काम क्रोधसे पैदा हुये सातव्यसनों में पहिला पहिला जो व्यसन है पिछिले पिछिले व्यसनों से ज्ञानी राजाको अत्यन्त दुखदाई जानना क्योंकि द्यूतसे मदिरापान इसहेतु से दुखदाई होताहै कि मदिरापान से उन्मत्त मनुष्यकी संज्ञानष्ट होजाती है यथेष्ट चेष्टासे देह धनआदिका विरोध इत्यादि दोष होतेहैं—और द्यूतमें कदाचित् धनकी प्राप्ती भी होजातीहै—और स्त्रीके व्यसनसे द्यूत इस से दुष्ट है कि द्यूतमें नीतिशास्त्र में कहेहुये वैरकी उत्पत्तिआदि दोष और मूत्र पुरीषके वेगको रोकने से देहमें व्याधिकी उत्पत्ति और रूप दोषहोते हैं--और स्त्री व्यसन में तो संतानरूपी उत्पत्तिरूप गुणकाभी योगहै—मृगयाकी अपेक्षा स्त्री व्यसन इससे दुष्टहै कि स्त्रीका व्यसनी अपने कार्यको समयपर न करने से धर्मकीरक्षा नहीं करसक्ता—और मृगयामें देहके व्यायामसे आरोग्यका गुणभीहै—इसप्रकार कामसे पैदाहुये मद्य—पानआदि चारोंमें पहिले पहिलेको अत्यन्त दुखदाई समझना—और क्रोधसे पैदाहुये तीनोंमें भी कठोरवाणीसे कठोरदंड इस से दुष्टहै कि कठोरदंड से छेदन कियाहुवा प्राणीका देह फिरनहीं होसक्ता—और कठोरवाणी से कुपित मनुष्य दान मान आदिसे शांत करनेको शक्यहोताहै—और अर्थदूषण से कठोरवाणी इसलिये दुष्टहै कठोर वाणीसे विधेहुये मर्मकी कोई चिकित्सा नहीं क्योंकि इस वचनसे यह प्रतीत होता है वाणी से कियाहुवा मर्मकाघाव फिरनहीं भरता और अर्थदूषण तो अत्यन्त धनकेदेने से नष्टहोसक्ता है—इसप्रकार क्रोधसे पैदाहुये दंडपातन—आदि तीनों में भी अत्यन्त दुखदाई पहिले पहिले को राजा यत्नसे त्यागदे ५२ ॥

व्यसनस्यचमृत्योश्चव्यसनंकष्टमुच्यते । व्यसन्यधोऽधोव्रजतिस्वर्यात्यव्यसनीमृतः ५३

प० । व्यसनस्य चँ मृत्योः चँ व्यसनं कष्टं उच्यँते व्यसनी अधः अधः व्रजति स्वः याति अव्यसनी मृतः ॥

यो० । व्यसनस्य चपुनः मृत्योः (मध्ये) व्यसनं कष्टं उच्यते (कुतः) व्यसनीपुनः (नर) अधः अधः व्रजति — अव्यसनीत मृतःसन् स्वः (स्वर्ग) याति ॥

भा० । व्यसन और मृत्युके बीचमें व्यसन अत्यंत दुखदाई होताहै—क्योंकि व्यसनी नरकों में जाता है और व्यसन हीन राजा मरकर स्वर्गमें जाता है ॥

ता० । यद्यपि संज्ञा नाशआदि दुःखकाहेतु और शास्त्रोक्तकर्म के विरोधी होने से मृत्यु और व्यसन दोनों तुल्य हैं तथापि मृत्युकी अपेक्षा परलोक में भी नरक हेतु होने से व्यसन अत्यन्त दुखदाईहै—सोई कहते हैं व्यसनी मनुष्य मरकर बहुत से नरकों में जाता है—और व्यसनहीन मनुष्य शास्त्रोक्तकर्म के विरोधी व्यसन के अभाव से स्वर्गमें जाता है—इस श्लोकसे व्यसनों में राजाकी अत्यन्त आसक्तिका निषेधहै सर्वथा व्यसनोंका नहीं समझना ५३ ॥

मौलाञ्छास्त्रविदःशूराँल्लब्धलक्षान्कुलोद्गतान् ।
सचिवान्सप्तचाष्टौवाप्रकुर्वीतपरीक्षितान् ५४ ॥

प० । मौलान् शास्त्रविदः शूरान् लब्धलक्षान् कुलोद्गतान् सचिवान् सप्त चँ अष्टौ वाँ प्रकुर्वीतँ परीक्षितान् ॥

१ नसंरोहयति वाक्कृतं अर्थदूषणंतु प्रचुरतरार्थदानाच्छक्यसमाधानम् ॥

यो० । (राजा) मौलान् – शास्त्रविदः – शूरान् – लब्धलक्षान् – कुलोद्गतान् – परीक्षितान् – सप्त – वा अष्टौ सचिवान् – प्रकुर्वीत ॥

भा० । मौल–शास्त्रके ज्ञाता–पराक्रमी– लब्धलक्ष–अच्छे कुल से उत्पन्न और परीक्षित सात वा आठ मंत्रियोंको राजा नियत करे ॥

ता० । मौल अर्थात् पिता–और पितामह आदि क्रमसे जो राजा के सेवकहों–वे भी द्रोह आदि से कदाचित् विरोधी होसकेहैं इससे शास्त्रके जाननेवाले–शूरवीर और लब्धलक्ष–अर्थात् जिनका शस्त्र लक्ष्यसे अन्यत्र न लगे और विशुद्ध कुल से पैदाहुये और परीक्षित–(जिनकी परीक्षा करलीहो) इसप्रकार के सात वा आठ सचिवों (मंत्री) को राजा नियत करे ५४ ॥

अपियत्सुकरंकर्मतदप्येकेनदुष्करम् । विशेषतोऽसहायेनकिंतुराज्यंमहोदयम् ५५ ॥

प० । अपि यत् सुकरं कर्म तत् अपि एकेन दुष्करं विशेषतः असहायेन किं तु राज्यं महोदयम् ॥

यो० । सुकरं अपि यत् कर्म तत् अपि एकेन दुष्करं (भवति) यतः विशेषतः महोदयं राज्यं तत् किं असहायेन दुष्करं न (भवति) अपितुभवत्येव ॥

भा० । ता० । जो कर्म सुखसे कियाजाताहै वह भी एक मनुष्यको दुष्करहोताहै विशेष कर्म महान् है फल जिसका ऐसा राज्य असहाय राजा को दुष्कर क्यों नहीं होगा–अर्थात् अवश्य होगा इससे सहायता के लिये पूर्वोक्त मंत्रीको राजा नियत करे ५५ ॥

तैःसार्द्धंचिन्तयेन्नित्यंसामान्यंसंधिविग्रहम् । स्थानंसमुदयंगुप्तिंलब्धप्रशमनानिच ५६

प० । तैः सार्द्धं चिंतयेत् नित्यं सामान्यं संधिविग्रहं स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ॥

यो० । राजा तैः (सचिवैः) सार्द्धं सामान्यं संधिविग्रहं – स्थानं – समुदयं – गुप्तिं – चपुनः लब्धप्रशमनानि नित्यं चिंतयेत ॥

भा० । उन मंत्रियोंके संग सामान्य संधिविग्रह (मेल विरोध) दंड–कोश–पुर–राष्ट्र–अन्न और सुवर्ण की उत्पत्ति का स्थान अपनी और देशकी रक्षा मिलेहुये द्रव्यको सत्पात्रोंको देना इन सबकी राजा प्रतिदिन चिंताकरे अर्थात् मंत्रिसंमति से इनको करे ॥

ता० । राजा उन मंत्रियों के संग सामान्य (जोगोपनीय न होय) जो संधिविग्रह की और स्थान (दंड–कोश–पुर– राष्ट्र आदि चार) इन चारोंमें जिससे दंड दियाजाय वे हाथी–अश्व–रथ– पदाति–दंड कहातेहैं उनके पोषण रक्षा की–और कोश (खजाना) उसके आय और व्ययकी–पुरके रक्षा की– और राष्ट्र–(देश) वासी मनुष्य पशु आदि के योग क्षेम की समुदय (अन्न–और हिरण्य आदिकी उत्पत्ति का स्थान) की और गुप्ती अर्थात् अपने अपने देशकी रक्षा की अर्थात् परीक्षा कियेहुये अन्न आदि का भक्षण और परीक्षित स्त्रियोंका संग करे और देशको अपनेवशमें रक्खे और लब्धप्रशमन अर्थात् मिलेहुये धनको सत्पात्रोंकोदेना–क्योंकि आगे मनुजी कहेंगे कि राजा जीतकर देवताओंका पूजनकरे इन सबकी उन मंत्रियोंके संग राजा चिंता (विचार) करे ५६ ॥

तेषांस्वंस्वमभिप्रायमुपलभ्यपृथक्पृथक् । समस्तानांचकार्येषुविदध्याद्धितमात्मनः ५७

प० । तेषां स्वं स्वं अभिप्रायं उपलभ्य पृथक् पृथक् समस्तानां च कार्येषु विदध्यात् हितं आत्मनः ॥

यो० । कार्येषु तेषां स्वं स्वं अभिप्रायं पृथक् पृथक् चपुनः समस्तानां अभिप्रायं उपलभ्य आत्मनः हितं विदध्यात् (कुर्यात्) ॥

भा० । ता० । कार्योंमें उन सम्पूर्णों के पृथक् २ अभिप्रायको और उन सबके इकट्ठे अभिप्रायको जानकर—जिसमें अपनाहितहो उसकाम को राजाकरै ५७ ॥

सर्वेषांतुविशिष्टेनब्राह्मणेनविपश्चिता। मन्त्रयेत्परमंमन्त्रंराजाषाड्गुण्यसंयुतम् ५८ ॥

प० । सर्वेषां तुं विशिष्टेनं ब्राह्मणेनं विपश्चितां मंत्रयेत् परमं मंत्रं राजा षाड्गुण्यसंयुतम् ॥

यो० । राजा सर्वेषां विशिष्टेन — विपश्चिता ब्राह्मणेन — सह षाड्गुण्यसंयुतं परमं मंत्रं मंत्रयेत् ॥

भा० । ता० । उन सबके मध्य में जो विशिष्ट (धार्मिक) है और पंडित ब्राह्मण है उसके संगसन्धि विग्रहआदि छः गुणोंसहित मंत्रको संमतकरै अर्थात् उसीकी संमतिसे करै ५८ ॥

नित्यंतस्मिन्समाश्वस्तःसर्वकार्याणिनिःक्षिपेत् ।
तेनसार्द्धंविनिश्चित्यततःकर्मसमारभेत ५९ ॥

प० । नित्यं तस्मिन् समाश्वस्तः सर्वकार्याणि निःक्षिपेत् तेनं सार्द्धं विनिश्चित्य ततः कर्म समारभेत् ॥

यो० । समाश्वस्तः राजा कार्याणि तस्मिन् नित्यं निःक्षिपेत् — तेन सार्द्धं कार्यं विनिश्चित्य अतः कर्म समारभेत् (कर्मारम्भं कुर्यात्) ॥

भा० । ता० । सदैवकाल उसके विषे विश्वासको प्राप्तहुआ राजा उसी विशिष्ट ब्राह्मण के आधीन समस्त कार्योंको करदे—और उसीकेसंग निश्चयकरके सम्पूर्ण कार्योंका प्रारंभकरै ५९॥

अन्यानपिप्रकुर्वीतशुचीन्प्राज्ञानवस्थितान् ।
सम्यगर्थसमाहर्तॄनमात्यान्सुपरीक्षितान् ६० ॥

प० । अन्यान् अपि प्रकुर्वीत शुचीन् प्राज्ञान् अवस्थितान् सम्यगर्थसमाहर्तॄन् अमात्यान् सुपरीक्षितान् ॥

यो० । अन्यान् अपि शुचीन् — प्राज्ञान् — अवस्थितान् — सम्यगर्थसमाहर्तॄन् — सुपरीक्षितान् — अमात्यान् राजा प्रकुर्वीत ॥

भा० । ता० । शुद्ध और प्राज्ञ (पंडित) और अवस्थित (स्वस्थचित्त) भलीप्रकार धन के पैदाकरनेवाले और भलीप्रकार परीक्षा किये—अन्यभी मंत्रियों को राजा नियुक्तकरै ६० ॥

निर्वर्त्तेतास्ययावद्भिरितिकर्तव्यतानृभिः ।
तावतोऽतन्द्रितान्दक्षान्प्रकुर्वीतविचक्षणान् ६१ ॥

प० । निवर्त्तेत अस्य यावद्भिः इतिकर्तव्यता नृभिः तावतः अतंद्रितान् दक्षान् प्रकुर्वीत विचक्षणान् ॥

यो० । अस्य (राज्ञः) यावद्भिः नृभिः इतिकर्तव्यता निवर्त्तेत (कार्य्यनिर्वाहोभवेत्) — अतंद्रितान् दक्षान् विचक्षणान् — तावतः (मन्त्रिणः) प्रकुर्वीत ॥

भा० । ता० । जितने मनुष्यों से इस राजाकी इति कर्तव्यता सिद्धहो अर्थात् कार्यबने उतनेही आलस्य से रहित—पंडित और चतुर मंत्रियोंको नियुक्तकरे ६१ ॥

तेषामर्थेनियुञ्जीतशूरान्दक्षान्कुलोद्गतान् । शुचीनाकरकर्मान्तेभीरूनन्तर्निवेशने ६२

प० । तेषां अर्थे नियुंजीत शूरान् दक्षान् कुलोद्गतान् शुचीन् आकरकर्मान्ते भीरून् अन्तर्निवेशने ॥

यो० । तेषां सचिवानांमध्ये — शूरान् — दक्षान् — कुलोद्गतान् शुचीन् आकरकर्मान्ते अर्थे नियुंजीत — भीरून् अन्तर्निवेशने नियुंजीत ॥

भा० । उन मंत्रियोंमेंसे शूरवीर—चतुर—कुलीन—और शुद्ध मनुष्योंको तो धन संचयके लिये आकरकर्मांत (खान ईख अन्नकी पैदाजहांहो) में और भीरुओंको अन्तःपुरमें नियतकरे ॥

ता० । उन मंत्रियोंमें जो शूर (विक्रांत)—चतुर और उत्तमकुलमें उत्पन्न और शुद्ध अर्थात् धनकी इच्छासे शून्य—जोहैं उनको धनकी उत्पत्तिके स्थानमें नियुक्तकरै और वह धनकी उत्पत्तिका स्थानही—आकरकर्मांत—इसपदसे मनुजीने कहाहै अर्थात् आकर (सुवर्णआदिकी उत्पत्तिके स्थान) और कर्मांत (इक्षुअन्नआदि के संग्रहका स्थान) में नियतकरे—और जो उनमें भीरु (डरपोक) हैं उनको अन्तर्निवेशन (भोजन—शयन—गृहकाअन्तःपुर) में नियुक्त करे—क्योंकि अन्तःपुर में यदि शूरवीर नियुक्त कियेजायँ तो कदाचित् शत्रु के उपजाप (भेद) से वे शूर स्त्री सहित एकाकी राजाको हनदेतेहैं ६२ ॥

दूतंचैवप्रकुर्वीतसर्वशास्त्रविशारदम् । इङ्गिताकारचेष्टज्ञंशुचिंदक्षंकुलोद्गतम् ६३ ॥

प० । दूतं च एव प्रकुर्वीत सर्वशास्त्रविशारदं इंगिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥

यो० । सर्वशास्त्रविशारदं — इंगिताकारचेष्टज्ञं — शुचिं — दक्षं — कुलोद्गतं — दूतं च राजा प्रकुर्वीत ॥

भा० । सम्पूर्ण शास्त्रों में कुशल—इंगित आकार और चेष्टा का ज्ञाता—शुद्ध—चतुर—और कुलीन दूतकोभी राजा नियुक्तकरे ६३ ॥

ता० । और इसप्रकारके दूतको भी राजा नियुक्तकरे कि—जो इसलोक और परलोकके अर्थका संपादक शास्त्रहै उसको जानताहो—और जो इंगित (अपने अभिप्रायके सूचक वचन और स्वर) और आकार (मुखकी प्रसन्नता और उदासीनता जिससे प्रीति और अप्रीति प्रतीत हों) और चेष्टा (हस्तआदिका चलाना) इनतीनों (इंगित आकारचेष्टा) को जो जानताहो—और जो शुद्धहो अर्थात् अन्याय से धनग्रहण स्त्री व्यसन जिसमें न हों और जो चतुर और कुलोद्गत (अच्छेकुल से उत्पन्न) हो ६३ ॥

अनुरक्तःशुचिर्दक्षःस्मृतिमान्देशकालवित् ।
वपुष्मान्वीतभीर्वाग्मीदूतोराज्ञःप्रशस्यते ६४ ॥

प० । अनुरक्तः शुचिः दक्षः स्मृतिमान् देशकालवित् वपुष्मान् वीतभीः वाग्मी दूतः राज्ञः प्रशस्यते ॥

यो० । अनुरक्तः शुचिः दक्षः स्मृतिमान् – देशकालवित् – वपुष्मान् – वीतभीः – वाग्मी – एतादृशो दूतः राज्ञः प्रशस्यते – (उत्तमो भवति) ॥

भा० । प्रीतिवाला–शुद्ध–चतुर–स्मृतिवाला–देश कालका ज्ञाता–सुंदर–निडर–वाग्मी ऐसा दूत राजा का प्रशस्त होताहै अर्थात् ऐसे ही दूतको राजा नियुक्तकरै ॥

ता० । जनों में प्रीति वाला अर्थात् इतर राजाका भी शत्रु न हो–धन और स्त्रीकी शुद्धि से युक्त–अर्थात् धन और स्त्रीके लोभसे जिसका भेद न हो सके–और दक्ष (चतुर) अर्थात् जो कार्यके समय को न बितावे–स्मृतिमान (जो संदेश को न भूले)–देशकाल का ज्ञाता (अर्थात् जो देश काल को जानकर अन्य संदेश को भी देश कालके अनुसार अन्यथा कहदे)– और सुंदर रूप जिसका हो अर्थात् जिसके वचनको आकारके देखतेही सब मान लें–और जो विगतभय हो अर्थात् यदिकिसी को अप्रिय संदेशा भी भेजाजाय तो उसको भी कहदे–वाग्मी अर्थात् युक्तिपूर्वक वचनों का वक्ता–इस प्रकार का राजा का दूत अत्यंत श्रेष्ठ होताहै ६४ ॥

अमात्येदण्डआयत्तोदण्डेवैनयिकीक्रिया । नृपतौकोशराष्ट्रेचदूतेसंधिविपर्ययौ ६५ ॥

प० । अमात्ये दंडः आयत्तः दंडे वैनयिकी क्रिया नृपतौ कोशराष्ट्रे च दूते संधिविपर्ययौ ॥

यो० । दंडः अमात्ये आयत्तः – वैनयिकी क्रिया दंडे आयत्ता – चपुनः कोशराष्ट्रे नृपतौ आयत्ते – संधिविपर्ययौ दूते आयत्तौ – सर्वत्र अस्ति – स्तः इत्यादुचितक्रिया योज्या ॥

भा० । दंड सेनापतिके आधीन विनय दंडके आधीन कोश और देश राजाके आधीन संधि और विग्रह दूत के आधीन–होतेहैं ॥

ता० । अमात्य (सेनापति)के हाथी अश्व–रथ–पदाति–रूपदंड आधीन हैं क्योंकि उसीकी इच्छासे वे अपने अपने कार्यों में प्रवृत्तहोतेहैं–और वैनयिकी क्रिया अर्थात् विनय दंडके आधीनहै–कोश और देश राजाके आधीन होतेहैं अर्थात् राजा इनको कभी पराधीन न करे अर्थात् इनकी चिंता स्वयमेवकरे और संधि विग्रह दूतके आधीन होते हैं–अर्थात् दूतकी ही संमति से राजासंधिविग्रहमें प्रवृत्त होय ६५ ॥

दूतएवहिसंधत्तेभिनत्त्येवचसंहतान् । दूतस्तत्कुरुतेकर्मभिद्यन्तेयेनवानवा ६६ ॥

प० । दूतः एव हि संधत्ते भिनत्ति एव च संहतान् दूतः तत् कुरुते कर्म भिद्यंते येन वा न वा ॥

यो० । हि (यतः) दूतः एव भिन्नान् संधत्ते चपुनः संहतान् भिनत्ति दूतः तत् कर्म कुरुते येन (कर्मणा) भिद्यन्ते वा न भिद्यंते ॥

भा० । ता० । दूतही भिन्नों (फंटेहुये) की संधिके संपादनमें समर्थहोता है और मिलेहुयों का भेदन भी दूतही करसक्ताहै और परदेशमें जाकर दूत उसकर्मको करता है जिससे मिलेहुये दोमनुष्य फंटजायँ वा न फंटें–इससे संधि और विग्रह दूतकेही आधीन है यह जो कहा सो ठीकहै ६६ ॥

सविद्यादस्यकृत्येषुनिगूढेङ्गितचेष्टितैः । आकारमिङ्गितंचेष्टांभृत्येषुचचिकीर्षितम् ६७॥

प० । सः विद्यात् अस्य कृत्येषु निगूढेंद्रियचेष्टितैः आकारं इंगितं चेष्टां भृत्येषु च चिकीर्षितम् ॥

यो० । सः (दूतः) अस्य (प्रतिपक्षिणःराज्ञः) कृत्येषु — निगूढेंद्रियचेष्टितैः आकारं — इंगितं चेष्टां — चपुनः भृत्येषु चिकीर्षितं विद्यात (जानीयात) ॥

भा० । विपक्षी राजाके कृत्योंमें नियुक्त जो गुप्त दूतोंके आकार और चेष्टासे आकार इंगित चेष्टाओंको और सेवकोंमें राजाके कर्त्तव्यको वह दूतही पहचाने ॥

ता० । वह दूतही विपक्षी राजाके कामोंमें आकार–इंगित–और चेष्टाको–उसी राजाके जो निगूढ (गुप्तअनुचर) परिजन अर्थात् गुप्तकाम करने में नियुक्त सेवक–और वेभी यदि राजा केहीसमीपहोयँ तो उनके आकार और चेष्टामें जानले और उसी राजाके सेवक भृत्योंमें–क्षोभी लोभी–अपमान कियाहोय तो–उसराजाकी इच्छाको जाने अर्थात् इन क्षोभीआदि भृत्योंपर यह राजा ऐसा वर्ताव कियाकरताहै ६७ ॥

बुध्वाचसर्वंतत्त्वेनपरराजचिकीर्षितम् । तथाप्रयत्नमातिष्ठेद्यथात्मानंनपीडयेत् ६८ ॥

प० । बुध्वा च सर्वं तत्त्वेन परराजचिकीर्षितम् तथा प्रयत्नं आतिष्ठेत् यथा आत्मानं न पीडयेत् ॥

यो० । परराजचिकीर्षितं सर्वं तत्त्वेन बुध्वा — यथा आत्मानं न पीडयेत् तथा प्रयत्नं आतिष्ठेत् (कुर्यात) ॥

भा० । ता० । पूर्वोक्त दूतकेद्वारा विपक्षी राजाके करनेको इष्टकामको जानकर ऐसा प्रयत्न करै जैसे अपने आत्माको पीडा (दुःख) न हो ६८ ॥

जाङ्गलंसस्यसंपन्नमार्यप्रायमनाविलम् । रम्यमानतसामन्तंस्वाजीव्यंदेशमावसेत् ६९

प० । जांगलं सस्यसंपन्नं आर्यप्रायं अनाविलं रम्यं आनतसामंतं स्वाजीव्यं देशं आवसेत् ॥

यो० । जांगलं — सस्यसंपन्नं — आर्यप्रायं — अनाविलं — रम्यं — आनतसामन्तं — स्वाजीव्यं — देशं राजा आवसेत् (एतादृशेदेशेवासंकुर्यात) ॥

भा० । जांगल–सस्यसे संयुक्त–सज्जनोंसेपूर्ण–दुःखसेरहित–रमणीक–और जिसकेवासी राजासे नवतेहों और जिसमें अच्छी जीविकाहो ऐसेदेशमें राजा अपना वासकरै ॥

ता० । जिसमें जल और तृण अल्पहों और पवन और आतप अधिकहों–और अन्नआदि जिसमें बहुतहों उसदेशको जांगल इस[1] वचनके अनुसार कहते हैं–जो देश जांगलहो–सस्यसे संपन्न (भरा) हो–और जिसमें धार्मिकजन रहतेहों–रोग और व्याधिसे जो व्याकुल न हो और फल पुष्प तरु लताआदि से जो मनोहरहो–और जिसके सामन्त (आसपासकेवासी) राजाको नवतेहों और जिसमें कृषि वाणिज्यआदिका जीवन सुलभहो–ऐसेदेशमें राजा अपने वसनेका स्थान बनाकर वसै ६९ ॥

धनुर्दुर्गंमहीदुर्गमब्दुर्गंवार्क्षमेववा । नृदुर्गंगिरिदुर्गंवासमाश्रित्यवसेत्पुरम् ७० ॥

प० । धनुर्दुर्गं महीदुर्गं अब्दुर्गं वार्क्षं एव वा नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम् ॥

यो० । धनुर्दुर्गं — महीदुर्गं — अब्दुर्गं — वा वार्क्षं दुर्गं — नृदुर्गं — वा गिरिदुर्गं समाश्रित्य — राजा पुरं वसेत् ॥

---

१ अल्पोदकतृणोयस्तु प्रवातः प्रचुरातपः सज्ञेयोजांगलोदेशो बहुधान्यादिसंयुतः ॥

भा० । धनुषोंकादुर्ग (किला) महीदुर्ग—जलकादुर्ग—वृक्षोंकादुर्ग—मनुष्योंकादुर्ग—पर्वतोंका दुर्ग बनाकर—राजा पुरमें वासकरे ॥

ता० । धनुषोंकादुर्ग जिसमेंहो अर्थात् पांच योजनतक धनुषोंसेयुक्त—और महीदुर्ग जिसमें हो अर्थात् पत्थर वा ईंटों से छःहाथचौड़ी और बारहहाथ ऊंची ऐसीभीति जिसमेंहो जिसके ऊपर युद्ध करनेवाले योद्धा फिरनेके और शस्त्रोंके चलानेके जिसमें झरोखेहों ऐसेप्राकार (परकोटा) से वेष्टित जोहो—और जिसमें जलकादुर्गहो अर्थात् जिसकी चारोंओर अगाध जलभरा हो—और जिसमें वृक्षोंकादुर्गहो अर्थात् जिसके बाहर योजन पर्यंत बड़े २ कांटोंके वृक्ष गुल्म लताआदि भरेहों—और जिसमें नृदुर्गहो अर्थात् जिसकी चारोंदिशाओंमें हाथी अश्व रथआदि से संयुक्त और पदातिआदि मनुष्य भरेहों—और जिसमें गिरिदुर्गहो अर्थात् जिसकी पीठपर कोई न चढ़सके और जिसका संकुचित और गुप्त एकही द्वारहो—और जिसके भीतर नदीका प्रवाहहो और जिसमें खेत और वृक्षहों—इनदुर्गोंमें से किसी एक वा दो तीन प्रकार के दुर्गको बनाकर अपनावास किसी पुरमें करे ७० ॥

सर्वेणतुप्रयत्नेनगिरिदुर्गंसमाश्रयेत । एषांहिबहुगुण्येनगिरिदुर्गंविशिष्यते ७१ ॥

प० । सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् एषां हि बहुगुण्येन गिरिदुर्गं विशिष्यते

यो० । तुपुनः एषां (दुर्गाणां) मध्ये गिरिदुर्गं सर्वेण प्रयत्नेन समाश्रयेत—हि (यतः) एषां मध्ये बहुगुण्येन (हेतुना) गिरिदुर्गं विशिष्यते (श्रेष्ठमस्ति) ॥

भा० । ता० । इन सबदुर्गों में अनेक गुणोंसे संयुक्त होनेसे पर्वतोंका दुर्ग सर्वोत्तम है तिससे सबप्रकार के यत्नसे पर्वत के दुर्गका आश्रयले—क्योंकि उसमें दूसरा विपक्षी सहज से घुसनहीं सक्ता और दूसरे की सेनाको उसके मनुष्य शिलाआदि की वर्षा से नष्ट करसक्ते हैं ७१ ॥

त्रीण्याद्यान्याश्रितास्त्वेषांमृगगर्त्ताश्रयाऽप्सराः।त्रीण्युत्तराणिक्रमशःप्लवङ्गमनरामराः ७२

प० । त्रीणि आद्यानि आश्रिताः तु एषां मृगगर्ताश्रयाऽप्सराः त्रीणि उत्तराणि क्रमशः प्लवंगमनरामराः ॥

यो० । एषां (दुर्गाणां) मध्ये आद्यानि त्रीणि (दुर्गाणि) मृगगर्ताश्रयाऽप्सराः आश्रिताः संति—उत्तराणि त्रीणि क्रमशः प्लवंगमनरामराः आश्रिताः संति ॥

भा० । ता० । इन सब दुर्गोंमें पहिले तीन दुर्गों (धनुः मही जलके) में मृग और मूसे और नाके बसतेहैं और पिछले तीन दुर्गों (वृक्ष मनुष्य पर्वतके) में क्रमसे वानर मनुष्य और देवता बसतेहैं ७२ ॥

यथादुर्गाश्रितानेतान्नोपहिंसन्तिशत्रवः । तथारयोनहिंसन्तिनृपंदुर्गसमाश्रितम् ७३॥

प० । यथा दुर्गाश्रितान् एतान् न उपहिंसंति शत्रवः तथा अरयः न हिंसंति नृपं दुर्गसमाश्रितम् ॥

यो० । यथा दुर्गाश्रितान् एतान् (मृगवानरादीन) शत्रवः (सिंहादयः) न उपहिंसंति—तथा दुर्गसमाश्रितं नृपं अरयः न हिंसंति ॥

भा० । ता० । जैसे पूर्वोक्त दुर्गों में रहनेवाले मृग आदिकों की सिंह आदि शत्रु हिंसा नहीं करसक्ते इसी प्रकार दुर्गमें रहनेवाले राजाकोभी शत्रु हिंसानहीं करसक्ते ७३ ॥

एकःशतंयोधयतिप्राकारस्थोधनुर्द्धरः। शतंदशसहस्राणितस्माद्दुर्गंविधीयते ७४॥

प० । एकः शतं योधयति प्राकारस्थः धनुर्द्धरः शतं दशसहस्राणि तस्मात् दुर्गं विधीयते ॥

यो० । प्राकारस्थः एकः धनुर्द्धरः शतं योधयति — शतं (योद्धारः) दशसहस्राणि योधयंति — तस्मात् दुर्गं विधीयते (क्रियते) ॥

भा० । ता० । जिससे एक भी धनुषधारी प्राकार (किले) में बैठकर सौके संग युद्ध करसकाहै और सौ योद्धा दश सहस्रोंके संग युद्ध करसकेहैं—तिससे दुर्ग बनानेका उपदेश शास्त्रकारोंने कहाहै ७४ ॥

तत्स्यादायुधसंपन्नंधनधान्येनवाहनैः। ब्राह्मणैःशिल्पिभिर्यन्त्रैर्यवसेनोदकेनच ७५ ॥

प० । तत् स्यात् आयुधसंपन्नं धनधान्येन वाहनैः ब्राह्मणैः शिल्पिभिः यंत्रैः यवसेन उदकेन च ॥

यो० । तत (दुर्गं) आयुधसंपन्नं धनधान्येन — वाहनैः ब्राह्मणैः शिल्पिभिः यंत्रैः — यवसेन — चपुनः उदकेन-संपन्नं — स्यात ॥

भा० । ता० । आयुध (खड्ग आदि) धन—धान्य—वाहन (सवारी) ब्राह्मण—शिल्पी (कारीगर) यंत्र—यवस (भुंस)—और जल—इनसे संपन्न (संयुक्त वा पूर्ण) वह दुर्ग होनाचाहिये ७५ ॥

तस्यमध्येसुपर्याप्तंकारयेद्गृहमात्मनः। गुप्तंसर्वर्तुकंशुभ्रंजलवृक्षसमन्वितम् ७६ ॥

प० । तस्य मध्ये सुपर्याप्तं कारयेत् गृहं आत्मनः गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितम् ॥

यो० । तस्य (दुर्गस्य) मध्ये सुपर्याप्तं — गुप्तं — सर्वर्तुकं — शुभ्रं — जलवृक्षसमन्वितं — आत्मनः गृहं — कारयेत ॥

भा० । ता० । उस दुर्गके मध्यमें—सुपर्याप्त अर्थात् स्त्री देवता आयुध अग्नि शाला आदिके जिसमें पृथक् २ स्थानहों—और जो परिखा प्राकार आदिसे गुप्त (रक्षित) हो—और सब ऋतुओंके फल पुष्प आदिसे संयुक्त—और अत्यंत शुभ्र—और वापी आदिके जल और वृक्षोंसे संपन्न—ऐसा अपने रहनेका घर बनावे ७६ ॥

तदध्यास्योद्वहेद्भार्यांसवर्णांलक्षणान्विताम्। कुलेमहतिसंभूतांहृद्यांरूपगुणान्विताम् ७७

प० । तत् अध्यास्य उद्वहेत् भार्यां सवर्णां लक्षणान्विताम् कुले महति संभूतां हृद्यां रूपगुणान्विताम् ॥

यो० । राजा तत (गृहं) अध्यास्य — सवर्णां — लक्षणान्वितां — महति कुले संभूतां — हृद्यां रूपगुणान्वितां — भार्यां उद्वहेत (विवाहयेत) ॥

भा० । ता० । उस घरमें वसकर राजा—ऐसी स्त्रीके संग विवाह करै जो अपने समान वर्णकी हो और जो शुभके सूचक लक्षणोंसे संयुक्तहो—और जो महान् (बड़े) कुलमें उत्पन्नहो—और जो मनोहर हो—और गुणवतीहो ७७ ॥

पुरोहितंचकुर्वीतवृणुयादेवचर्त्विजम् । तेऽस्यगृह्याणिकर्माणिकुर्युर्वैतानिकानिच ७८ ॥

प० । पुरोहितं च कुर्वीत वृणुयात् एव च ऋत्विजं ते अस्य गृह्याणि कर्माणि कुर्युः वैतानिकानि च ॥

यो० । पुरोहितं कुर्वीत चपुनः ऋत्विजं वृणुयात् — ते (पुरोहितऋत्विजः) अस्य (राज्ञः) गृह्याणि चपुनः वैतानिकानि कर्माणि कुर्युः ॥

भा० । ता० । राजा एक पुरोहित को करे अर्थात् अथर्वण वेदमें कही विधिसे पुरोहितको बनावे—और एक ऋत्विज का वरणकरै वे दोनों पुरोहित और ऋत्विज इस राजाके गृह्य (शांति आदि) और वैतानिक (वेदत्रयीसे कर्तव्य यज्ञ आदि) कर्मोंको करावें ७८ ॥

यजेतराजाक्रतुभिर्विविधैराप्तदक्षिणैः । धर्मार्थंचैवविप्रेभ्योदद्याद्भोगान्धनानिच ७९ ॥

प० । यजेत राजा क्रतुभिः विविधैः आप्तदक्षिणैः धर्मार्थं च एव विप्रेभ्यः दद्यात् भोगान् धनानि च ॥

यो० । राजा — आप्तदक्षिणैः विविधैः क्रतुभिः यजेत — चपुनः धर्मार्थं विप्रेभ्यः भोगान् धनानिच — दद्यात् ॥

भा० । ता० । पूर्ण है दक्षिणा जिनमें ऐसी नानाप्रकारकी यज्ञों से राजा पूजनकरे—और धर्म के लिये ब्राह्मणों को भोग (भोजन वस्त्रआदि) और धनोंकोदे ७९ ॥

सांवत्सरिकमाप्तैश्चराष्ट्रादाहारयेद्बलिम् । स्याच्चाम्नायपरोलोकेवर्त्तेतपितृवन्नृपु ८० ॥

प० सांवत्सरिकं आप्तैः च राष्ट्रात् आहारयेत् बलिम् स्यात् च आम्नायपरः लोके वर्त्तेत पितृवत् नृपु ॥

यो० । आप्तैः (अमात्यैः) राष्ट्रात् सांवत्सरिकंबलिं आहारयेत् — चपुनः लोके आम्नायपरः स्यात् — नृपु पितृवत् वर्त्तेत ॥

भा० । ता० । अपने राष्ट्र (देश) में से राज्यमें नियुक्त सज्जन मंत्रियों के द्वारा वर्षदिन में लेनेयोग्य बलि (छठाभाग) को मँगवावे—और लोक में वेद के अनुसार वर्त्ते अर्थात् करआदि ग्रहणकरै—और मनुष्योंपर पिताके समान प्रीतिरक्खे ८० ॥

अध्यक्षान्विविधान्कुर्यात्तत्रतत्रविपश्चितः ।
तेऽस्यसर्वाण्यवेक्षेरन्नृणांकार्याणिकुर्वताम् ८१ ॥

प० । अध्यक्षान् विविधान् कुर्यात् तत्र तत्र विपश्चितः ते अस्य सर्वाणि अवेक्षेरन् नृणां कार्याणि कुर्वताम् ॥

यो० । तत्रतत्र विपश्चितः विविधान् अध्यक्षान् राजाकुर्यात् — ते अस्य (कार्याणि) कुर्वतां नृणां सर्वाणि कार्याणि अवेक्षेरन् (पश्येयुः) ॥

भा० । ता० । वहराजा तहां २ (हाथी अश्वआदिस्थानोंमें) विद्वान् और अनेक और काम में कुशल अध्यक्ष (देखनेवाले) नियतकरै—वे अध्यक्ष इसराजा के कामकरनेवाले मनुष्यों के सम्पूर्ण कामों को देखें ८१ ॥

आवृत्तानांगुरुकुलाद्विप्राणांपूजकोभवेत् । नृपाणामक्षयोह्येषनिधिर्ब्राह्मोऽभिधीयते ८२

प० । आवृत्तानां गुरुकुलात् विप्राणां पूजकः भवेत् नृपाणां अक्षयः हि एषः निधिः ब्राह्मः अभिधीयते ॥

यो० । गुरुकुलात् — आवृत्तानां विप्राणां पूजकः भवेत् — हि (यतः) एषः (उक्तविप्रपूजनरूपः) नृपाणां ब्राह्मः निधिः अभिधीयते (मन्वादिभिर्गीतिशेषः) ॥

भा० । ता० । वेदपढ़कर गुरुके कुलसे आयेहुए (गृहस्थ के अभिलाषी) ब्राह्मणोंका नियम पूर्वक धन धान्यसे पूजनकरे क्योंकि जो यह ब्राह्मणोंको दिये धनधान्यका यज्ञहै - सो राजाका अक्षयनिधि (कोश) शास्त्रमें कहाहै ८२ ॥

नतंस्तेनानचामित्राहरन्तिनचनश्यति । तस्माद्राज्ञानिधातव्योब्राह्मणेष्वक्षयोनिधिः ८३

प० । न तं स्तेनाः न च अमित्राः हरंति न च नश्यति तस्मात् राज्ञा निधातव्यः ब्राह्मणेषु अक्षयः निधिः ॥

यो० । यस्मात् तं (निधिं) स्तेनाः चपुनः अमित्राः (शत्रवः) नहरंति — चपुनः सः (निधिः) न नश्यति — तस्मात् ब्राह्मणेषु अक्षयः निधिः राज्ञा निधातव्यः (तेभ्योदेयः) ॥

भा० । ता० । उन ब्राह्मणों में स्थापित कीहुई निधि (कोश) को चोर और शत्रुनहीं हर सके—और न वहनिधि नष्टहोती है—तिससे राजा इस अनन्त फलदायक निधिको ब्राह्मणोंके विषे स्थापनकरे अर्थात् ब्राह्मणोंको धनधान्यदे ८३ ॥

नस्कन्दतेनव्यथतेनविनश्यतिकर्हिचित् । वरिष्ठमग्निहोत्रेभ्योब्राह्मणस्यमुखेहुतम् ८४॥

प० । न स्कंदते न व्यथते न विनश्यति कर्हिचित् वरिष्ठं अग्निहोत्रेभ्यः ब्राह्मणस्य मुखे हुतम् ॥

यो० । यतः ब्राह्मणस्य मुखेहुतं न स्कंदते — न व्यथते — न कर्हिचित् विनश्यति — तस्मात् अग्निहोत्रेभ्यः वरिष्ठं भवति ॥

भा० । ता० । ब्राह्मणके मुखमें होमकिया पदार्थ अर्थात् ब्राह्मणके हाथमेंदिया—क्योंकि इस वचनके अनुसार ब्राह्मणका हाथही मुखहोता है—झरतानहीं और शुष्कनहीं होता और दाह आदिसे नष्टनहींहोता इसमें अग्निहोत्रों से भी—ब्राह्मणके हस्तमेंदिया श्रेष्ठहै क्योंकि हवि कभी गिरभीजाती है और शुष्कहोजाती है और दाहआदिसे नष्टभी होजातीहै ८४ ॥

सममब्राह्मणेदानंद्विगुणंब्राह्मणब्रुवे । प्राधीतेशतसाहस्रमनन्तंवेदपारगे ८५ ॥

प० । समं अब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे प्राधीते शतसाहस्रं अनंतं वेदपारगे ॥

यो० । अब्राह्मणे दानं समं (तुल्यफलं) — ब्राह्मणब्रुवेद्विगुणं — प्राधीते — शतसाहस्रं — वेदपारगे अनंतं (असंख्यफलजनकं) — भवति ॥

भा० । ता० । ब्राह्मणसे भिन्न क्षत्रियआदि को देनेका फलसम (उतनाही) होताहै—और ब्राह्मणब्रुव (जो कर्महीनहो और अपनेको ब्राह्मण कहताहो) को देनेका फल द्विगुण (दुगुना)—फलका दाता होता है—और प्राधीत (जो पढ़ताहो) को देनेकाफल लक्षगुणा होता है—और वेदपारग (जिसने संपूर्ण शाखापढ़ीहों) को देनेकाफल अनंत होताहै ८५ ॥

---

१ पाण्यास्याहि द्विजःस्मृतः ॥

पात्रस्यहिविशेषेणश्रद्दधानतयैवच । अल्पंवाबहुवाप्रेत्यदानस्यावाप्यतेफलम् ८६ ॥

प० । पात्रस्य हि विशेषेण श्रद्दधानतया एव च अल्पं वा बहु वा प्रेत्य दानस्य अवाप्यते फलम् ॥

यो० । पात्रस्य विशेषेण चपुनः श्रद्दधानतया – दानस्य फलं अल्पं वा बहु प्रेत्य मनुष्यैः अवाप्यते (लभ्यते) ॥

भा० । ता० । विद्या और तपसे युक्त पात्रकी विशेषता और शास्त्रोक्त सत्यहै इस श्रद्धासे–अल्प अथवा अधिकदान का फल परलोक में मनुष्यों को मिलता है–इससे श्रद्धासे सुपात्र को दानदे ८६ ॥

समोत्तमाधमैराजात्वाहूतःपालयन्प्रजाः । ननिवर्त्तेतसंग्रामात्क्षात्रंधर्ममनुस्मरन् ८७॥

प० । समोत्तमाधमैः राजा तु आहूतः पालयन् प्रजाः न निवर्त्तेत संग्रामात् क्षात्रं धर्मं अनुस्मरन् ॥

यो० । समोत्तमाधमैः आहूतः राजा प्रजाः पालयन् क्षात्रं धर्मं अनुस्मरन्सन् संग्रामात् न निवर्त्तेत ॥

भा० । ता० । अपने से समान उत्तम और अधम राजाओंने युद्धकेलिये आहूत (बुलाया) राजा प्रजाकी पालना और क्षत्रियों के धर्म का स्मरण–करताहुआ राजा युद्धसे निवृत्त न हो–क्योंकि युद्ध के लिये बुलाये क्षत्रियको अवश्य युद्धकरना ८७ ॥

संग्रामेष्वनिवर्त्तित्वंप्रजानांचैवपालनम् । शुश्रूषाब्राह्मणानांचराज्ञांश्रेयस्करंपरम् ८८॥

प० । संग्रामेषु अनिवर्त्तित्वं प्रजानां च एव पालनं शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम् ॥

यो० । संग्रामेषु अनिवर्त्तित्वं – चपुनः प्रजानां पालनं – चपुनः ब्राह्मणानां शुश्रूषा –(एतत्त्रयं) राज्ञां परं श्रेयस्करं भवति ॥

भा० । ता० । संग्राम में पराङ्मुख न होना–और प्रजाओंकी पालना करनी और ब्राह्मणों की शुश्रूषा (सेवा) करनी–ये तीनों राजाओं के अत्यन्त कल्याण करनेवाले होतेहैं ८८ ॥

आहवेषुमिथोऽन्योन्यंजिघांसन्तोमहीक्षितः ।
युध्यमानाःपरंशक्त्यास्वर्गंयान्त्यपराङ्मुखाः ८९॥

प० । आहवेषु मिथः अन्योन्यं जिघांसंतः महीक्षितः युध्यमानाः परं शक्त्या स्वर्गं यांति अपराङ्मुखाः ॥

यो० । आहवेषु मिथः अन्योन्यं जिघांसंतः शक्त्यायुध्यमानाः अपराङ्मुखाः महीक्षितः परं स्वर्गं यांति (गच्छंति) ॥

भा० । ता० । संग्रामों में परस्पर–परस्परको मारने की इच्छाकरते और युद्धकरतेहुये–और अपराङ्मुख(संमुखहुये)–राजा सर्वोत्तम स्वर्गमें जातेहैं–यद्यपि शत्रुकापराजय और धनआदि काभी लाभ है तथापि युद्धमें जाकर जो पराङ्मुख न हो उसको स्वर्ग भी अवश्य होताहै ८९ ॥

नकूटैरायुधैर्हन्याद्युध्यमानोरणेरिपून् । नकर्णिभिर्नापिदिग्धैर्नाग्निज्वलिततेजनैः ९० ॥

प० । न कूटैः आयुधैः हन्यात् युध्यमानः रणे रिपून् न कर्णिभिः न अपि दिग्धैः न अग्निज्वलिततेजनैः

यो० । रणे युध्यमानः राजा कूटैः आयुधैः—कर्णिभिः दिग्धैः अग्निज्वलिततेजनैः आयुधैः रिपून् न हन्यात् ॥

भा० । ता० । युद्ध करताहुआ राजा रणमें शत्रुओंको कूट आयुधों (जिनके बाहर काष्ठहो और भीतर तीक्ष्ण (पैने) शस्त्रहों) से शत्रुओंको न मारे—और कर्णीके आकार जिनको फलक (अग्रभाग) हो ऐसे बाणोंसे और जिनमें विष मिलाहो ऐसे और जिनका फलक अग्निसे तपाया हुआहो उन बाणोंसे भी शत्रुओंको न मारे ९० ॥

नचहन्यात्स्थलारूढंनक्लीबंनकृताञ्जलिम् । नमुक्तकेशंनासीनंनतवास्मीतिवादिनम् ९१

प० । न च हन्यात् स्थलारूढं न क्लीबं न कृतांजलिं न मुक्तकेशं न आसीनं न तव अस्मि इति वादिनम् ॥

यो० । स्थलारूढं—क्लीबं—कृतांजलिं—मुक्तकेशं—आसीनं—तवअस्मि इतिवादिनं—शत्रुं न हन्यात् ॥

भा० । ता० । आप रथमें बैठाहुआ राजा—रथछोड़कर स्थल पर खड़ेहुये राजाको—और नपुंसक राजाको—और कृतांजलि (जो हाथ जोड़े खड़ाहो) को—और मुक्तकेश (जिसके केश खुलेहों) उसको और मैं तेराहीहूं यह कहनेहुये राजाको—न मारे क्योंकि यह धर्म युद्धहोताहै ९१ ॥

नसुप्तंनविसन्नाहंननग्नंननिरायुधम् । नायुध्यमानंपश्यन्तंनपरेणसमागतम् ९२ ॥

प० । न सुप्तं न विसन्नाहं न नग्नं न निरायुधं न अयुध्यमानं पश्यंतं न परेण समागतम् ॥

यो० । सुप्तं—विसन्नाहं—नग्नं—निरायुधं—अयुध्यमानं पश्यंतं—परेण समागतं—शत्रुं—राजा न हन्यात् ॥

भा० । ता० । सोतेहुये—जिसपर सन्नाह (सजोआ) न हो उसको—नग्नको—आयुधसे हीनको— (जिसके पास शस्त्र न हो)—और जो युद्धतो न करताहो परंतु देखरहाहो और जो किसी अन्यके संग युद्ध कररहाहो—ऐसे शत्रुको भी राजा न मारे ९२ ॥

नायुधव्यसनप्राप्तंनार्त्तंनातिपरिक्षतम् । नभीतंनपरावृत्तंसतांधर्ममनुस्मरन् ९३ ॥

प० । न आयुधव्यसनप्राप्तं न आर्त्तं न अतिपरिक्षतं न भीतं न परावृत्तं सतां धर्मं अनुस्मरन् ॥

यो० । राजा—सतां धर्मं अनुस्मरन् सन् आयुधव्यसनप्राप्तं आर्त्तं—अतिपरिक्षतं—भीतं—परावृत्तं—शत्रुं न हन्यात् ॥

भा० । ता० । सज्जन क्षत्रियों के धर्मको स्मरणकरताहुआ राजा—ऐसे शत्रुको न मारे—जिसका खड्गआदि आयुध टूटगयाहो—और जो रोगीहो—जिसके अत्यन्त क्षत (घाव) हों—जो भयभीतहो और जो युद्धसे पराङ्मुखहो (लौटा वा भाजाहो) ९३ ॥

यस्तुभीतःपरावृत्तःसंग्रामेहन्यतेपरैः । भर्त्तुर्यद्दुष्कृतंकिंचित्तत्सर्वंप्रतिपद्यते ९४ ॥

प० । यः तु भीतः परावृत्तः संग्रामे हन्यते परैः भर्त्तुः यत् दुष्कृतं किंचित् तत् सर्वं प्रतिपद्यते ॥

यो० । भीतः परावृत्तः यः संग्रामे परैः हन्यते—सः यत् किंचित् भर्त्तुः दुष्कृतं (पापं) तत् सर्वं प्रतिपद्यते (प्राप्नोति)

भा० । जिस भयभीतको संग्राम में शत्रु मारदेतहैं वह अपने स्वामीके सम्पूर्ण पाप को प्राप्त होताहै ॥

ता० । पराङ्मुखहुये भयभीत जिस युद्धकरनेवाले को संग्राम में शत्रु मारदेते हैं—वह अपने स्वामीका जो कुछ पापहै उस सबको प्राप्तहोताहै—यहां पर यह शंका नहीं करनी कि स्वामी

का पाप सेवकको कैसे मिलेगा क्योंकि शास्त्र प्रमाणसे अन्य के पाप अन्य में जासक्तेहैं इसीसे शास्त्रसे विरुद्ध अनुमान भी नहीं होसक्ता–यह बात हम छटे अध्याय के ७९ श्लोकमें प्रकट कर आये हैं–इससे पराङ्मुख हतको पाप होताहै और स्वामी का पाप उसको नहीं मिलता यह गोविंदराजका–और अर्थवाद यह है ऐसा कथन मेधातिथि का मनुके अर्थ से विरुद्धहोनेसे ठीक नहीं है–क्योंकि अन्य के पुण्य पाप अन्य में शास्त्र प्रमाणसे जानेहैं यह बात व्यासजीने निर्णय की है–इससे जो अर्थ हमने कहा वही ठीक है ९४ ॥

यच्चास्यसुकृतंकिंचिदमुत्रार्थमुपार्जितम् । भर्त्तातत्सर्वमादत्तेपरावृत्तहतस्यतु ९५ ॥

प० । यत् च अस्य सुकृतं किंचित् अमुत्रार्थं उपार्जितं भर्त्ता तत् सर्वं आदत्ते परावृत्तहतस्य तु ॥

यो० । परावृत्तहतस्य अस्य अमुत्रार्थं उपार्जितं यत् किंचित् सुकृतं (पुण्यं) अस्ति तत् सर्वं भर्त्ता (स्वामी) आदत्ते (गृह्णाति) ॥

भा० । ता० । पराङ्मुखहोकर मरेहुये का जो कुछ परलोकके लिये संचित पुण्य है उस सब पुण्यको स्वामी लेलेता है अर्थात् शास्त्र प्रमाणसे वह स्वामीको मिलजाता है ९५ ॥

रथाश्वंहस्तिनंछत्रंधनंधान्यंपशून्स्त्रियः । सर्वद्रव्याणिकुप्यंचयोयज्जयतितस्यतत् ९६ ॥

प० । रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून् स्त्रियः सर्वद्रव्याणि कुप्यं च यः यत् जयति तस्य तत् ॥

यो० । रथाश्वं–हस्तिनं–छत्रं–धनं धान्यं पशून्–स्त्रियः सर्वद्रव्याणि–चपुनः कुप्यं –एषां मध्ये यः योद्धा–यत् जयति तत् रथाश्वादिकं तस्य एव भवति ॥

भा० । जो योधा–रथ–घोड़ा–हाथी–वस्त्र अन्न–पशु–स्त्री–गुड़ लवण और सोने चांदी से भिन्न धातु–इनको जीतकर लावे वह उस योधाकीही होतीहै ॥

ता० । जीतेहुये संग्रामके पदार्थों को राजाहीन ग्रहण करै किंतु रथ–घोड़े–हाथी–छत्र–धन (वस्त्र) अन्न–पशु–स्त्री–और गुड़ लवण आदि सब द्रव्य और कुप्य (सोने चांदीसे भिन्न तांबा आदि) इनको जो सबसे पृथक् जीतकर लावे व उस जीतनेवालेकेही होतेहैं राजाके नहीं–और सोने चांदी आदि जीतेहुये धनको तो राजाकेही अर्पण करदे–क्योंकि इसीलिये यहां पर यह गिनतीकी है ९६ ॥

राज्ञश्चदद्युरुद्धारमित्येषावैदिकीश्रुतिः।राज्ञाचसर्वयोधेभ्योदातव्यमपृथग्जितम् ९७॥

प० । राज्ञः च दद्युः उद्धारं इति एषा वैदिकी श्रुतिः राज्ञा च सर्वयोधेभ्यः दातव्यं अपृथग्जितम् ॥

यो० । योधाः राज्ञः उद्धारं दद्युः–चपुनः राज्ञा सर्वयोधेभ्यः अपृथग्जितं दातव्यम्–इति एषा वैदिकी श्रुतिः अस्ति॥

भा० । यह वेदकी श्रुतिहै कि योधा राजाको उद्धारदें–और राजा भी मिलकर जीतेहुये धनको योधाओंको दे ॥

ता० । युद्ध करनेवाले मनुष्य राजाको उद्धार (जीतेहुये धनमें जो उत्तम)–सुवर्ण रजत कुप्यआदि) दें और हाथी घोड़ा वाहन आदिभी राजाकेही अर्पण करदें–क्योंकि इसे गौतमके

१ वाहनं च राज्ञ उद्धारश्च ॥

वचनसे यही प्रतीत होताहै कि वाहन और उद्धार राजाका होताहै—और उद्धारके देनेमें यह श्रुति भी है कि इंद्रने जब वृत्रासुरको हता तब देवताओं के समीप जाकर यह बोला कि मेरा उद्धारदो—और राजा भी मिलकर वा पृथक् २ जीतेहुये धनमेंसे सब योधाओंको पुरुषार्थ के अनुसार दे ९७ ॥

एषोऽनुपस्कृतःप्रोक्तोयोधधर्मःसनातनः ।
अस्माद्धर्मान्नच्यवेतक्षत्रियोघ्नन्रणेरिपून् ९८ ॥

प० । एषः अनुपस्कृतः प्रोक्तः योधधर्मः सनातनः अस्मात् धर्मात् न च्यवेत क्षत्रियः घ्नन् रणे रिपून् ॥

यो० । एषः अनुपस्कृतः (अतिगर्हितः) सनातनः योधधर्मः मया प्रोक्तः (कथितः)—क्षत्रियः रणे रिपून् घ्नन् सन् अस्मात् धर्मात् नच्यवेत (नपतेत्) ॥

भा० । ता० । अत्यंत निंदित और सनातन (अनादि संसारमें सदासे प्रचलित) योधाओं का यहधर्म मैंने तुमको कहा—संग्राम में शत्रुओंको मारताहुआ क्षत्रिय इस धर्मसे चलायमान नहो—युद्धका अधिकारी होनेसे क्षत्रिय कहाहै यदि अन्य भी राजाहो वह भी उक्तधर्मसे न चले९८॥

अलब्धंचैवलिप्सेतलब्धंरक्षेत्प्रयत्नतः । रक्षितंवर्द्धयेच्चैववृद्धंपात्रेषुनिःक्षिपेत् ९९ ॥

प० । अलब्धं च एव लिप्सेत लब्धं रक्षेत् प्रयत्नतः रक्षितं वर्द्धयेत् च एव वृद्धं पात्रेषु निःक्षिपेत् ॥

यो० । राजा अलब्धं धनं लिप्सेत—लब्धं धनं प्रयत्नतः रक्षेत्—रक्षितं धनं वर्द्धयेत् एव वृद्धं धनं पात्रेषु निःक्षिपेत् (दद्यात्) ॥

भा० । ता० । नहीं जीते भूमि रत्न आदि धनके जयकी इच्छाकरै और जीतेहुये धनकी प्रयत्नसे रक्षाकरै—और रक्षित धनको बढ़ावे और बढ़ाये धनको सुपात्र को दे ९९ ॥

एतच्चतुर्विधंविद्यात्पुरुषार्थप्रयोजनम् । अस्यनित्यमनुष्ठानंसम्यक्कुर्यादतन्द्रितः १०० ॥

प० । एतत् चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम् अस्य नित्यं अनुष्ठानं सम्यक् कुर्यात् अतंद्रितः ॥

यो० । एतत् चतुर्विधं पुरुषार्थप्रयोजनं विद्यात्—अतंद्रितःसन अस्य नित्यं अनुष्ठानं कुर्यात् ॥

भा० । ता० । राजा—इस चार प्रकारके पुरुषार्थ (स्वर्ग आदि) के प्रयोजन (साधन) को जाने—इसीसे आलस्यको छोड़कर इसका नित्य (प्रतिदिन) करै १०० ॥

अलब्धमिच्छेद्दण्डेनलब्धंरक्षेदवेक्षया । रक्षितंवर्द्धयेद्वृद्ध्यावृद्धंदानेननिःक्षिपेत् १०१ ॥

प० । अलब्धं इच्छेत् दंडेन लब्धं रक्षेत् अवेक्षया रक्षितं वर्द्धयेत् वृद्ध्या वृद्धं दानेन निःक्षिपेत् ॥

यो० । अलब्धं हस्ति आदि धनं दंडेन इच्छेत्—लब्धं धनं अवेक्षया रक्षेत्—रक्षितं धनं वृद्ध्या वर्द्धयेत्—वर्द्धितं धनं—राजा दानेन निःक्षिपेत् (सुपात्रेभ्यः दद्यात्) ॥

भा० । ता० । नहींप्राप्तहुये हस्ति अश्व रथ पदातिआदि धनकीइच्छा दंड के द्वारा—राजाकरै और प्राप्तहुये धनकी अपने देखनेसे रक्षाकरै—और रक्षाकिये धनको वृद्धि (स्थल जल मार्ग आदिका व्यापार) से बढ़ावे और बढ़ायेहुये धनको सुपात्रोंकोदे १०१ ॥

---

१ इंद्रो वै वृत्रं हत्वेत्युपक्रम्य समहान् भूत्वा देवता अब्रवीत् उद्धारं मे उद्धरत ॥

नित्यमुद्यतदण्डःस्यान्नित्यंविवृतपौरुषः। नित्यंसंवृतसर्वार्थोनित्यंछिद्रानुसार्यरेः १०२॥

प० । नित्यं उद्यतदंडः स्यात् नित्यं विवृतपौरुषः नित्यं संवृतसर्वार्थः नित्यं छिद्रानुसारी अरेः ॥

यो० । राजा — नित्यं उद्यतदंडः स्यात् — नित्यंविवृतपौरुषःस्यात् — नित्यं संवृतसर्वार्थः स्यात् — नित्यं अरेः (शत्रोः) छिद्रानुसारी स्यात् ॥

भा० । ता० । राजा प्रतिदिन उद्यत दंडरहै अर्थात् हस्ति अश्वआदि की शिक्षाका अभ्यास प्रतिदिनकरै—और नित्य विवृत पौरुषरहै अर्थात् अस्त्रआदिसे अपने पुरुषार्थ को नित्य प्रकट रक्खै और नित्य संवृतसर्वार्थ रहै अर्थात् अपने मंत्र आचार चेष्टा आदिको प्रकट न करै—और नित्य शत्रुकेछिद्रोंका अनुसारीरहै अर्थात् शत्रुके दुःखआदिछिद्रोंको प्रतिदिन देखतारहै १०२॥

नित्यमुद्यतदण्डस्यकृत्स्नमुद्विजतेजगत्।तस्मात्सर्वाणिभूतानिदण्डेनैवप्रसाधयेत् १०३

प० । नित्यं उद्यतदंडस्य कृत्स्नं उद्विजते जगत् तस्मात् सर्वाणि भूतानि दंडेन एव प्रसाधयेत् ॥

यो० । नित्यं उद्यतदंडस्य राज्ञः सकाशात् कृत्स्नंजगत् उद्विजते — तस्मात् राजा सर्वाणि भूतानि दंडेन एव प्रसाधयेत् (स्ववशेकुर्यात्) ॥

भा० । ता० । जिससे नित्य उद्यतदंड राजा से सबजगत् कंपता है—तिससे दंडसेही सम्पूर्ण भूतोंको अपने वशमें—राजाकरै १०३ ॥

अमाययैववर्त्तेतनकथंचनमायया । बुद्ध्येतारिप्रयुक्तांचमायांनित्यंसुसंवृतः १०४ ॥

प० । अमायया एव वर्त्तेत न कथंचन मायया बुद्ध्येत अरिप्रयुक्तां च मायां नित्यं सुसंवृतः ॥

यो० । अमायया एव वर्त्तेत — मायया कथंचन न वर्त्तेत — चपुनः नित्यं सुसंवृतः सन् अरिप्रयुक्तां मायां बुद्ध्येत (जानीयात्) ॥

भा० । ता० । अमात्यआदिकों में राजा निष्कपटसे वर्त्तावकरै तो किसीकाभी विश्वासी न रहेगा और किसीप्रकार भी कपट से वर्त्ताव न करै अर्थात् धर्म रक्षाके लिये यथार्थ व्यवहार करै—और अपनीरक्षाको भलीप्रकार नित्यकरके—शत्रुकीमाया (अपनी प्रकृतिकाभेद) को दूतके द्वारा जाने १०४ ॥

नास्यछिद्रंपरोविद्याद्विद्याच्छिद्रंपरस्यतु । गूहेत्कूर्मइवाङ्गानिरक्षेद्विवरमात्मनः १०५ ॥

प० । न अस्य छिद्रं परः विद्यात् विद्यात् छिद्रं परस्य तु गूहेत् कूर्मः इव अंगानि रक्षेत् विवरं आत्मनः ॥

यो० । परः (शत्रुः) अस्य (राज्ञः) छिद्रं न विद्यात् — राजा तु परस्य छिद्रंविद्यात् — राजा कूर्मः (कच्छपः) इव अंगानि गूहेत् — आत्मनः विवरं रक्षेत् ॥

भा० । ता० । राजा ऐसा यत्नकरै जिससे इसके छिद्र (प्रकृतिभेद आदि) को शत्रु न जाने और शत्रुके छिद्रको दूतोंसे स्वयंजानले—और कछुवे के समान अपने अंगोंको छिपावै अर्थात् कछुवा जैसे अपने हाथ चरणआदि अवयवोंको अपने देहमें छिपाता है इसीप्रकार राजा भी

अपने मंत्रीआदि अंगोंको दान मानआदि से छिपावे (अपने आधीनकरै)—और यदि दैववश छिद्रहोभीजाय तो उसका यत्नसे प्रतीकारकरै १०५ ॥

वकवच्चिन्तयेदर्थान्सिंहवच्चपराक्रमेत् । वृकवच्चावलुम्पेतशशवच्चविनिष्पतेत् १०६ ॥

प० । वकवत् चिंतयेत् अर्थान् सिंहवत् च पराक्रमेत् वृकवत् च अवलुंपेत शशवत् च विनिष्पतेत् ॥

यो० । राजा — वकवत् अर्थान् चिंतयेत — चपुनः सिंहवत् पराक्रमेत् — चपुनः वृकवत् अवलुंपेत — चपुनः शशवत् विनिष्पतेत् ॥

भा० । बगुलेके समान अपने प्रयोजनोंकी चिंताकरै—सिंहके समान पराक्रमकरै—वृकके समान शत्रुको नष्टकरै—शशा (खरा) के समान पलायनकरै (भाजजाय) ॥

ता० । जैसे बक (बगुला) जलमें अतिचंचल स्वभाव मीनोंको अंतःकरणको लगाकर निश्चलतासे ग्रहण करता है—इसीप्रकार राजाभी भलीप्रकारकी है रक्षा जिसमें ऐसे शत्रुके देशों के लेनेकी चिंताकरै—और जैसे सिंह अतिबली और स्थूलभी हाथियोंकी सेनाके मारनेको पराक्रम करता है इसीप्रकार बलवान्ने दबाया निर्बल राजाभी अपनी शक्तिभर शत्रु के मारने में पराक्रमकरै—जैसे वृक (भिढ़ा) रक्षाकिये पशुको दैववश रक्षाकरनेवाले की असावधानी के समय मारदेता है—इसीप्रकार दुर्गमें बैठेहुये भी शत्रुको प्रमादकी अवस्था में नष्टकरदे—और जैसे शशा (खरा) मारनेमें चतुर अनेक व्याधों के मध्यमें स्थितभी कूदकर भाजजाताहै—इसी प्रकार निर्बल राजाभी बलवानोंसे घिरकर किसीप्रकार मोहितकरके गुणवाले किसी अन्य राजा का आश्रयलेले १०६ ॥

एवंविजयमानस्ययेऽस्यस्युःपरिपन्थिनः । तानानयेद्वशंसर्वान्सामादिभिरुपक्रमैः १०७

प० । एवं विजयमानस्य ये अस्य स्युः परिपंथिनः तान् आनयेत् वशं सर्वान् सामादिभिः उपक्रमैः ॥

यो० । एवं विजयमानस्य अस्य (राज्ञः) ये परिपंथिनः (विरोधिनः) स्युः तान् सर्वान् सामादिभिः उपक्रमैः (उपायैः) वशं आनयेत् (वशीकुर्यात्) ॥

भा० । ता० । इस उक्तप्रकार से विजय करतेहुये इस राजाके जो विरोधी होजायँ—उनसबको साम (शांति) आदि उपायोंसे वशमेंकरै १०७ ॥

यदितेतुनतिष्ठेयुरुपायैःप्रथमैस्त्रिभिः । दण्डेनैवप्रसह्यैताञ्छनकैर्वशमानयेत् १०८ ॥

प० । यदि ते तु न तिष्ठेयुः उपायैः प्रथमैः त्रिभिः दंडेन एव प्रसह्य एतान् शनकैः वशं आनयेत् ॥

यो० । यदि ते (विरोधिनः) प्रथमैः त्रिभिः (सामदामभेदैः) उपायैः नतिष्ठेयुः — तर्हि दंडेन एव प्रसह्य एतान् (विरोधिनः) वशं आनयेत् (वशीकुर्यात्) ॥

भा० । ता० । जो वे विरोधी पहिले तीन (साम भेद दंड) उपायोंसे विरोधका परित्याग न करैं—तो बलसेही दंडदेकर उनको अपने वशमेंकरै १०८ ॥

सामादीनामुपायानांचतुर्णामपिपण्डिताः।सामदण्डौप्रशंसन्तिनित्यंराष्ट्राभिवृद्धये १०६

प० । सामादीनां उपायानां चतुर्णां अपि पंडिताः सामदंडौ प्रशंसंति नित्यं राष्ट्राभिवृद्धये ॥

यो० । सामादीनां चतुर्णां अपि उपायानां मध्ये पंडिताः नित्यं राष्ट्राभिवृद्धये सामदंडौ प्रशंसंति (सामदंडयोरेव प्रशंसां कुर्वंतीत्यर्थः) ॥

भा० । ता० । साम दाम भेद दंड इनचारों उपायों के विषे पंडितजन प्रतिदिन देश की विशेषकर वृद्धिके लिये साम और दंडकीही प्रशंसाकरते हैं–क्योंकि शांतिरूप उपायमें परिश्रम धनकाव्यय–सेना का नाशआदि दोषों का अभावहै–और दंडरूप उपायमें पूर्वोक्तदोष होनेपर भी कार्यकी सिद्धिकी अधिकता है १०६ ॥

यथोद्धरतिनिर्दाताकक्षंधान्यंचरक्षति । तथारक्षेन्नृपोराष्ट्रंहन्याच्चपरिपन्थिनः ११० ॥

प० । यथा उद्धरति निर्दाता कक्षं धान्यं च रक्षति तथा रक्षेत् नृपः राष्ट्रं हन्यात् च परिपंथिनः ॥

यो० । निर्दाता (लवनकर्त्ता) यथा कक्षं उद्धरति–चपुनः धान्यंरक्षति–तथा नृपतिः राष्ट्रं रक्षेत् चपुनः परिपंथिनः (शत्रून्) हन्यात् ॥

भा० । ता० । जैसे धान्यका काटनेवाला खेत में से तृणोंको उखाड़ताहै और धान्यकीरक्षा करताहै इसीप्रकार राजाभी दुष्टोंकोमारे और शिष्टोंसहित अपने देशकी रक्षाकरै ११० ॥

मोहाद्राजास्वराष्ट्रंयःकर्षयत्यनवेक्षया । सोऽचिराद्भ्रश्यतेराज्याज्जीविताच्चसबान्धवः १११

प० । मोहात् राजा स्वराष्ट्रं यः कर्षयति अनवेक्षया सः अचिरात् भ्रश्यते राज्यात् जीवितात् च सबान्धवः ॥

यो० । यः राजा अनवेक्षया मोहात् स्वराष्ट्रं कर्षयति सबान्धवः सः राजा अचिरात् राज्यात् चपुनः जीवितात् भ्रश्यते (नश्यति) ॥

भा० । ता० । जो राजा शिष्ट और अशिष्टोंको न जानकर मोहसे अपनेदेशनिवासी मनुष्यों को पीडित करताहै (कष्टदेताहै) वह शीघ्रही देशके वैर और अधर्मसे राज्यसे और अपने जीवनसे पुत्र बन्धुओं समेत भ्रष्टहोजाताहै–अर्थात् नष्टहोजाताहै १११ ॥

शरीरकर्षणात्प्राणाःक्षीयन्तेप्राणिनांयथा ।
तथाराज्ञामपिप्राणाःक्षीयन्तेराष्ट्रकर्षणात् ११२ ॥

प० । शरीरकर्षणात् प्राणाः क्षीयंते प्राणिनां यथा तथा राज्ञां अपि प्राणाः क्षीयंते राष्ट्रकर्षणात् ॥

यो० । शरीरकर्षणात् (शोषणात्) प्राणिनां प्राणाः यथा क्षीयंते–तथा राज्ञां अपि प्राणाः राष्ट्रकर्षणात् क्षीयंते (नश्यंति) ॥

भा० । ता० । भोजन आदिके परित्यागसे शरीरके शुष्क होनेपर जैसे प्राणियोंके प्राण नष्टहोजातेहैं इसी प्रकार राष्ट्र (देश) को पीडादेनेसे राजाओंके भी प्राण नष्टहोजाते हैं तिससे देशकी रक्षा राजा इस प्रकार करै जैसे अपने शरीरकी ११२ ॥

राष्ट्रस्यसंग्रहेनित्यंविधानमिदमाचरेत् । सुसंगृहीतराष्ट्रोहिपार्थिवःसुखमेधते ११३ ॥

प० । राष्ट्रस्य संग्रहे नित्यं विधानं इदं आचरेत् सुसंगृहीतराष्ट्रः हि पार्थिवः सुखं एधते ॥

यो० । राष्ट्रस्य संग्रहे इदं विधानं नित्यं आचरेत् – हि (यतः) सुसंगृहीतराष्ट्रः पार्थिवः सुखं एधते(वर्द्धते)॥

भा० । ता० । देशकी रक्षामें इस (जो आगे कहेंगे) उपायको राजा प्रतिदिन करै—क्योंकि देशकी रक्षा करनेवाला राजा सुखसे बढ़ताहै ११३ ॥

द्वयोस्त्रयाणांपञ्चानांमध्येगुल्ममधिष्ठितम् । तथाग्रामशतानांचकुर्याद्राष्ट्रस्यसंग्रहम् ११४

प० । द्वयोः त्रयाणां पंचानां मध्ये गुल्मं अधिष्ठितम् तथा ग्रामशतानां च कुर्यात् राष्ट्रस्य संग्रहम् ॥

यो० । द्वयो ग्रामयोः मध्ये त्रयाणां पंचानां तथा ग्रामशतानां मध्ये अधिष्ठितं गुल्मं (रक्षित पुरुषसमूहं प्रधान पुरुष युक्तं) राष्ट्रस्यसंग्रहं (रक्षास्थानं) कुर्यात् ॥

भा० । ता० । दो ग्रामोंके और तीन–पांच अथवा सौ ग्रामोंके मध्यमें रक्षाकरनेवाले पुरुष जिसमेंहों ऐसा गुल्म (थाना) नियतकरै और एक राष्ट्र (देश) का संग्रह (किला) भी नियतकरै और इसका लघु बनावे और गुरु (बड़ा) बनानेमें विकल्पहै ११४ ॥

ग्रामस्याधिपतिंकुर्याद्दशग्रामपतिंतथा । विंशतीशंशतेशंचसहस्रपतिमेवच ११५ ॥

प० । ग्रामस्य अधिपतिं कुर्यात् दशग्रामपतिं तथा विंशतीशं शतेशं च सहस्रपतिं एव च ॥

यो० । ग्रामस्य अधिपतिं – तथा दशग्रामपतिं – विंशतीशं – चपुनः शतेशं – चपुनः सहस्रपतिं – कुर्यात् ॥

भा० । ता० । एक ग्रामके अधिपति को—और दश ग्रामके अधिपति को—बीस ग्रामोंके और सौ ग्रामोंके और सहस्र ग्रामोंके अधिपति (लंबरदार) को नियतराजा करै ११५ ॥

ग्रामदोषान्समुत्पन्नान्ग्रामिकःशनकैःस्वयम् ।
शंसेद्ग्रामदशेशायदशेशोविंशतीशिनम् ११६ ॥

प० । ग्रामदोषान् समुत्पन्नान् ग्रामिकः शनकैः स्वयं शंसेत् ग्रामदशेशाय दशेशः विंशतीशिनम् ॥

जो प्रधानहैं (होता अध्वर्यु ब्रह्मा उदगाता) वे उस दक्षिणाके आधेभाग (४८अड़तालीस गौओं) को ग्रहणकरें यद्यपि आधी दक्षिणाकी पचास गौ होती हैं तथापि कात्यायन ऋषिने इस[1] वचनसे प्रत्येक मुख्य ऋत्विजोंको बारह १२ बारह गौदान कहाहै और आधेसे दोगौ न्यूनलेने सेभीये आधी दक्षिणाके भागी कहेजातेहैं और इनसे इतर चार (मैत्रावरुण प्रस्थाता–ब्राह्मणाच्छंशि–प्रस्तोता– येचारो मुख्य ऋत्विजोंकी दक्षिणाके आधी दक्षिणाके ग्रहणकरनेसे आधी दक्षिणा (२४ गौ) वाले कहातेहैं और तीसरे चार–(अच्छावाक–नेष्टाः–आग्नीध्रः–प्रतिहर्ता) ये मुख्य ऋत्विजोंकी दक्षिणा के तृतीयभाग (१६ गौ) को प्राप्तहोतेहैं और चौथे चार (तुग्राव–उन्नेता–पोता–सुब्रह्मण्या) ये मुख्य ऋत्विजोंकी दक्षिणाके चौथेभाग (१२ गौ) प्राप्तहोतेहैं इसप्रकारसे इन संपूर्ण ऋत्विजोंकी दक्षिणा इस कात्यायनके सूत्रसे[2] स्फुटकीहै २१० ॥

संभूयस्वानिकर्माणिकुर्वद्भिरिहमानवैः। अनेनविधियोगेनकर्तव्यांशप्रकल्पना २११ ॥

प० । संभूय स्वानि कर्माणि कुर्वद्भिः इह मानवैः अनेन विधियोगेन कर्तव्या अंशप्रकल्पना ॥

यो० । संभूय स्वानि कर्माणि कुर्वद्भिः मानवैः इह अनेनविधियोगेन अंशप्रकल्पना कर्तव्या ॥

भा० । ता० । मिलकर अपने २ गृहनिर्माणआदि कर्मोंको करतेहुये स्थपति सूत्रधार्य आदि कारीगर मनुष्य भी इसीप्रकार अर्थात् यज्ञ दक्षिणाके भागानुसार अपने २ भागकी कल्पना (निर्णय) को करिलें २११ ॥

धर्मार्थंयेनदत्तंस्यात्कस्मैचिद्याचतेधनम्। पश्चाच्चनतथातत्स्यान्नदेयंतस्यतद्भवेत् २१२

प० । धर्मार्थं येन दत्तं स्यात् कस्मैचित् याचते धनं पश्चात् च न तथा तत् स्यात् न देयं तस्य तत् भवेत् ॥

यो० । येन पुरुषेण याचते कस्मैचित् धनं यदि धर्मार्थं यदि दत्तंस्यात् तद्धनं तथा पश्चात् न स्यात् तर्हि तस्य तद्धनं न देयं भवेत् ॥

भा० । किसी मनुष्य ने किसी याचक को धर्म के लिये धन दिया हो और उसने वह धन धर्म में न लगाया होय तो उसको वह धन न देय होता है अर्थात् लौटाने योग्य होता है ॥

ता० । याचना (मांगना) करते हुये किसी मनुष्य को धर्मकारी के निमित्त किसी पुरुषने धन दिया हो और वह धन पीछे से उस प्रकार न लगा हो अर्थात् धर्म में व्यय न हुआ हो तो वह मनुष्य उस मनुष्य को देने योग्य नहीं है अर्थात् दिये हुये को भी लौटा ले और यदि देने की प्रतिज्ञा की हो तो उसको न दे क्योंकि इस गौतम वचन[3] के अनुसार यह प्रतीत होता है कि धन देने की प्रतिज्ञा करके भी अधर्मी मनुष्य को न दे २१२ ॥

यदिसंसाधयेत्तत्तुदर्पाल्लोभेनवापुनः। राज्ञादाप्यःसुवर्णंस्यात्तस्यस्तेयस्यनिष्कृतिः २१३

प० । यदि संसाधयेत् तत् तु दर्पात् लोभेन वा पुनः राज्ञा दाप्यः सुवर्णं स्यात् तस्य स्तेयस्य निष्कृतिः ॥

१ षड्द्वादशादेभ्यः ।
२ षडद्वितीयेभ्यश्चतस्रतृतीयेभ्यस्तिस्रश्चतुर्थेभ्यः ।
३ प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात् ॥

यो० । यदि दर्पात् लोभेन वा याचकः तत् धनं संसाधयेत् तदा राज्ञा तस्य स्तेयस्य निष्कृतिः सुवर्णं दाप्यः स्यात् ॥

भा० । ता० । यदि वह याचक अभिमान वा लोभ से उस धन को न दे और प्रतिज्ञा किये हुये धन को लोभ से लेना चाहै तो राजा उस पापकी शुद्धिके लिये सुवर्ण का दण्डदे २१३ ॥

दत्तस्यैषोदिताधर्म्यायथावदनपक्रिया।अतऊर्ध्वंप्रवक्ष्यामिवेतनस्यानपक्रियाम् २१४

प० । दत्तस्य एषा उदिता धर्म्या यथावत् अनपक्रिया अतः ऊर्ध्वं प्रवक्ष्यामि वेतनस्य अनपक्रियाम् ॥

यो० । एषा धर्म्या दत्तस्य अनपाक्रिया यथावत् उदिता अतः ऊर्ध्वं वेतनस्य अनपक्रियां प्रवक्ष्यामि ॥

भा० । ता० । यह दिये हुये धनकी अनपक्रिया (न देना) धर्म के अनुसार कही इसके आगे वेतन (नौकरी) की अनपक्रिया को कहता हूं २१४ ॥

भृतोनार्तोनकुर्याद्योदर्पात्कर्मयथोदितम्।सदण्ड्यःकृष्णलान्यष्टौनदेयंचास्यवेतनम् २१५

प० । भृतः न आर्तः न कुर्यात् यः दर्पात् कर्म यथोदितं सः दंड्यः कृष्णलानि अष्टौ न देयं च अस्य वेतनम् ॥

यो० । न आर्तः यः भृतः यथोदितं कर्म न कुर्यात् सः भृतः अष्टौकृष्णलानि राज्ञा दंड्यः चपुनः अस्य वेतनं न देयम् ॥

भा० । ता० । जो भृत (सेवक) स्वस्थ अवस्था में भी कहे के अनुसार अहंकार से अपने काम को न करे उस सेवक को राजा आठ कृष्णल दण्ड दे और उसका वेतन (नौकरी) न दे २१५ ॥

आर्तस्तुकुर्यात्स्वस्थःसन्यथाभाषितमादितः।सदीर्घस्यापिकालस्यतल्लभेतैववेतनम् २१६

प० । आर्तः तु कुर्यात् स्वस्थः सन् यथाभाषितं आदितः सः दीर्घस्य अपि कालस्य तत् लभेत एव वेतनम् ॥

यो० । आर्तः सेवकस्तु स्वस्थः सन यथा भाषितं आदितः कुर्यात् सः भृतः दीर्घस्य अपि कालस्य तत् वेतनं लभेत एव ॥

भा० । ता० । रोगवाला जो भृतक स्वस्थ होकर उसी प्रकार कर्म को करि दे जैसा पहिले उस से कहा था उस भृतक को अधिक काल के भी उस वेतन को प्राप्त हो सकता है २१६ ॥

यथोक्तमार्तःसुस्थोवायस्तत्कर्मनकारयेत्।नतस्यवेतनंदेयमल्पोनस्यापिकर्मणः २१७॥

प० । यथोक्तं आर्तः सुस्थः वा यः तत् कर्म न कारयेत् न तस्य वेतनं देयं अल्पोनस्य अपि कर्मणः ॥

यो० । यः आर्तः यथोक्तं तत् कर्म अन्येन न कारयेत् वा सुस्थः स्वयं न कुर्यात् अल्पोनस्य अपि कर्मणः वेतनं तस्य न देयम् ॥

भा० । ता० । जो मनुष्य दुःख की अवस्था में यथोक्त कर्म को किसी अन्यसे न करा दे और स्वस्थ अवस्था में स्वयं न करे उस मनुष्य को अल्प और कुछ न्यून काम का भी वेतन न दे २१७॥

एषधर्मोऽखिलेनोक्तोवेतनादानकर्मणः।अतऊर्ध्वंप्रवक्ष्यामिधर्मंसमयभेदिनाम् २१८॥

प० । एषः धर्मः अखिलेन उक्तः वेतनादानकर्मणः अतः ऊर्ध्वं प्रवक्ष्यामि धर्मं समयभेदिनाम् ॥

यो० । वेतनादानकर्मणः एषः धर्मः अखिलेनमया उक्तः अतः ऊर्ध्वं समयभेदिनां धर्मं प्रवक्ष्यामि ॥

भा०। ता०। वेतनादान (वेतन का ग्रहण) कर्म का यह सम्पूर्ण धर्म (व्यवस्था) मैंने कहा इससे आगे समयभेदि (व्यवस्था के अवलंबन करने वाले) यों का धर्म कहता हूं २१८॥

योग्रामदेशसंघानांकृत्वासत्येनसंविदम्।विसंवदेन्नरोलोभात्तंराष्ट्राद्विप्रवासयेत् २१९॥

प०। यः ग्रामदेशसंघानाँ कृत्वा सत्येन संविदं विसंवदेत् नरः लोभात् तं राष्ट्रात् विप्रवासयेत् ॥

यो०। यः नरः ग्रामदेशसंघानां सत्येन संविदं कृत्वा लोभात् विसंवदेत् राजा तं नरं राष्ट्रात् विप्रवासयेत् (निष्कासयेत्)॥

भा०। ता०। जो मनुष्य ग्राम देश और संग इनकी संविद संकेत वा प्रतिज्ञा को इस प्रकार की हम तुम मिलकर यह बात करेंगे इस का परित्याग करे सत्यादि शपथ (सौगन्द) पूर्वक करिके और उस संकेत से लोभ वश होकर विसंवाद करे अर्थात् अपनी प्रतिज्ञा पर न रहे उस मनुष्य को राजा अपने देश में से निकास दे २१९॥

निगृह्यदापयेच्चैनंसमयव्यभिचारिणम्।चतुःसुवर्णान्षण्निष्कांश्छतमानंचराजतम् २२०

प०। निगृह्य दापयेत् च एनं समयव्यभिचारिणं चतुःसुवर्णान् षट् निष्कान् शतमानं च राजतम् ॥

यो०। चपुनः समयव्यभिचारिणं एनं निगृह्य चतुःसुवर्णान् षट् निष्कान् चपुनः राजतं शतमानं राजा दापयेत् ॥

भा०। ता०। यदि देशसे न निकासे तो समयके व्यभिचारी इसका निग्रह (बांधना) करिके चारसुवर्ण छः निष्क और शतचांदी अर्थात् एकसौबीस१२० रत्तीका दण्डदे यह दण्ड कार्यकी लघुता और गौरव की अपेक्षा से न्यून वा अधिक दे २२०॥

एतद्दण्डविधिंकुर्याद्धार्मिकःपृथिवीपतिः।ग्रामजातिसमूहेषुसमयव्यभिचारिणाम् २२१

प०। एतद्दण्डविधिं कुर्यात् धार्मिकः पृथिवीपतिः ग्रामजातिसमूहेषु समयव्यभिचारिणाम् ॥

यो०। धार्मिकः पृथिवीपतिः ग्रामजातिसमूहेषु समयव्यभिचारिणां एतद्दण्डविधिं कुर्यात् ॥

भा०। ता०। धर्मशील राजा ग्राम और जाति के समूह में जो समय व्यभिचारी हैं उनके लिये भी इसी दण्ड विधि को करे २२१॥

क्रीत्वाविक्रीयवाकिञ्चिद्यस्येहानुशयोभवेत्।सोऽन्तर्दशाहात्तद्द्रव्यंदद्याच्चैवाददीतच २२२

प०। क्रीत्वा विक्रीय वा किंचित् यस्य इह अनुशयः भवेत् सः अन्तर्दशाहात् तत् द्रव्यं दद्यात् च एव आददीत च ॥

यो०। किंचिद्द्रव्यं क्रीत्वा वा विक्रीय यस्यइह अनुशयः भवेत् सः अन्तर्दशाहात् तद्द्रव्यं दद्यात् चपुनः आददीत ॥

भा०। ता०। किसी द्रव्य को मोललेकर वा बेंचकर जिसमनुष्यको लेने और देनेके विषयमें पश्चात्ताप की मैंने अच्छानहींबेंचा अथवा लिया वहमनुष्य दशदिनके भीतर उसद्रव्यकोदेदे अथवा लेले वहद्रव्य स्थिरार्न जिसका (लाभस्थिरहो) लाभ वहद्रव्य स्थिरहो अर्थात् भूमि वा तांबाआदि हो २२२॥

परेणतुदशाहस्यनदद्यान्नापिदापयेत्।आददानोददच्चैवराज्ञादण्ड्यःशतानिषट् २२३

प०। परेण तु दशाहस्य न दद्यात् न अपि दापयेत् आददानः ददत् च एव राज्ञा दंड्यः शतानि षट्

यो० । दशाहस्यपरेणतु न दद्यात् नापिदापयेत् चपुनः आददानः ददत् पुरुषः राज्ञा षट्शतानि दंड्यः भवेत् ॥

भा० । ता० । दशदिन के आगे न देय और न ले अर्थात् मोललियेहुये को नदे और बिकेहुये न फेरे जो ग्रहणकरता है और जो देता है उसको राजा छसै ६०० पणदंडदे २२३ ॥

यस्तुदोषवतींकन्यामनाख्यायप्रयच्छति।तस्यकुर्यान्नृपोदण्डंस्वयंपण्णवतिंपणान् २२४

प० । यः तु दोषवतीं कन्यां अनाख्याय प्रयच्छति तस्य कुर्यात् नृपः दंडं स्वयं पण्णवतिं पणान् ॥

यो० । यः पुरुषः दोषवतीं कन्यां अनाख्याय प्रयच्छति तस्यनृपः स्वयं पण्णवतिंपणान दंडंकुर्यात् ॥

भा० । जो मनुष्य दोषवाली कन्या के दोषको न कहिकर विवाहकरिदे तो उसकोराजा ९६ पण दंडदे ॥

ता० । जो मनुष्य दोषवती कन्याके दोषोंको नहींकह वरकोदेताहै उसमनुष्यको राजा स्वयं ९६ छयानबेपण दंडदे पहिले दोसै पांचके श्लोक में दंडदेना कहा है यहांपर जो कन्या के उन्मादआदि दोषोंको न कहकर विवाहकरदेता है तो उसको यह (९६ छयानबेपण) दंड होता है यह विशेष दंड कहा २२४ ॥

अकन्येतितुयःकन्यांब्रूयाद्द्वेषेणमानवः।सशतंप्राप्नुयाद्दण्डंतस्यादोषमदर्शयन् २२५ ॥

प० । अकन्या इति तु यः कन्यां ब्रूयात् द्वेषेण मानवः सः शतं प्राप्नुयात् दंडं तस्याः दोषं अदर्शयन् ॥

यो० । यः मानवः कन्यां द्वेषेण अकन्या इतिब्रूयात् सः तस्याः दोषं अदर्शयनसन शतं दंडं प्राप्नुयात् ॥

भा० । ता० । जो मनुष्य द्वेषसे कन्याको अकन्या कहै अर्थात् क्षतयोनि पुरुष के सम्बन्धवाली बतावे यदि वह उसकन्याके दोषको निश्चय न करादे तो राजा उसको सौपण दंडदे २२५ ॥

पाणिग्रहणिकामन्त्राःकन्यास्वेवप्रतिष्ठिताः।नाकन्यासुक्वचिन्नृणांलुप्तधर्मक्रियाहिताः २२६

प० । पाणिग्रहणिकाः मंत्राः कन्यासु एव प्रतिष्ठिताः न अकन्यासु क्वचित् नृणां लुप्तधर्मक्रियाः हि ताः

यो० । पाणिग्रहणिकाः मंत्राः कन्यासु एव प्रतिष्ठिताः भवंति क्वचिन्नृणां अकन्यासु न प्रतिष्ठिता हि (यतः) ताः (क्षतयोनयःकन्याः) लुप्तधर्मक्रियाः भवंति ॥

भा० । कन्याओं के लियेही मनुष्यों के विवाहकरने के मंत्रवेद में कहे हैं और अकन्याओंके लिये कहीं भी नहींकहे क्योंकि वेदोक्त मंत्रोंसे संस्कारकीहुई कन्या नष्टधर्महोती हैं ॥

ता० । पूर्वोक्त कन्याको अकन्या बतानेवालेको दंडदेना युक्तहै क्योंकि वेदोक्त मनुष्योंके इत्यादि[१] वेदोक्तमंत्र कन्याओं के विषयही व्यवस्थित हैं अर्थात् कन्याके निमित्त कहेगये हैं और अकन्याओं के निमित्तकहीं भी शास्त्र में धर्मविवाहके लिये नहीं है इससे विवाहके मंत्रों से संस्कारकीहुई भी क्षत-योनि नष्टधर्म विवाहवाली होती है अर्थात् उनका विवाह धर्मपूर्वक नहींहोता यहवचन क्षतयोनि कन्याके विवाहके मंत्र और होमका निषेधकरनेवालानहींहै क्योंकि गर्भवती और पुत्रवती कन्याओं का इन[२] दोवचनों से मनुजीही कहेंगे और देवलऋषिने तो इस[३] मंत्रसे गांधर्वविवाहोंमें भी होम

१ अर्यमणंनुदेवंकन्याअग्निमयक्षतः सनोअर्यमादेवप्रेतोमुंचतुमापतये स्वाहा ॥

२ यागर्भिणीसंस्क्रियते-वोढुःकन्यासमुद्भवम् ॥

३ गांधर्वेषुविवाहेषुपुनर्वैवाहिकोविधिः । कर्तव्यश्चत्रिभिर्वर्णैःसमयेनाग्निसाक्षिकः ॥

और मंत्रोंकी विधिकहीहै और गांधर्वविवाह प्रथमकन्या के संग गमनकरिकै पीछेसे होता है क्योंकि गांधर्व विवाहों में तीनों अग्नि साक्षिपूर्वक पुनः विवाहकी विधिकरै और मनु ने क्षत्रीको गांधर्व विवाह सुधर्म कहाहै इससे यह क्षतयोनि के विवाहको अधर्म का कथन क्षत्रीसे इतर द्विजोंमें समझना २२६ ॥

पाणिग्रहणिकामन्त्रानियतंदारलक्षणम्। तेषांनिष्ठातुविज्ञेयाविद्वद्भिःसप्तमेपदे २२७॥

प० । पाणिग्रहणिकाः मंत्राः नियतं दारलक्षणं तेषां निष्ठाः तु विज्ञेयाः विद्वद्भिः सप्तमे पदे ॥

यो० । पाणिग्रहणिकाः मंत्राः नियतं दारलक्षणं भवति तेषां मंत्राणां निष्ठा विद्वद्भिः सप्तमे पदे विज्ञेयाः ॥

भा० । विवाहके मंत्रही निश्चयसे भार्यात्वके उत्पादक हैं और उनकी सिद्धि विद्वानोंको सातवें पद (सप्तपदी) में जाननी ॥

ता० । पूर्वोक्त विवाहके मंत्रही निश्चयसे स्त्रीके लक्षण हैं अर्थात् उसस्त्रीमें भार्यात्वके संपादक हैं और उनमंत्रोंकी निष्ठा (सिद्धि) विद्वानोंको सातवेंपदमें इस मंत्रसे जाननी क्योंकि सप्तपदीके अनन्तरही भार्यात्व पैदाहोता है इससे यदि सप्तपदीसे पहिले किसीप्रकारकी कन्याके विषे वरको शंका होजाय तो उस कन्याको त्यागदे और सप्तपदी अनन्तर त्यागना अयोग्य है २२७ ॥

यस्मिन्यस्मिन्कृतेकार्येयस्येहानुशयोभवेत्। तमनेनविधानेनधर्मेपथिनिवेशयेत् २२८ ॥

प० यस्मिन् यस्मिन् कृते कार्ये यस्य इह अनुशयः भवेत् तं अनेन विधानेन धर्मे पथि निवेशयेत् ॥

यो० । यस्मिन २ कार्ये कृते सति यस्य इह अनुशयः भवेत् तं अनेन विधानेन राजा धर्मे पथि निवेशयेत् ॥

भा० । ता० । जिस २ कार्यके कियेपीछे जिस मनुष्यको पश्चात्तापहो उस मनुष्यको राजा इसी विधिसे धर्मके मार्ग में स्थापनकरे अर्थात् दशदिन के भीतरही वह उसकार्य से पृथक् होसकता है अनंतर नहीं २२८ ॥

पशुषुस्वामिनांचैवपालानांचव्यतिक्रमे। विवादंसंप्रवक्ष्यामियथावद्धर्मतत्त्वतः २२९ ॥

प० । पशुषु स्वामिनां च एवं पालानां च व्यतिक्रमे विवादं संप्रवक्ष्यामि यथावत् धर्मतत्त्वतः ॥

यो० । स्वामिनां चपुनः पालानां पशुषु व्यतिक्रमेसति धर्मतत्त्वतः यथावत् विवादं संप्रवक्ष्यामि ॥

भा० । ता० । पशुओंके स्वामी और पाले (ग्वालिया) का यदि पशुओंमें व्यतिक्रम होजाय तो उस विषयमें धर्मपूर्वक यथार्थ विवादकोमें कहताहूं अर्थात् पशुओंके नष्ट होजानेपर स्वामी वा पाल दोषका भागी होताहै इस निर्णयको कहताहूं २२९ ॥

दिवावक्तव्यतापालेरात्रौस्वामिनितद्गृहे। योगक्षेमेऽन्यथाचेत्तुपालोवक्तव्यतामियात् २३०

प० । दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे योगक्षेमे अन्यथा चेत् तु पालः वक्तव्यतां इयात् ॥

यो० । दिवायोगक्षेमे पालेवक्तव्यता रात्रौ तद्गृहे योगक्षेमे स्वामिनि वक्तव्यता भवति चेत् अन्यथा पालः वक्तव्यतां इयात् ॥

१ एकमिषेद्वेऊर्जे त्रीणिरायस्पोषाय चत्वारिमायोभवाय पंचपशुभ्यः षड्ऋतुभ्यः सखासप्तपदीभव ॥

भा० । दिनमें पशुओंके योग क्षेमकी विपरीतता होनेसे ग्वालिया और रात्रिमें स्वामी दोषका भागीहोता है जो रात्रिमें भी ग्वालियेकेही आधीनहों तो ग्वालिया दोषकाभागी होताहै ॥

ता० । यदि दिनमें स्वामी अपने गौ आदि पशुओंको ग्वालियेके हाथमें सौंपदे और उनके योग क्षेममें कोईवस्तु अन्यथा होजाय वा नष्टहोजाय तो ग्वालिया दोषका भागी होता है और संध्याके समय ग्वालियेके सौंपनेपर यदि स्वामीके घरमें विद्यमान पशुओं को रात्रिसमय योगक्षेममें अन्यथा भावहोजाय अर्थात् चोरी होजाय वा मरिजाय तो स्वामीही दोषकाभागी होता है अर्थात् ग्वालिया निर्दोषहै यदि रात्रिमें पशु ग्वालियेकेही आधीन रहतेहों तो ग्वालियाही दोषका भागीहोताहै २३०॥

गोपःक्षीरभृतोयस्तुसदुह्याद्दशतोवराम्। गोस्वाम्यनुमतेभृत्यःसास्यात्पालेऽभृतेभृतिः २३१

प० । गोपः क्षीरभृतः यः तु सः दुह्यात् दशतः वराम् गोस्वाम्यनुमते भृत्यः सा स्यात् पाले अभृते भृतिः ॥

यो० । यः गोपः क्षीरभृतः भवति सः भृत्यः गोस्वाम्यनुमते दशत (दशसु) वरां (श्रेष्ठां गां)दुह्यात्—सा अभृते पाले भृतिः स्यात् ॥

भा० । ता० । जिस ग्वालियेकी दूधही भृति (नौकरीहो) वह भृत्य गौओंके स्वामीकी अनुमतिसे दशगौओंमेंसे श्रेष्ठ एकगौको दुहिले यही द्रव्यकी भृतिसे हीन ग्वालियेकी भृतिहोतीहै अर्थात् एकगौके दूधको लेकर ग्वालिया दशगौओंकी रक्षाकरे २३१ ॥

नष्टंविनष्टंकृमिभिःश्वहतंविषमेमृतम् । हीनंपुरुषकारेणप्रदद्यात्पालएवतु २३२ ॥

प० । नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतं हीनं पुरुषकारेण प्रदद्यात् पालः एव तु ॥

यो० । नष्टं कृमिभिः विनष्टं श्वहतं विषममृतं पुरुषकारेणहीनं पशुंपालःएव स्वामिने प्रदद्यात् ॥

भा० । ता० । जो पशु नष्टहोजाय अर्थात् जिसको ग्वालिया अपने आंखोंके सामने न रक्खे वहकहीं चलाजाय और जिसको कृमि (कीट) नष्टकरिदें अथवा जिसको श्वानमारिदे और जो विषमदेशमें (ऊंचेनीचेसे) मरजाय और जो ग्वालियेके पुरुषार्थ न करनेसे नष्टहोजाय ऐसे पशुको ग्वालियाही पशुके स्वामीकोदे २३२ ॥

विघुष्यतुहृतंचौरैर्नपालोदातुमर्हति । यदिदेशेचकालेचस्वामिनःस्वस्यशंसति २३३ ॥

प० । विघुष्य तु हृतं चौरैः न पालः दातुं अर्हति यदि देशे च काले च स्वामिनः स्वस्य शंसति ॥

यो० । यदि देशे चपुनः काले स्वस्य स्वामिनः पालः शंसति नहि चौरैः विघुष्य हृतंपशुं पालः दातुं न अर्हति ॥

भा० । ता० यदि घोषणादेकर अर्थात् ढँढोरेसे इह विदित करिके कि अमुक समय में तेरे पशुकी हम चोरी करेंगे जिस पशुको चोरोंने हराहो तो उसपशुको ग्वालिया देनहीं सकता जो समीपदेशमें रहते अपने स्वामीको हरनेके अनन्तरही जाकर कहिदे २३३ ॥

कर्णौचर्मचवालांश्चबस्तिस्नायुंचरोचनाम्। पशुषुस्वामिनांदद्यान्मृतेष्वंगानिदर्शयेत् २३४ ॥

प० । कर्णौ चर्म च वालान् च बस्तिं स्नायुं च रोचनां पशुषु स्वामिनां दद्यात् मृतेषु अंगानि दर्शयेत् ॥

यो० । गोपालपशुषु मृतेषु कर्णौ चर्म वालान् बस्तिं स्नायुं रोचनां स्वामिनां दद्यात् चपुनः अंगानि शृंगखुरादीनि दर्शयेत् ॥

भा० । ता० । पशुओंके मरनेपर ग्वालिया पशुके स्वामियोंको कान चर्म—बाल—बस्ति स्नायु—गोरोचन इनकोदेदे और शृंग खुरआदि अन्य अंगोंको भी स्वामीको दिखादे २३४ ॥

अजाविकेतुसंरुद्धेवृकैःपालेत्वनायति।यांप्रसह्यवृकोहन्यात्पालेतत्किल्बिषम्भवेत् २३५ ॥

प० । अजाविके तु संरुद्धे वृकैः पाले तु अनायति यां प्रसह्य वृकः हन्यात् पाले तत् किल्बिषम् भवेत् ॥

यो० । वृकैः अजाविके संरुद्धे सति पाले अनायति सति यां अजां वा एडकां प्रसह्यवृकः हन्यात् तत् किल्बिषं पाले भवेत् ॥

भा० । ता० । यदि बकरी और भेड़ोंको वृक (भिड़िहा) रोकले और ग्वालिया उनके बचानेको न आवै और जिसबकरी वा भेड़को वृकवलसे मारिदे तो उसके दोषकाभागी ग्वालियाहोताहै २३५॥

तासांचेदवरुद्धानांचरन्तीनांमिथोवने।यामुत्प्लुत्यवृकोहन्यान्नपालस्तत्रकिल्बिषी२३६॥

प० । तासां चेत् अवरुद्धानां चरंतीनां मिथः वने यां उत्प्लुत्य वृकः हन्यात् न पालः तत्र किल्बिषी ॥

यो० । चेत् (यदि) अवरुद्धानां वनेमिथः चरंतीनां तासांमध्ये यां (अजांएडकांवा) वृकःप्रसह्य हन्यात् तत्किल्बिषं पालेभवेत् ॥

भा० । ता० । यदि ग्वालियेने चारोतरफसे रोकीहुई और मिलकर वनमें चुगतीहुई बकरी और भेड़ोंके बीचमेंसे किसी एक बकरी व भेड़को बलात्कारसे कूदकर वृक (भिड़िहा) मारदे तो उसके दोषका भागी ग्वालियाहोता है २३६ ॥

धनुःशतंपरीहारोग्रामस्यस्यात्समन्ततः।शम्यापातास्त्रयोवापित्रिगुणोनगरस्यतु २३७

प० । धनुःशतं परीहारः ग्रामस्य स्यात् समंततः शम्या पाताः त्रयः वा अपि त्रिगुणः नगरस्य तु ॥

यो० । ग्रामस्य समंततः धनुःशतं वा त्रयः शम्या पाताः परीहारःस्यात् नगरस्यतु पूर्वोक्ताः त्रिगुणःपरीहारःस्यात् ॥

भा० । ग्रामके समिप चारसै धनुष अथवा लाठी जहांतक तीनबार फेकनेसे पहुंचे उतना परीहार होताहै और नगरके समीप इससे तिगुना होताहै ॥

ता० । ग्रामकी चारोदिशामें सौ धनुषका परीहारहोता है अर्थात् सौ धनुषपर्यंत ग्रामके समीप की भूमि जोतनी नहीं चाहिये और चारहाथका एकधनुष होताहै अथवा जितनी दूरतक साधारण मनुष्य शम्या (लकड़ी) को तीनबार फेके उतनी दूरतक ग्रामके समीप परीहार होताहै इतनी भुमि पशुओंके चरनेकेलिये राजा छोड़वादे और किसीको जोतने न दे और नगर (शहर) के समीप पूर्वोक्तसे तिगुना परीहारहोता है २३७ ॥

तत्रापरिवृतंधान्यंविहिंस्युःपशवोयदि।नतत्रप्रणयेद्दण्डंनृपतिःपशुरक्षिणाम् २३८ ॥

प० । तत्र अपरिवृतं धान्यं विहिंस्युः पशवः यदि न तत्र प्रणयेत् दण्डं नृपतिः पशुरक्षिणाम् ॥

यो० । यदि तत्र अपरिवृतं धान्यं पशवःविहिंस्युः तर्हि नृपतिः तत्र पशुरक्षिणां दंडं न प्रणयेत् ॥

भा० । ता० । जो उस परिहारमें अपरिवृत (जिसकी चारोतरफसे वाडनकीहो) खेतको पशु भक्षण करिले तो राजा पशुओंकी रक्षाकरनेवालेको दण्डनदे २३८ ॥

वृतिंतत्रप्रकुर्वीतयामुष्ट्रोनविलोकयेत् । छिद्रंचवारयेत्सर्वंश्वसूकरमुखानुगम् २३९ ॥

प० । वृतिं तत्र प्रकुर्वीत यां उष्ट्रः न विलोकयेत् छिद्रं च वारयेत् सर्वं श्वसूकरमुखानुगम् ॥

यो० । तत्र (परिहारक्षेत्रे) यां उष्ट्रः न विलोकयेत्तांवृतिं प्रकुर्वीत चपुनः श्वसूकरमुखानुगं छिद्रं वारयेत् ॥

भा० । ता० । उसपरिहारकी खेतकी ऐसी वृति (वाड) करे जिससे बाहर खड़ाहुआ ऊंट खेत को न देखसके और उसकां टोंकी वृतिमें जो ऐसे छिद्रहों जिनमें कुत्ते और सूकरका मुख प्रविष्टहोसके उनसब छिद्रोंको न रहनेदे २३९ ॥

पथिक्षेत्रेपरिवृतेग्रामान्तीयेऽथवापुनः । सपालःशतदण्डार्होविपालान्वारयेत्पशून् २४०

प० । पथि क्षेत्रे परिवृते ग्रामांतीये अथवा पुनः सः पालः शतदण्डार्हः विपालान् वारयेत् पशून्

यो० । पथिक्षेत्रे अथवा ग्रामांतीये परिवृतेसति यदि पशुःप्रविश्य भक्षयति तदापालः शतदण्डार्होभवति विपालान् पशून् स्वामी वारयेत् ॥

भा० । यदि मार्ग वा ग्रामके समीप वाड कियेहुये खेतको पशुभक्षणकरिलें तो ग्वालिया सौ पणदंडके योग्यहोताहै यदि पशुकेसमीप ग्वालियानहो तो खेतकारक्षक पशुको स्वयं निकासदे ॥

ता० । मार्गके समीपके खेतमें अथवा ग्रामके परिवृत (पूर्वोक्त वाड जिसकी लगीहोय) परिहारके खेतमें यदि पशु प्रविष्ट होकर खेतको भक्षणकरिलें तो ग्वालिये को राजा सौपणदंडदे यदि पशुओंके समीप ग्वालियानहो और पशु खेतको भक्षणकरिरहेहों तो खेतकास्वामी पशुओंको निकालदे यहांपर पशुको निर्दोपहोने से ग्वालियेकोही दंडकहाहै २४० ॥

क्षेत्रेष्वन्येषुतुपशुःसपादंपणमर्हति । सर्वत्रतुसदोदेयःक्षेत्रिकस्येतिधारणा २४१ ॥

प० । क्षेत्रेषु अन्येषु तु पशुः सपादं पणं अर्हति सर्वत्र तु सदा देयः क्षेत्रिकस्य इति धारणा ॥

यो० । अन्येषुक्षेत्रेषु (मार्गग्रामसमीपक्षेत्रभिन्नेषु) सस्यं भक्षयनपशुः (पशुस्वामी) सपादं पणंदंडं अर्हति—सर्वत्र (सर्वस्मिनक्षेत्रे भक्षितेसति) क्षेत्रिकस्य क्षेत्रफलं पालेन स्वामिनावादेयः इतिधारणा मर्यादा अस्ति ॥

भा० । ता० । मार्ग और ग्रामके परिहार से भिन्नखेतों को जो पशु भक्षणकरिले तो उसपशुके स्वामीको सवापण राजा दंडदे यदि सम्पूर्ण क्षेत्रकोही पशुभक्षणकरिलें तो उसखेतके फलको ग्वालिया अथवा पशुकास्वामी अपराध के अनुसार खेतके स्वामीको दे यहीनिश्चय है २४१ ॥

अनिर्दशाहांगांसूतांवृपान्देवपशूंस्तथा । सपालान्वाविपालान्वानदण्ड्यान्मनुरब्रवीत् २४२

प० । अनिर्दशाहां गां सूतां वृपान् देवपशून् तथा सपालान् वा विपालान् वा न दंड्यान् मनुः अब्रवीत् ॥

यो० । अनिर्दशाहां सूतां गां सपालान् वा विपालान् वृपान् तथा देवपशून् न दंड्यान् मनुः अब्रवीत् ॥

भा० । ता० । दशदिन के भीतरकी प्रसूतगौ और चक्र और शूलसे अंकित छोड़ेहुये बैल और विष्णु और महादेवआदि प्रतिमाओं के पशु ये चाहे ग्वालिये सहित वा रहितहोकर जो किसी के खेतको भक्षणकरनेलगें तो इनकास्वामी दंडके अयोग्यहोताहै यह मनुजीनेकहाहै २ छोड़ेहुये बैलों कोभी गौओं के गर्भार्थ ग्वालिये गोकुल ८ गोसमूह) में रखते हैं इससे उनको भी सपालकहना ठीकहै २४२ ॥

क्षेत्रियस्यात्ययेदण्डोभागाद्दशगुणोभवेत् । ततोऽर्द्धदण्डोभृत्यानामज्ञानात्क्षेत्रियस्यतु २४३॥

प० । क्षेत्रियस्य अत्यये दंडः भागात् दशगुणः भवेत् ततः अर्द्धदंडः भृत्यानां अज्ञानात् क्षेत्रियस्य तु

यो० । क्षेत्रियस्य अत्यये सति भागात् दशगुणःदंडः क्षेत्रियस्यतु अज्ञानात् भृत्यानां ततः अर्द्धदंडो भवेत् ॥

भा० । ता० । यदि क्षेत्रकास्वामी अपने पशुसे क्षेत्रको नष्टकरिदे तो उसखेतके नाशसे जितने राजाके करकी हानिभईहो उससे दशगुना दंड क्षेत्रके स्वामीको होताहै यदि क्षत्रके स्वामिको ज्ञान (खबर) नहो और भृत्योंके अपराधसे खेत नष्टहुआहो तो उसपूर्वोक्त दंडसे आधादंड खेतके स्वामी को होताहै २४३ ॥

एतद्विधानमातिष्ठेद्धार्मिकःपृथिवीपतिः । स्वामिनांचपशूनांचपालानांचव्यतिक्रमे २४४ ॥

प० । एतद्विधानं आतिष्ठेत् धार्मिकः पृथिवीपतिः स्वामिनां च पशूनां च पालानां च व्यतिक्रमे ॥

यो० । स्वामिनां चपुनः पशूनां चपुनः पालानां व्यतिक्रमे (अपराधे सति) धार्मिकः पृथिवीपतिः एतद्विधानं आतिष्ठेत् (कुर्यात्) ॥

भा० । ता० । स्वामी और पशु और ग्वालिये इनके अपराधकरनेपर अर्थात् खेतकेभक्षणमें धर्म का जाननेवाला राजा इसपूर्वोक्त विधिकोकरै अथवा पूर्वोक्तरीतिसे दंडदे २४४ ॥

सीमांप्रतिसमुत्पन्नेविवादेग्रामयोर्द्वयोः । ज्येष्ठेमासिनयेत्सीमांसुप्रकाशेषुसेतुषु २४५ ॥

प० । सीमां प्रति समुत्पन्ने विवादे ग्रामयोः द्वयोः ज्येष्ठे मासि नयेत् सीमां सुप्रकाशेषु सेतुषु ॥

यो० । द्वयोः ग्रामयोः सीमां प्रति विवादे समुत्पन्ने सति ज्येष्ठमासे सेतुषु (सीमाचिह्नेषु) सुप्रकाशेषु सत्सु राजासीमां नयेत् (निश्चनुयात्) ॥

भा० । ता० । यदि दोग्रामों का सीमाकेलिये विवाद उत्पन्नहोय तो ज्येष्ठ के महीने में सीमाके चिह्नों के प्रकटहोनेपर राजा सीमा का निश्चयकरै २४५ ॥

सीमावृक्षांश्चकुर्वीतन्यग्रोधाश्वत्थकिंशुकान्।शाल्मलीन्सालतालांश्चक्षीरिणश्चैवपादपान्२४६

प० । सीमावृक्षान् च कुर्वीत न्यग्रोधाश्वत्थकिंशुकान् शाल्मलीन् सालतालान् च क्षीरिणः च एव पादपान् ॥

यो० । न्यग्रोधाश्वत्थकिंशुकान् शाल्मलीन् सालतालान् चपुनः क्षीरिणः पादपान् सीमावृक्षान् राजा कुर्वीत ॥

भा० । ता० । बड़–पीपल–ढाक–सेमल–साल–ताल–और दूधवाले गूलरआदि वृक्ष इनको राजा सीमाके वृक्षकरै अर्थात् जहां दोनोंग्रामों की सीमाहों वहांपर इनको लगादे २४६ ॥

गुल्मान्वेणूंश्चविविधाञ्छमीवल्लीस्थलानिच।शरान्कुब्जकगुल्मांश्चतथासीमाननश्यति२४७

प० । गुल्मान् वेणून् च विविधान् शमीवल्लीस्थलानि च शरान् कुब्जकगुल्मान् च तथा सीमा न नश्यति ॥

यो० । गुल्मान् चपुनः विविधान् वेणून् चपुनः शमीवल्लीस्थलानि शरान् चपुनः कुब्जकगुल्मान् (सीमाचिह्नान्) कुर्वीत तथा सीमाननश्यति ॥

भा० । ता० । गुल्म (जिनकेडाले न होयँ) और अनेकप्रकारके वेणूअर्थात् अधिक वा अल्प

काँटेवाले और शमी और लता और स्थल (ऊंचे २ टीले) और शर और कुब्जक गुल्म इनसबको राजा सीमाके चिह्नकरे क्योंकि इसप्रकार करनेसे सीमा नष्टनहींहोसक्ती २४७ ॥

तडागान्युदपानानिवाप्यःप्रस्रवणानिच । सीमासंधिषुकार्याणिदेवतायतनानिच २४८ ॥

प० । तडागानि उदपानानि वाप्यः प्रस्रवणानि च सीमासंधिषु कार्याणि देवतायतनानि च ॥

यो० । तडागानि उदपानानि वाप्यः प्रस्रवणानि चपुनः देवतायतनानि सीमासंधिषु राज्ञा कार्याणि ॥

भा० । ता० । तलाव—कूप—वापी—(बावडी) प्रस्रवण (जलकीकूल) देवताके मंदिर इनको सीमाकी संधियों (मेल) में राजाकरै क्योंकि ये जब सीमा के निर्णयकेलिये प्रसिद्धकरिदियेजायँगे तो इनमें जलआदि लेनेकेलिये जो जन आवेंगे वे परम्परा के सुननेसे बहुतदिन पीछे भी सीमाके निर्णयमें साक्षीहोजायँगे २४८ ॥

उपच्छन्नानिचान्यानिसीमालिंगानिकारयेत् ।सीमाज्ञानेनृणांवीक्ष्यनित्यंलोकेविपर्ययम् २४९

प०।उपच्छन्नानि च अन्यानि सीमालिंगानि कारयेत् सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययम्॥

यो० । सीमाज्ञाने नृणां लोके नित्यं विपर्ययं वीक्ष्य अन्यानि उपच्छन्नानि सीमालिंगानि राजा कारयेत् ॥

भा० । ता० । सीमा के निर्णयमें मनुष्यों का सदासे भ्रमको देखकर राजा गुप्त अन्यभी सीमाके चिह्नोंको करिदे कि २४९ ॥

अश्मनोऽस्थीनिगोवालांस्तुषान्भस्मकपालिकाः।करीषमिष्टकांगाराञ्छर्करावालुकास्तथा २५०

यानिचैवंप्रकाराणिकालाद्भूमिर्नभक्षयेत् । तानिसंधिषुसीमायामप्रकाशानिकारयेत् २५१

प० । अश्मनः अस्थीनि गोवालान् तुषान् भस्मकपालिकाः करीषं इष्टकांगारान् शर्कराः वालुकाः तथा

प० । यानि च एवं प्रकाराणि कालात् भूमिः न भक्षयेत् तानि संधिषु सीमायां अप्रकाशानि कारयेत् ॥

यो० । अश्मनः अस्थीनि गोवालान् तुषान् भस्मकपालिकाः करीषं इष्टकांगारान् शर्कराः तथा वालुकाः चपुनः एवं प्रकाराणि यानि भूमिकालात् नभक्षयेत् तानि संधिषु सीमायां राजा अप्रकाशानिकारयेत् ॥

भा० । बनाहुआ पत्थर गोवाल भस्म तुष कपालिका सूखा गोबर पक्कीईंट पत्थरका कंकर कोले रेत और जो ऐसी वस्तुहैं जिनको चिरकालतक भी पृथ्वी न खासके उनसबको अर्थात् अंजन विनोले आदिकों को संधिकी सीमामें गुप्तप्रकारसे राजा घटआदि में रखकर पृथ्वीमेंगाडिदे ॥

ता० । पत्थरके टुकड़े गौओं के बाल भस्म—कपालिका—सूखागोबर पक्कीईंट—अंगार (कोले) शर्करा पत्थर की कंकरी) बालु रेत इनको और इन्हींकेसदृश अंजन अस्थिआदि जिनको चिरकाल तक भी पृथ्वी भक्षण न करिसके अर्थात् अपने में न मिलासके उनको संधिकी सीमा में गुप्तकरिकै राजा रखिदे अर्थात् घड़ोंमें इनको रखकर उनघटोंको पृथ्वीमें खोदकर और छिपकरगाडिदे क्योंकि इस[1] बृहस्पति के वचनसे घडों में रखकरही पृथ्वीमें गाडना लिखाहै २५० । २५१ ॥

---

१ प्रक्षिप्यकुंभे ष्वेतानि सीमांतेषुनिधापयेत् ॥

एतैर्लिङ्गैर्नयेत्सीमांराजाविवदमानयोः। पूर्वभुक्त्याचसततमुदकस्यागमेनच २५२ ॥

प० । एतैः लिंगैः नयेत् सीमां राजा विवदमानयोः पूर्वभुक्त्या च सततं उदकस्य आगमेन च ॥

यो० । राजा विवदमानयोः ग्रामयोः सीमां एतैः लिंगैः चपुनः पूर्वभुक्त्या चपुनः सततं उदकस्य आगमेन नयेत् (निश्चिनुयात्) ॥

भा० । ता० । विवादकरतेहुये ग्रामोंकी सीमाको इनपूर्वोक्त चिह्नोंसे और सदासे वसतेहुये ग्रामों के पहिली भुक्तिसे अर्थात् जोतने और बोनेसे और जो ग्रामोंकी सीमापर निरन्तर जलका प्रवाह बहताहोय तो उससे राजा पार और अपाररहतेहुये ग्रामोंकी सीमाको निश्चयकरै २५२ ॥

यदिसंशयएवस्याल्लिङ्गानामपिदर्शने।साक्षिप्रत्ययएवस्यात्सीमावादविनिर्णयः २५३

प० । यदि संशयः एव स्यात् लिंगानां अपि दर्शने साक्षिप्रत्ययः एव स्यात् सीमावादविनिर्णयः ॥

यो० । यदि लिंगानां दर्शने अपि सति सीमायां संशयः एवस्यात् तदा साक्षिप्रत्ययः एव सीमावादविनिर्णयः स्यात् ॥

भा० । ता० । जो गुप्त और प्रकाश सीमा के लिंगोंके देखनेपर भी सीमामें सन्देहही हो अर्थात् गुप्तअंगार आदि दूसरेस्थानमें खोदकर गाडिदियेहों और प्रसिद्ध वटआदि वृक्षोंमें कोई किसी को बतावे कोई किसीको तो सीमा के विवाद में साक्षियोंकी प्रतीतिसेही राजा निर्णयकरै २५३ ॥

ग्रामीयककुलानांचसमक्षंसीम्निसाक्षिणः। प्रष्टव्याःसीमलिंगानितयोश्चैवविवादिनोः २५४॥

प० । ग्रामीयककुलानां च समक्षं सीम्नि साक्षिणः प्रष्टव्याः सीमलिंगानि तयोः च एव विवादिनोः

यो० । ग्रामीयककुलानां चपुनः तयोः सीम्नि विवादिनोः समक्षं राज्ञा साक्षिणः सीमलिंगानि प्रष्टव्याः ॥

भा० । ता० । ग्राममें रहनेवाले मनुष्योंके और सीमा में विवादकरतेहुये उनदोनों के सन्मुख सीमाके चिह्नोंको राजा साक्षियोंसे पूंछै २५४ ॥

तेपृष्टास्तुयथाब्रूयुःसमस्ताःसीम्निनिश्चयम्।निबध्नीयात्तथासीमांसर्वांस्तांश्चैवनामतः २५५

प० । ते पृष्टाः तु यथा ब्रूयुः समस्ताः सीम्नि निश्चयं निबध्नीयात् तथा सीमां सर्वान् तान् च एव नामतः ॥

यो० । राज्ञा पृष्टाः समस्ताः ते (साक्षिणः) सीम्नियथानिश्चयं ब्रूयुः तथा सीमां चपुनः नामतः तान सर्वान राजा निबध्नीयात् ॥

भा० । ता० । राजा के पूंछेहुये वे सम्पूर्ण साक्षि जिसप्रकार सीमाका निश्चयकहैं उसी प्रकार सीमाको और उनसम्पूर्ण साक्षियों के नामों को राजा एकपत्रपर लिखदे २५५ ॥

शिरोभिस्तेगृहीत्वोर्वींस्रग्विणोरक्तवाससः। सुकृतैःशापिताःस्वैस्स्वैर्नयेयुस्तेसमञ्जसम् २५६

प० । शिरोभिः ते गृहीत्वा उर्वीं स्रग्विणः रक्तवाससः सुकृतैः शापिताः स्वैः स्वैः नयेयुः ते समंजसम् ॥

यो० । स्रग्विणः रक्तवाससः स्वैः स्वैः सुकृतैः शापिताः ते (साक्षिणः) शिरोभिः उर्वीं गृहीत्वा तां (सीमां) समंजसं नयेयुः ॥

भा० । ता० । रक्तफूलों की माला धारण और रक्तवस्त्रों को पहनकर अपने २ सुकृतोंकी सौगंद

अर्थात् यदि हम झूंठकहें तो हमारापुण्य निष्फलहोजावे सौगन्ददी है जिनको ऐसे वे साक्षी अपने शिरपर पृथ्वीको रखकर अर्थार्थ रीतिसे सीमाका निर्णयकरें यहांपर इसे याज्ञवल्क्य के वचनानुसार रक्तपुष्पों कीही माला समझनी २५६ ॥

यथोक्तेननयन्तस्तेपूयन्तेसत्यसाक्षिणः । विपरीतंनयन्तस्तुदाप्याःस्युर्द्विशतंदमम् २५७ ॥

प० । यथोक्तेन नयन्तः ते पूयंते सत्यसाक्षिणः विपरीतं नयन्तः तु दाप्याः स्युः द्विशतं दमम् ॥

यो० । यथोक्तेन नयंतः ते सत्यसाक्षिणः पूयंते विपरीतं नयंतः तु द्विशतंदमं राज्ञा दाप्याः स्युः ॥

भा० । ता० । शास्त्रोक्त विधिकेअनुसार निर्णय करतेहुये वे सच्चेसाक्षी पवित्रहोतेहैं और विपरीत (झूंठा) रीतिसे निर्णयकरतेहुये साक्षियोंको दोसे पण दंड राजादे २५७ ॥

साक्ष्यभावेतुचत्वारोग्रामाः सामन्तवासिनः । सीमाविनिर्णयंकुर्युःप्रयताराजसन्निधौ २५८

प० । साक्ष्यभावे तु चत्वारः ग्रामाः सामंतवासिनः सीमाविनिर्णयं कुर्युः प्रयताः राजसन्निधौ ॥

यो० । साक्ष्यभावे सति तु सामंतवासिनः चत्वारः ग्रामाः प्रयताः संतः राजसंनिधौ सीमाविनिर्णयं कुर्युः ॥

भा० । ता० । यदि साक्षियों का अभावहो तो समीप में बसनेवाला चारग्राम साक्षिके धर्म में टिककर सावधानी से राजाके समीप (सन्मुख) सीमाके निर्णयकोकरें २५८ ॥

सामन्तानामभावेतुमौलानांसीम्निसाक्षिणाम् । इमानप्यनुयुञ्जीतपुरुषान्वनगोचरान् २५९

प० । सामंतानां अभावे तु मौलानां सीम्नि साक्षिणां इमान् अपि अनुयुंजीत पुरुषान् वनगोचरान् ॥

यो० । सीम्निसाक्षिणां सामंतानां मौलानां अभावेसति तु इमान् अपि वनगोचरान् पुरुषान् साक्षिधर्मेण राजा अनुयुंजीत ॥

भा० । ता० । यदि उक्त चारग्राम और ग्राममें सदासे रहनेवाले भी साक्षियोंका अभावहोय तो वनमें विचरनेवाले इन (जो आगे कहते हैं) मनुष्यों को राजा पूंछे २५९ ॥

व्याधाञ्छाकुनिकान्गोपान्कैवर्तान्मूलखानकान् । व्यालग्राहानुञ्छवृत्तीनन्यांश्चवनचारिणः२६०

प० । व्याधान् शाकुनिकान् गोपान् कैवर्तान् मूलखानकान् व्यालग्राहान् उञ्छवृत्तीन् अन्यान् च वनचारिणः ॥

यो० । राजा व्याधान् शाकुनिकान् गोपान् कैवर्तान् मूलखानकान् व्यालग्राहान् उञ्छवृत्तीन् चपुनः अन्यान् वनचारिणः सीमां पृच्छेत् ॥

भा० । ता० । व्याध–शाकुनिक–(जो पक्षियों के मारनेसे जीवे) गोपाल–कैवर्त–(मत्स्योंसे जीवे) मूलोंके खोदनेवाले सर्पोंकेग्राही–उञ्छवृत्ति इनको और फलफूल ईंधन इनकेलिये वनमें विचरनेवाले अन्यपुरुषों को सीमा का निर्णय पूंछे क्योंकि यह सम्पूर्ण उग्रग्रामों में होकर सदा वनमें जाते हैं इससे इनको सीमा का ज्ञान होताहै २६० ॥

तेपृष्टास्तुयथाब्रूयुःसीमासन्धिषुलक्षणम् । तत्तथास्थापयेद्राजाधर्मेणग्रामयोर्द्वयोः२६१॥

प० । ते पृष्टाः तु यथा ब्रूयुः सीमासंधिषु लक्षणं तत् तथा स्थापयेत् राजा धर्मेण ग्रामयोः द्वयोः ॥

---

१ रक्तस्रग्वाससः सीमां नयेयुः ॥

यो० । पृष्टाः ते(व्याधादयः) सीमासंधिषु यथालक्षणं ब्रूयुः तत् (लक्षणं) राजा द्वयोः ग्रामयोः सीमायां धर्मेण स्थापयेत् ॥

भा० । ता० । राजा के पूंछे हुये ग्राम के मनुष्य सीमा की सन्धियों में जिस प्रकार के चिह्न को कहैं उसी प्रकार उस चिह्न को दोनों ग्रामों की सीमा में धर्म से राजा स्थापन करै अर्थात् उनके बताये हुये चिह्न सेही सीमा का निर्णय करे २६१ ॥

क्षेत्रकूपतडागानामारामस्यगृहस्यच । सामन्तप्रत्ययोज्ञेयःसीमासेतुविनिर्णयः २६२ ॥

प० । क्षेत्रकूपतडागानां आरामस्य गृहस्य च सामन्तप्रत्ययः ज्ञेयः सीमासेतुविनिर्णयः ॥

यो० । क्षेत्रकूपतडागानां आरामस्य चपुनः गृहस्य सामन्तप्रत्ययः सीमासेतुविनिर्णयः ज्ञेयः ॥

भा० । ता० । एक ग्राम के क्षेत्र-(खेत) कूप तडाग-आराम (बाग) और घर इनकी सीमा का निर्णय सम्पूर्ण देशवासियों की साक्षियों सेही राजा जानले अर्थात् पूर्वोक्त व्याध आदिकों की साक्षि से न करे २६२ ॥

सामन्ताश्चेन्मृषाब्रूयुःसेतौविवदतांनृणाम्।सर्वेपृथक्पृथग्दण्ड्याराज्ञामध्यमसाहसम् २६३

प० । सामन्ताः चेत् मृषा ब्रूयुः सेतौ विवदतां नृणां सर्वे पृथक् पृथक् दण्ड्याः राज्ञा मध्यमसाहसम् ॥

यो० । चेत् सेतौ विवदतांनृणां सामन्ताः मृषाब्रूयुः तर्हि राज्ञा सर्वे पृथक् पृथक् मध्यम साहसं दण्ड्याः ॥

भा० । ता० । यदि सीमा की सेतु (मर्यादा) के लिये विवाद करते हुये मनुष्यों के सामन्त (देशवासी) साक्षी में झूंठ बोलें तो उन सम्पूर्णों को राजा एक एक के प्रति मध्यम साहस दण्ड दे-और जो वे साक्षि अन्य देशवासी होयँ तो दो सौ पण दण्ड दे २६३ ॥

गृहंतडागमारामंक्षेत्रंवाभीषयाहरन् । शतानिपञ्चदण्ड्यःस्यादज्ञानाद्द्विशतोदमः २६४

प० । गृहं तडागं आरामं क्षेत्रं वा भीषया हरन् शतानि पञ्च दण्ड्यः स्यात् अज्ञानात् द्विशतः दमः ॥

यो० । अन्यस्य गृहं तडागं आरामं वा क्षेत्रं भीषया हरन् पुरुषः पञ्चशतानि राज्ञा दण्ड्यः स्यात् अज्ञानात् हरन् द्विशतो दमोज्ञेयः ॥

भा० । ता० । जो मनुष्य किसी के घर तडाग-आराम वा खेत को किसी प्रकार का भय दिखाकर हरि ले तो राजा उसे पांचसौ पण दण्ड दे यदि वह अज्ञान से हरै तो दोसौ पण दण्डदे२६४॥

सीमायामविषह्यायांस्वयंराजैवधर्मवित् । प्रदिशेद्भूमिमेतेषामुपकारादितिस्थितिः २६५

प० । सीमायां अविषह्यायां स्वयं राजा एव धर्मवित् प्रदिशेत् भूमिं एतेषां उपकारात् इति स्थितिः ॥

यो० । सीमायां अविषह्यायां सत्यां धर्मवित् राजा एतेषां उपकारात् स्वयं एव भूमिं प्रदिशेत् इति स्थितिः (शास्त्रव्यवस्था अस्ति) ॥

भा० । ता० । यदि सीमा के चिह्न में साक्षियों के अभावसे सीमा का निश्चय न होसके तो धर्मज्ञ अर्थात् पक्षपात से रहित राजाही दोनों ग्रामके विवाद के कारण भूमि को इनके उपकार को जानकर इनकोही दे दे अर्थात् दोनों को बांट दे क्योंकि इसके विना इनका परस्पर अधिक विवाद होसकता है यह निश्चय जानकर इन्हीं के अर्पण करदे यह शास्त्र की मर्यादा है २६५ ॥

एषोऽखिलेनाभिहितोधर्मःसीमाविनिर्णये । अतऊर्ध्वंप्रवक्ष्यामिवाक्पारुष्यविनिर्णयम् २६६

प० । एषः अखिलेन अभिहितः धर्मः सीमाविनिर्णये अतः ऊर्ध्वं प्रवक्ष्यामि वाक्पारुष्यविनिर्णयम् ॥

यो० । सीमाविनिर्णये एषः धर्मः अखिलेन अभिहितः (उक्त) अतः ऊर्ध्वं वाक्पारुष्यविनिर्णयं प्रवक्ष्यामि ॥

भा० । ता० । सीमाके निर्णय में यह सम्पूर्ण धर्म तुमको कहा इससे आगे वाक्पारुष्य (कठोर वचन) का निर्णय कहता हूं २६६ ॥

शतंब्राह्मणमाक्रुश्यक्षत्रियोदण्डमर्हति । वैश्योऽप्यर्द्धशतंद्वेवाशूद्रस्तुवधमर्हति २६७ ॥

प० । शतं ब्राह्मणं आक्रुश्य क्षत्रियः दण्डं अर्हति वैश्यः अपि अर्द्धशतं द्वे वा शूद्रः तु वधं अर्हति ॥

यो० । ब्राह्मणं आक्रुश्य क्षत्रियः शतं वैश्यः अर्द्धशतं वा द्विशतं दंडं अर्हति शूद्रस्तु वधं अर्हति ॥

भा० । ता० । यदि क्षत्री ब्राह्मण को आक्रोश करे अर्थात् चोर दुष्ट इत्यादि कठोर वचन कहे तो सौ १०० पण दण्ड के योग्य और वैश्य डेढ़सौ १५० वा दोसौ पण दण्ड के योग्य होता है और शूद्र वध (मारना) के योग्य होता है २६७ ॥

पञ्चाशद्ब्राह्मणोदण्ड्यःक्षत्रियस्याभिशंसने । वैश्येस्यादर्द्धपञ्चाशच्छूद्रेद्वादशकोदमः २६८

प० पंचाशत् ब्राह्मणः दंड्यः क्षत्रियस्य अभिशंसने वैश्ये स्यात् अर्द्धपंचाशत् शूद्रे द्वादशकः दमः ॥

यो० । क्षत्रियस्य अभिशंसनेसति ब्राह्मणः पञ्चाशत् दंड्यः वैश्ये अर्द्धपञ्चाशत् शूद्रे द्वादशकः दमःस्यात् ॥

भा० । ता० । यदि ब्राह्मण क्षत्री का आक्षेप (निन्दा) करे तो बारह पण और वैश्य की निन्दा करने पर पच्चीस पण और शूद्र की निन्दा करने पर बारह पण दण्ड ब्राह्मणको होताहै २६८ ॥

समवर्णेद्विजातीनांद्वादशैवव्यतिक्रमे । वादेष्ववचनीयेषुतदेवद्विगुणंभवेत् २६९ ॥

प० । समवर्णे द्विजातीनां द्वादश एव व्यतिक्रमे वादेषु अवचनीयेषु तत् एव द्विगुणं भवेत् ॥

यो० । द्विजातीनां समवर्णे व्यतिक्रमेसति द्वादश पणो दण्डो भवति अवचनीयेषु वादेषु तदेव द्विगुणं भवेत् ॥

भा० । ता० । यदि ब्राह्मण—क्षत्री—वैश्य—शूद्र—ये तीनों द्विजाति अपने सजातीय का आक्रोश करें तो बारह पण दण्ड होता है और जो कहने के अयोग्य (माता—भगिनी आदि को अनुचित-वचन) कहें तो वही दण्ड द्विगुण (२४ पण) दण्ड होजाता है २६९ ॥

एकजातिर्द्विजातींस्तुवाचादारुणयाक्षिपन् । जिह्वायाःप्राप्नुयाच्छेदंजघन्यप्रभवोहिसः २७०

प० । एकजातिः द्विजातीन् तु वाचा दारुणया क्षिपन् जिह्वायाः प्राप्नुयात् छेदं जघन्यप्रभवः हि सः ॥

यो० । एकजातिः (शूद्रः) दारुणयावाचा क्षिपन् सन् हि (यतः) सःजघन्यप्रभवः अतः जिह्वायाः छेदं प्राप्नुयात् ॥

भा० । ता० । यदि शूद्र पूर्वोक्त द्विजातियों की कठोर वचन से निन्दा करे तो जिह्वा के छेदन को प्राप्त होता है क्योंकि वह शूद्र जघन्य (अधम) पाद से पैदा हुआ है २७० ॥

नामजातिग्रहंत्वेषामभिद्रोहेणकुर्वतः।निक्षेप्योऽयोमयःशंकुर्ज्वलन्नास्येदशांगुलः २७१

प० । नामजातिग्रहं तु एषां अभिद्रोहेण कुर्वतः निक्षेप्यः अयोमयः शंकुः ज्वलन् आस्ये दशांगुलः ॥

यो० । एषां (द्विजातीनां) नामजातिग्रहं अभिद्रोहेण कुर्वतः शूद्रस्य आस्ये अयोमयः ज्वलन् शंकुः निक्षेप्यः ॥

भा० । ता० । द्रोह से द्विजातियों का नाम वा जाति का ग्रहण (लेना) अरे ब्राह्मण नीच इत्यादि करै तो इस शूद्र के मुख में दश अंगुल लम्बा लोहेका शंकु (गज) राजा डालदे २७१ ॥

धर्मोपदेशंदर्पेणविप्राणामस्यकुर्वतः । तप्तमासेचयेत्तैलंवक्त्रेश्रोत्रेचपार्थिवः २७२॥

प० । धर्मोपदेशं दर्पेण विप्राणां अस्य कुर्वतः तप्तं आसेचयेत् तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥

यो० । दर्पेण विप्राणां धर्मोपदेशं कुर्वतः अस्य (शूद्रस्य) वक्त्रे चपुनः श्रोत्रे तप्तं तैलं पार्थिवः आसेचयेत् ॥

भा० । ता० । जो शूद्र किसी से किंचित् धर्मको जानकर ब्राह्मणों को अहंकारसे धर्म का उपदेश करता है अर्थात् हे ब्राह्मण तुझे यह धर्म करना चाहिये ऐसे कहता है उस शूद्रके मुख और कानों में जलता हुआ तेल राजा डाल दे २७२ ॥

श्रुतंदेशंचजातिंचकर्मशारीरमेवच । वितथेनब्रुवन्दर्पाद्दाप्यःस्याद्विशतंदमम् २७३॥

प० । श्रुतं देशं च जातिं च कर्म शारीरं एव च वितथेन ब्रुवन् दर्पात् दाप्यः स्यात् द्विशतं दमम् ॥

यो० । श्रुतं देशं जातिं चपुनः शारीरं कर्म दर्पात् वितथेन ब्रुवन् शूद्रः राज्ञा द्विशतं दमं दाप्यः स्यात् ॥

भा० । जो किसी की विद्या–देश–जाति–देहके संस्कार–इनको झूठ बतावे उसको राजा दोसौ पण दंड दे ॥

ता० । जो मनुष्य श्रुत सुनने को अर्थात् तैंने यह नहीं सुना है अथवा देशको अर्थात् उस देशमें उत्पन्न हुआ नहीं है और जाति को तेरी यह जाति नहीं है और शरीर के यज्ञोपवीत आदि संस्कारोंको अर्थात् तेरे संस्कार नहीं हुये किसी दूसरे के इन सबको मिथ्या कहै तो राजा उसको दोसौ पण दंड दे यह दंड केवल शूद्रके लिये ही नहीं है किंतु समान जातियों के लिये है अर्थात् जो मनुष्य अपने सजातीयके विषे पूर्वोक्त झूठ बोले तो वह पूर्वोक्त दंड का भागी होताहै २७३ ॥

काणंवाप्यथवाखंजमन्यंवापितथाविधम् । तथ्येनापिब्रुवन्दाप्योदंडंकार्षापणावरम् २७४॥

प० । काणं वा अपि अथवा खंजं अन्यं वा अपि तथाविधं तथ्येन अपि ब्रुवन् दाप्यः दंडं कार्षापणावरम् ॥

यो० । काणं अथवा खंजं वा तथाविधं अन्यं तथ्येन अपि काणादिकं ब्रुवन् पुरुषः कार्षापणावरं दंडं दाप्यः ॥

भा० । ता० । जो मनुष्य काने को काना और खंज (लंगड़ा) को खंज और हस्त–पाद आदि से जो विकल (शून्य) हों उनको वैसाही सत्य कहै अर्थात् जैसाहो वैसाही कहै तो उस मनुष्यको राजा कम से कम एक कार्षापण दंड दे २७४ ॥

मातरंपितरंजायांभ्रातरंतनयंगुरुम् । आक्षारयञ्छतंदाप्यःपन्थानंचाददद्गुरोः २७५

प० । मातरं पितरं जायां भ्रातरं तनयं गुरुं आक्षारयन् शतं दाप्यः पंथानं च अददत् गुरोः ॥

यो० । मातरं–पितरं–जायां–भ्रातरं–तनयं–गुरुं–आक्षारयन् चपुनः गुरोः पंथानं अददत् पुरुषः शतं पणं राज्ञा दाप्यः ॥

भा० । माता–पिता–स्त्री–भाई–पुत्र–गुरु–इनको जो शाप लगावे अथवा गुरुको मार्ग न दे तो उसको राजा सौ पण दंड दे ॥

ता० । जो मनुष्य अपनी माता पिता जाया भाई पुत्र गुरु इनका आक्षारण अर्थात् पातकी आदि कहकर निंदाकरै अथवा अपने गुरुको सन्मुख आता देखकर मार्ग को न छोड़िदे उस मनुष्यको राजा सौ पण दंड दे इस अर्थ में आक्षारण शब्दका अर्थ पातक लगाना कहा है और इससे स्त्री पुत्र भाई इनको भी गुरुके समान दंड कहा है और मेधातिथि तो आक्षारण शब्द का अर्थ भेदन कहकर यह कहते हैं कि जो माता पिता आदिकोंकी परस्पर प्रीति में भेद करिदे तो उसको सौ पण दंड होताहै २७५ ॥

ब्राह्मणक्षत्रियाभ्यांतुदंडःकार्योविजानता । ब्राह्मणेसाहसःपूर्वःक्षत्रियेत्वेवमध्यमः २७६

प० । ब्राह्मणक्षत्रियाभ्यां तु दंडः कार्यः विजानता ब्राह्मणे साहसः पूर्वः क्षत्रिये तु एव मध्यमः ॥

यो० । ब्राह्मणक्षत्रियाभ्यां आक्रोशेसति विजानता राज्ञा दंडः कार्यः ब्राह्मणे पूर्वः साहसः क्षत्रिये तु मध्यमः साहसः कार्यः ॥

भा० । ता० । यदि ब्राह्मण और क्षत्रिय परस्पर एक दूसरे को पतित बतावे तो शास्त्र का जाननेवाला इसप्रकार दंड दे कि यदि ब्राह्मण क्षत्रिय को पतित कहे तो प्रथम साहस दंड दे और यदि क्षत्री ब्राह्मण को पतित बतावे तो मध्यम साहस दंड दे २७६ ॥

विट्शूद्रयोरेवमेवस्वजातिंप्रतितत्त्वतः । छेदवर्ज्जंप्रणयनंदण्डस्येतिविनिश्चयः२७७॥

प० । विट्शूद्रयोः एवं एव स्वजातिं प्रति तत्त्वतः छेदवर्ज्जं प्रणयनं दंडस्य इति विनिश्चयः ॥

यो० । एवं एव विट् शूद्रयोः स्वजातिं प्रति तत्त्वतः आक्रोशे छेदवर्ज्जं दंडस्य प्रणयनं राज्ञा कर्त्तव्यं इति विनिश्चयः अस्ति ॥

भा० । परस्पर पतित बतानेवाले वैश्य शूद्र को भी राजा इसीप्रकार दंड दे परंतु शूद्रकी जिह्वा का छेदन न करे यह शास्त्रकी मर्यादा है ॥

ता० । यदि वैश्य और शूद्र अपनी परस्पर जाति के मनुष्य को पतित बतावें तो इसीप्रकार जिह्वा के छेदनको छोड़कर राजा दंड दे यह शास्त्रका निश्चय है अर्थात् यदि शूद्रको वैश्य पतित बतावै तो प्रथम साहस और शूद्र वैश्यको पतित बतावे तो मध्यम साहस दंड दे इससे जो पीछे दोसौ सत्तर २७० के श्लोकमें शूद्रको वैश्य के आक्रोशमें जिह्वा का छेदन कहिआये हैं वह दंड ब्राह्मण और क्षत्रिय के पतित बताने में ही समझना अथवा वैश्यकी निंदा करने में तो शूद्रको मध्यम साहसही दंड होताहै २७७ ॥

एषदण्डविधिःप्रोक्तोवाक्पारुष्यस्यतत्त्वतः।अतऊर्ध्वंप्रवक्ष्यामिदण्डपारुष्यनिर्णयम् २७८

प० । एषः दंडविधिः प्रोक्तः वाक्पारुष्यस्य तत्त्वतः अतः ऊर्ध्वं प्रवक्ष्यामि दंडपारुष्यनिर्णयम् ॥

यो० । एषः वाक्पारुष्यस्य दंडविधिः मया तत्त्वतः प्रोक्तः अतः ऊर्ध्वं दंडपारुष्यनिर्णयं प्रवक्ष्यामि ॥

भा० । ता० । वाक्पारुष्य अर्थात् कठोर वचन कहने का यह यथार्थ दंडकी विधि में कही इससे आगे दंडपारुष्य (कठोर दंड) का निर्णय कहताहूं २७८ ॥

येनकेनचिदंगेनहिंस्याच्चेच्छ्रेष्ठमन्त्यजः।छेत्तव्यंतत्तदेवास्यतन्मनोरनुशासनम् २७९ ॥

प० । येन केनचित् अंगेन हिंस्यात् चेत् श्रेष्ठं अंत्यजः छेत्तव्यं तत् तत् एव अस्य तत् मनोः अनुशासनम् ॥

यो० । चेत् (यदि) अंत्यजः श्रेष्ठं येन केनचित् अंगेन हिंस्यात् तत् तत् एव अस्य अंगं राज्ञा छेत्तव्यं मनोः तत् अनुशासनं (आज्ञा) भवति ॥

भा० । ता० । यदि शूद्र जिस २ अंग से द्विजातियों की हिंसाकरै उस शूद्रका वही २ अंग राजा छेदन करिदे यह मनुकी आज्ञा है २७९ ॥

पाणिमुद्यम्यदंडंवापाणिच्छेदनमर्हति । पादेनप्रहरन्कोपात्पादच्छेदनमर्हति २८० ॥

प० । पाणिं उद्यम्य दंडं वा पाणिछेदनं अर्हति पादेन प्रहरन् कोपात् पादछेदनं अर्हति ॥

यो० । शूद्रः पाणिं वा दंडं उद्यम्य पाणिछेदनं अर्हति कोपात् पादेन प्रहरन् शूद्रः पादछेदनं अर्हति ॥

भा० । ता० । जो शूद्र द्विजाति के मारने के लिये हाथको वा दंडको उठावै वह हाथके छेदन योग्य होता है और जो कोपसे द्विजाती का पैरसे प्रहारकरै अर्थात् लातमारै तो पैरोंके छेदन के योग्य होताहै २८० ॥

सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः।कट्यांकृतांकोनिर्वास्यःस्फिचंवास्यावकर्तयेत् २८१

प० । सहासनं अभिप्रेप्सुः उत्कृष्टस्य अपकृष्टजः कट्यां कृतांकः निर्वास्यः स्फिचं वा अस्य अवकर्तयेत् ॥

यो० । उत्कृष्टस्य सहासनं अभिप्रेप्सुः अपकृष्टजः राज्ञा कट्यां कृतांकः सन निर्वास्यः वा अस्य स्फिचं राजा अवकर्तयेत् ॥

भा० । ता० । जो शूद्र ब्राह्मण के संग एक आसन पर बैठने की इच्छाकरै उस शूद्रकी कटि (कमर) में राजा चिह्नबनाकर (दागदकर) देश से निकास दे अथवा इसके स्फिच (चूतड़) को कतर दे परंतु इसप्रकार कतरै जैसे वह शूद्र मर न जाय २८१ ॥

अवनिष्ठीवतोदर्पाद्द्वावोष्ठौछेदयेन्नृपः । अवमूत्रयतोमेढ्रमवशर्धयतोगुदम् २८२ ॥

प० । अवनिष्ठीवतः दर्पात् द्वौ ओष्ठौ छेदयेत् नृपः अवमूत्रयतः मेढ्रं अवशर्धयतः गुदम् ॥

यो० । दर्पात् ब्राह्मणान अवनिष्ठीवतः पुरुषस्य द्वौ ओष्ठौ अवमूत्रयतः मेढ्रं अवशर्धयतः गुदं नृपः छेदयेत् ॥

भा० । ता० । अभिमान से ब्राह्मणों के ऊपर थूकतेहुये शूद्र के दोनों होंठ और ब्राह्मणोंके ऊपर मूत्रकरतेहुये का लिंग और ब्राह्मणोंके ऊपर अधोवायु करतेहुये की गुदाको राजा छेदनकरै २८२ ॥

केशेषुगृह्णतोहस्तौछेदयेदविचारयन् । पादयोर्दाढिकायांचग्रीवायांवृषणेषुच २८३ ॥

प० । केशेषु गृह्णतः हस्तौ छेदयेत् अविचारयन् पादयोः दाढिकायां च ग्रीवायां वृषणेषु च ॥

यो० । केशेषु पादयोः दाढिकायां ग्रीवायां चपुनः वृषणेषु ब्राह्मणं दर्पात् गृह्णतः शूद्रस्य हस्तौ राजा अविचारयन सन् छेदयेत् ॥

भा० । ता० । ब्राह्मण के केश–पैर–दाढ़ी ग्रीवा वृषण–इनको जो अभिमान से ग्रहणकरै तो

उस शूद्रके हाथोंको राजा छेदनकरै और उस समय यह विचार न करै कि इसको पीड़ा होगी वा नहीं २८३ ॥

त्वग्भेदकःशतंदंड्योलोहितस्यचदर्शकः।मांसभेत्तातुषण्णिष्कान्प्रवास्यस्त्वस्थिभेदकः२८४ ॥

प० । त्वग्भेदकः शतं दंड्यः लोहितस्य च दर्शकः मांसभेत्ता तु षट् निष्कान् प्रवास्यः तु अस्थि-भेदकः ॥

यो० । त्वग्भेदकः चपुनः लोहितस्य दर्शकः पुरुषः शतं दंड्यः मांसभेत्ता षण्णिष्कान दंड्यः अस्थि भेदकस्तु राज्ञा प्रवास्यः ॥

भा० । ता० । जो सजातीय मनुष्य की त्वचाका छेदन करै अथवा देहमें से रुधिर को निकास दे उसको सौ पण का और मांस के भेदन करनेवाले को छः निष्कका राजा दंड दे और जो अस्थि (हड्डी) को छेदन करै उसको तो अपने राज्य में से निकाल दे २८४ ॥

वनस्पतीनांसर्वेषामुपभोगंयथायथा । तथातथादमःकार्योहिंसायामितिधारणा २८५॥

प० । वनस्पतीनां सर्वेषां उपभोगं यथा यथा तथा तथा दमः कार्यः हिंसायां इति धारणा ॥

यो० । सर्वेषां वनस्पतीनां यथा यथा उपयोगं भवति तथा तथा वनस्पतीनां हिंसायां सत्यां दमः (दंडः) राज्ञा कार्यः इतिधारणा निश्चयः अस्ति ॥

भा० । सम्पूर्ण वनस्पतियों का जैसा २ उपभोग होताहै वैसा वैसाही उनकी हिंसा करने में भी राजा दंडदे यह शास्त्रका निश्चय है ॥

ता० । वृक्ष आदि सम्पूर्ण वनस्पतियों का जिस २ प्रकार अर्थात् फल–पुष्प–पत्र आदिसे उत्तम–मध्यम–अधम रूपहोताहै उसी२ प्रकारसे वनस्पतियों की हिंसामें भी उत्तम साहस मध्यम साहस आदि दण्ड को राजा दे यही शास्त्रकी व्यवस्था है क्योंकि इसी वचनसे विष्णु ने यह कहा है कि जो मनुष्य वृक्षके फलोंका उपभोग करै अथवा वृक्षोंको छेदन करिदे उसको उत्तम साहस और जो फूलोंका उपभोग और वृक्षोंको छेदनकरै उसको मध्यम साहस और बल्लि लता गुल्म इनको छेदन करै तो उसको सौकार्षापण और जो तृणों को छेदन करै तो उसको एक कार्षापण दंड राजा दे २८५ ॥

मनुष्याणांपशूनांचदुःखायप्रहृतेसति । यथायथामहद्दुःखंदंडंकुर्यात्तथातथा २८६ ॥

पद–मनुष्याणां पशूनां च दुःखाय प्रहृते सति यथा यथा महद्दुःखं दंडं कुर्यात् तथा तथा ॥

यो० । मनुष्याणां चपुनः पशूनां दुःखाय प्रहृते सति यथा यथा महद्दुःखं भवति तथा तथा दण्डं राजा कुर्यात् ॥

भा० । ता० । यदि कोई पुरुष (मनुष्यों और पशुओंके दुःख देनेके लिये प्रहारकरै तो जैसा २ अधिक दुःख हो वैसाही वैसा अधिक दंड राजादे अर्थात् त्वचाके छेदनमें सौ पण दंड जो कहाहै यदि अधिक त्वचाका भेदन होजाय तो वहां परभी अधिक दंडदे २८६ ॥

अंगावपीडनायांचव्रणशोणितयोस्तथा । समुत्थानव्ययंदाप्यःसर्वदंडमथापिवा२८७॥

पद । अंगा वपीडनायां च व्रणशोणितयोः तथा समुत्थानव्ययं दाप्यः सर्वदण्डं अथ अपि वा ॥

यो० । अंगावपीडनायां तथा व्रणशोणितयोः पीडायां सत्यां राज्ञा समुत्थानव्ययं वा सर्वदंडं राज्ञा दाप्यः ॥

---

१ फलोपभोगद्रुमच्छेदीतूत्तमं साहसं पुष्पोपभोगच्छेदी मध्यमं वल्लीगुल्म लताछेदीकार्षापणशतं तृणच्छेद्येककार्षापणंच

भा० । अंगोंकी पीडादेने और घाव रुधिर निकासने पर जितना व्यय आराम होनेमें हो उतना दण्ड राजादे अथवा शास्त्रोक्त सम्पूर्ण दण्डदे ॥

ता० । यदि कोई मनुष्य किसी के कर चरण आदि अंगोंको पीडादे अथवा घाव और रुधिर निकासकरि पीडादे तो राजा उसको समुत्थान व्ययदण्डदे अर्थात् जितने कालमें घावभरे उतने समय में पथ्य और औषध में जो व्यय (खर्च) पड़े उतना दंड राजादे यदि पीडा देनेवाला पीडा देना न चाहै तो वह व्यय और उस पीडाका दंड ये दोनों दंड राजा उसेदे २८७ ॥

द्रव्याणिहिंस्याद्योयस्यज्ञानतोऽज्ञानतोपिवा।सतस्योत्पादयेत्तुष्टिंराज्ञोदद्याच्चतत्समम२८८

प० । द्रव्याणि हिंस्यात् यः यस्य ज्ञानतः अज्ञानतः अपि वा सः तस्य उत्पादयेत् तुष्टिं राज्ञः दद्यात् च तत्समम् ॥

यो० । यः पुरुष यस्य द्रव्याणि ज्ञानतः वा अज्ञानतः हिंस्यात् सः तस्य तुष्टिं उत्पादयेत् चपुनः तत्समंराज्ञःदद्यात् ॥

भा० । ता० । जो मनुष्य जानकर वा अज्ञानसे जिसके द्रव्यों को नष्टकरिदे वह दूसरे द्रव्यों को देकर उसका सन्तोष करिदे और राजाको उतना द्रव्यदे जितना उसने नष्ट कियाहो २८८ ॥

चर्मचार्मिकभांडेषुकाष्ठलोष्ठमयेषुच । मूल्यात्पंचगुणोदंडःपुष्पमूलफलेषुच २८९ ॥

प० । चर्मचार्मिक भांडेषु काष्ठलोष्ठमयेषु च मूल्यात् पञ्चगुणः दंडः पुष्पमूलफलेषु च ॥

यो० । चर्मचार्मिकभांडेषु चपुनः काष्ठलोष्ठमयेषु चपुनः पुष्पमूलफलेषु नाशितेषु सत्सु मूल्यात् पंचगुणः दंडः राज्ञेदेयः—स्वामिनः सन्तोपस्तु कर्तव्य एव ॥

भा० । ता० । जो मनुष्य किसीके चर्म वा चर्मसे बनी वस्तु वा पात्र अथवा काष्ठ वा मिट्टी के पात्रोंको अथवा पुष्प मूल फलोंको नष्ट करिदे तो मूल्यसे पांचगुणा दण्ड राजाकोदे और स्वामीको प्रसन्न करिदे २८९ ॥

यानस्यचैवयातुश्चयानस्वामिनएवच । दशातिवर्तनान्याहुःशेषदंडोविधीयते २९० ॥

प०। यानस्य च एव यातुः च यानस्वामिनः एव च दश अतिवर्तनानि आहुः शेषे दंडः विधीयते॥

यो० । यानस्य यातुः चपुनः यानस्वामिनः दश अति वर्तनानि मन्वादयः आहुः शेषे राज्ञा दंडःविधीयते ॥

भा० । यान—सारथी—यानका स्वामी इनके दश अपराधोंमें दण्डका न देना मनु आदिकोंने कहा है और शेष अपराधों में दण्ड कहा है ॥

ता० । रथ आदि यान (सवारी) और याता (सारथि) और यानका स्वामी इन तीनोंके दश अपराधों में दण्डका अतिवर्त्तन (न देना) मनु आदिकों ने कहा है और उन दशसे शेष अपराधों में दण्ड कहाहै अर्थात् उनदशों के होनेसे कोई प्राणी मरजाय अथवा द्रव्य नष्ट होजाय तो यानके स्वामीको राजा दण्ड न दे और शेष होनेपर दण्डदे उन सबको अगिले दो श्लोकों में वर्णन करते हैं कि २९० ॥

छिन्ननास्येभग्नयुगेतिर्यक्प्रतिमुखागते । अक्षभंगेचयानस्यचक्रभंगेतथैवच २९१॥
छेदनेचैवयन्त्राणांयोक्त्ररश्म्योस्तथैवच ।आक्रन्देचाप्यपैहीतिनदंडंमनुरब्रवीत्२९२॥

प० । छिन्ननास्ये भग्नयुगे तिर्यक् प्रतिमुखागते अक्षभंगे च यानस्य चक्रभंगे तथा एव च ॥

प० । छेदने च एव यन्त्राणां योक्त्ररश्म्योः तथा एव च आक्रंदे च अपि अपेहि इति न दण्डं मनुः अब्रवीत् ॥

यो० । छिन्ननास्ये भग्नयुगे तिर्यक्प्रतिमुखागते यानेसति चपुनः यानस्य अक्षभंगे तथैव चक्रभंगे चपुनः यन्त्राणां छेदने तथैव योक्त्ररश्म्योः छेदनेसति चपुनः अपेहि इति आक्रंदेसति मनुः दण्डं न अब्रवीत् ॥

भा० । ता० । यदि बैलकी नाथ छिदजाय और जूआ टूटजाय अथवा ऊँची नीची भूमिसे रथ तिरछा होजाय अथवा चक्रके भीतरका काष्ठ टूटजाय अथवा चक्र (पहिया) टूटजाय अथवा यन्त्र (चामकेबँधने) टूटजायँ अथवा योक्त्र (बैलकी नारकी रज्जु) टूटजायअथवा रश्मि (रास) टूट जाय तो और सारथी के इस प्रकार शब्द करने से कि यहांसे हटजाओ हटजाओ इन दश बातों के होने पर यदि यान (सवारी) से कोई प्राणी मरजाय अथवा किसीका द्रव्य नष्टहोजाय तो सारथी अथवा उसके स्वामीको दण्डदेना मनुने नहीं कहाहै २९१ । २९२ ॥

यत्रापवर्ततेयुग्यंवैगुण्यात्प्राजकस्यतु। तत्रस्वामीभवेद्दंड्योहिंसायांद्विशतंदमम्२९३॥

प०।यत्र अपवर्तते युग्यं वैगुण्यात् प्राजकस्य तु तत्र स्वामी भवेत् दण्ड्यः हिंसायां द्विशतं दमम्॥

यो० । यत्र प्राजकस्य वैगुण्यात् युग्यं अपवर्तते तत्र स्वामी हिंसायां द्विशतंदमं दंड्यः भवेत् ॥

भा० । ता० । जहां सारथी के वैगुण्य (मूर्खता) से रथ अन्यथा (तिरछा) चलताहो और किसी प्राणीकी हिंसा होजाय तो रथके स्वामीको इसलिये दोसौ पण दंड राजादे कि उसने मूर्ख सारथी क्यों रक्खा २९३ ॥

प्राजकश्चेद्भवेदाप्तःप्राजकोदंडमर्हति।युग्यस्थाःप्राजकेऽनाप्तेसर्वेदंड्याःशतंशतम् २९४

प० । प्राजकः चेत् भवेत् आप्तः प्राजकः दण्डं अर्हति युग्यस्थाः प्राजके अनाप्ते सर्वे दंड्याः शतं शतम् ॥

यो०।चेत्(यदि) प्राजकः आप्तः भवेत् तर्हि प्राजकः दंडं अर्हति प्राजके अनाप्तेसति युग्यस्थाः सर्वे शतं शतं राज्ञादंड्याः॥

भा० । ता० । यदि सारथी कुशलहो और रथके अन्यथा चलने से कोई मरजाय तो सारथीही दण्डके योग्यहोताहै अर्थात् दोसौ पण दंड आदि का भागी होताहै और यदि सारथी कुशल न होय तो रथमें बैठनेवाले स्वामी से भिन्न सम्पूर्ण मनुष्यभी सौ सौ पण दण्ड के योग्य होते हैं २९४ ॥

सचेत्तुपथिसंरुद्धःपशुभिर्वारथेनवा । प्रमापयेत्प्राणभृतस्तत्रदंडोऽविचारितः २९५ ॥

प० । सः चेत् तु पथि संरुद्धः पशुभिः वा रथेन वा प्रमापयेत् प्राणभृतः तत्र दण्डः अविचारितः ॥

यो० । चेत् (यदि) पथि पशुभिः वा अन्येन रथेन संरुद्धः सः प्राजकः प्राणभृतः प्रमापयेत् तर्हि तत्रदंडः अविचारितः राज्ञा कर्तव्यः ॥

भा० । ता० । यदि सन्मुख आये हुये बहुत से गौ आदि पशु और अन्यरथ सारथीको रोकैं और वह अपने रथके चलाने में सावधान न होनेसे रथको न लौटायसके और अपने घोड़ोंको यथाशक्ति सावधानीसे चलावेभी यदि घोड़े वा रथसे कोई प्राणी मरजाय तो ऐसे स्थलमें राजा दंडदेने में विचार न करै अर्थात् इसरीति अनुसार दंडदेवे २९५ ॥

मनुष्यमारणेक्षिप्रंचौरवत्किल्बिषंभवेत् । प्राणभृत्सुमहत्स्वर्धंगोगजोष्ट्रहयादिषु २९६॥

प० । मनुष्यमारणे क्षिप्रं चौरवत् किल्बिषं भवेत् प्राणभृत्सु महत्सु अर्द्धं गोगजोष्ट्रहयादिषु ॥

यो० । मनुष्यमारणे सति किल्बिषं चौरवत् क्षिप्रं भवेत् गोगजोष्ट्रहयादिषु प्राणभृत्सु महत्सु मृतेषु सत्सु अर्द्धं किल्बिषं भवेत् ॥

भा० । ता० । यदि सारथी की असावधानी से कोई मनुष्य मरजाय तो चौरके समान उत्तम साहस (सहस्रपण) दंड सारथीकोदे और यदि गौ–हाथी-ऊंट-घोड़े-आदि बड़े २ प्राणधारीमरजांय तो उत्तमसाहस का आधा (५००पण) दण्ड होताहै २९६ ॥

क्षुद्रकाणांपशूनांतुहिंसायांद्विशतोदमः । पंचाशत्तुभवेद्दंडःशुभेषुमृगपक्षिषु २९७॥

प० । क्षुद्रकाणां पशूनां तु हिंसायां द्विशतः दमः पंचाशत् तु भवेत् दंडः शुभेषु मृगपक्षिषु ॥

यो० । क्षुद्रकाणां पशूनां हिंसायां द्विशतः दमः शुभेषु मृगपक्षिषु मृतेषु सत्सु पंचाशत् दंडः भवेत् ॥

भा० । ता० । यदि क्षुद्र (छोटे २) पशू सारथीकी असावधानी से मरजांय तो द्विशत (२०० पण) दंड और श्रेष्ठमृग (रुरुपृषत्आदि) और श्रेष्ठपक्षि (तोता हंस सारसआदि) ये मरजांय तो पचासपण दंड सारथीको होताहै २९७ ॥

गर्दभाजाविकानांतुदंडःस्यात्पंचमाषिकः । माषकस्तुभवेद्दंडःश्वशूकरनिपातने २९८॥

प० । गर्द्दभाजाविकानां तु दंडः स्यात् पंचमाषिकः माषकः तु भवेत् दंडः श्वशूकरनिपातने ॥

यो० । गर्द्दभाजाविकानां हिंसायां पंचमाषिकः दंडः— श्वशूकरनिपातने माषकः दंडः भवेत् ॥

भा० । ता० । यदि गधा–बकरी–भेड़–ये मरजांय तो पांचमासे चांदीकादंड सारथीको होता है यदि कुत्ता–शूकर–मरजांय तो एकमाषा चांदीका दंडहोताहै अर्थात् जैसे मूल्यकाजीव मरे वैसाही दंड राजा सारथिकोदे २९८ ॥

भार्यापुत्रश्चदासश्चप्रेष्योभ्राताचसोदरः।प्राप्तापराधास्ताड्याःस्यूरज्ज्वावेणुदलेनवा२९९

प० । भार्या पुत्रः च दासः च प्रेष्यः भ्राता च सोदरः प्राप्तापराधाः ताड्याः स्युः रज्ज्वा वेणुदलेन वा ॥

यो० । भार्या- पुत्रः- दासः- प्रेष्यः चपुनः सोदरः भ्राता प्राप्तापराधाः एते रज्ज्वा वा वेणुदलेन ताड्याः स्युः ॥

भा० । ता० । स्त्री–पुत्र–दास–भृत्य–और सोदर (सगा) भाई ये सब, कोई अपराधकरें तो रज्जु (रस्सी) और बांसकी पतली लकड़ीसे शिक्षाकेलिये इनकीताडनाकरै और कोई दंडनदे२९९॥

पृष्ठतस्तुशरीरस्यनोत्तमांगेकथंचन । अतोन्यथातुप्रहरन्प्राप्तःस्याच्चौरकिल्बिषम् ३००॥

प०। पृष्ठतः तु शरीरस्य न उत्तमांगे कथंचन अतः अन्यथा तु प्रहरन् प्राप्तः स्यात् चौरकिल्बिषम् ॥

यो० । शरीरस्य पृष्ठतः भार्यादयः ताड्याः स्युः उत्तमांगे (शिरसि) कथंचन ताड्याः नस्युः अतः अन्यथा प्रहरन् सन् चौरकिल्बिषं प्राप्तःस्यात् ॥

भा० । शूद्रब्राह्मण होजाताहै और ब्राह्मण शूद्रहोजाता है और इसीप्रकार क्षत्री से और वैश्यसे पैदाहुये भी शूद्र वा क्षत्रिय वैश्य पूर्वोक्तप्रकार से होजातेहैं ॥

ता० । इस प्रकार पूर्वोक्त रीति से शूद्र ब्राह्मणताको और ब्राह्मण शूद्रताको प्राप्त होता है— इसश्लोक में शूद्रामें ब्राह्मणसे उत्पन्न पारशवहीका ब्राह्मणपदसे ग्रहणहै यदि वहपारशव विवाहीहुई शूद्रामें पुरुषको पैदाकरताहै फिर वहपुरुष शूद्राको विवाहकर पुरुषको पैदाकरै इसरीतिसे वहमूल ब्राह्मण सातवें जन्ममें शूद्रताको प्राप्त होजाता है इसीप्रकार क्षत्रिय और वैश्यसे शूद्रामें जो पुत्र पैदाहोतेहैं उनकी भी उत्तमता जाननी परन्तु यहजातिकी निकृष्टतासे जातिकी उत्तमता सातवें वा पांचवें जन्ममें इस याज्ञवल्क्य के वचनानुसार होतीहै अर्थात् क्षत्रीसे शूद्रामें पैदाहुये की उत्तमता वा नीचता पांचवें जन्ममें जाननी और उक्तयाज्ञवल्क्य के वचन में अपिशब्द पढ़नेसे वैश्यसे शूद्रा में पैदाहुये की उत्तमता वा नीचता तीसरेजन्म में जाननी और इसीरीतिसे ब्राह्मणसे वैश्यामें पैदा हुये की उत्तमता वा नीचता पांचवेंजन्ममें और क्षत्रियामें पैदाहुयेकी तीसरेजन्म में जाननी और क्षत्रीसे वैश्यामें पैदाहुये की उत्तमता और नीचता तीसरेही जन्ममें जाननी ६५ ॥

अनार्यायांसमुत्पन्नोब्राह्मणात्तुयदृच्छया।ब्राह्मण्यामप्यनार्यात्तुश्रेयस्त्वंक्वेतिचेद्भवेत् ६६

प० । अनार्यायां समुत्पन्नः ब्राह्मणात् तु यदृच्छया ब्राह्मण्यां अपि अनार्यात् तु श्रेयस्त्वं क्व इति चेत् भवेत् ॥

यो० । एकः ब्राह्मणात् अनार्यायां समुत्पन्नः अपरः अनार्यात् ब्राह्मण्यां समुत्पन्नः अनयोः द्वयोः मध्ये श्रेयस्त्वं क इति चेत् संशयः भवेत् तर्हि ॥

भा० । एकब्राह्मण से विना विवाही शूद्रामें पैदाहुआ और दूसरा शूद्रसे ब्राह्मणी में पैदाहुआ इनदोनों में कौनसा श्रेष्ठहै यदि यह संशयहो तो ॥

ता० । एकपुत्र तो यदृच्छासे अर्थात् अकस्मात् विना विवाही शूद्रामें ब्राह्मणसे पैदाहुआ और एकअन्य ब्राह्मणी में शूद्रसे पैदाहुआ इनदोनों के मध्यमें श्रेष्ठकौनसाहोता है यदि यह संशयहो और इससंदेह का कारण यहहै कि जैसे बीजकी उत्तमतासे शूद्रामें ब्राह्मण से पैदाहुआ साधु शूद्र होताहै इसीप्रकार क्षेत्र (ब्राह्मणी) की उत्तमतासे शूद्रसे ब्राह्मणी में पैदाहुआ भी साधु शूद्र क्यों न होना चाहिये इसमें निर्णय कहतेहैं कि ६६ ॥

जातोनार्यामनार्यायामार्यादार्योभवेद्गुणैः।जातोऽप्यनार्यादार्यायामनार्यइतिनिश्चयः६७

प० । जातः नार्यां अनार्यायां आर्यात् आर्यः भवेत् गुणैः जातः अपि अनार्यात् आर्यायां अनार्यः इति निश्चयः ॥

---

१ जात्युत्कर्षोयुगेज्ञेयः सप्तमेपंचमेपिवा ॥

यो० । अनार्यायां नार्यां (शूद्रास्त्रियां) आर्यात् ब्राह्मणात् जातः अपि गुणैः आर्यः भवेत्-आर्यायां (ब्राह्मण्यां) अनार्यात् (शूद्रात्) जातः अपि अनार्यः भवेत् इतिनिश्चयः (शास्त्रमर्यादा) अस्ति ॥

भा० । ता० । शूद्रास्त्रीमें ब्राह्मण से पैदाहुआ पुत्र यदि स्मृतियों में कहेहुये पाकयज्ञ आदि गुणों से युक्तहोय तो आर्य (ब्राह्मण) ही होताहै और शूद्रसे ब्राह्मणी में भी पैदाहुआ पुत्र प्रतिलोमज होनेसे अनार्य इसलिये होताहै कि शूद्रके धर्मकरनेमें भी उसका अधिकार नहींहोना-यहशास्त्रकी मर्यादा है ६७ ॥

तावुभावप्यसंस्कार्याविति धर्मोव्यवस्थितः।वैगुण्याज्जन्मनःपूर्वउत्तरःप्रतिलोमतः ६८

प० । तौ उभौ अपि असंस्कार्यौ इति धर्मः व्यवस्थितः वैगुण्यात् जन्मनः पूर्वः उत्तरः प्रतिलोमतः

यो० । उभौ अपि तौ असंस्कार्यौ इति धर्मः व्यवस्थितः अस्ति-पूर्वः जन्मनः वैगुण्यात् उत्तरः प्रतिलोमतः असंस्कार्यः ज्ञेयः ॥

भा० । ता० । वे दोनों भी पारशव और चांडाल यज्ञोपवीत कराने के योग्य नहींहोते-यहशास्त्र की व्यवस्था है-पहिला (पारशव) जन्म (शूद्रासे उत्पत्ति) की दुष्टतासे और दूसरा (चांडाल) प्रतिलोमज होनेसे अर्थात् शूद्रसे ब्राह्मणीमें पैदाहोनेसे यज्ञोपवीत के योग्य नहींहोता ६८ ॥

सुबीजंचैवसुक्षेत्रेजातंसंपद्यतेयथा। तथाऽर्याज्जातआर्यायांसर्वंसंस्कारमर्हति ६९

प० । सुबीजं च एवं सुक्षेत्रे जातं संपद्यते यथा तथा आर्यात् जातः आर्यायां सर्वं संस्कारं अर्हति ॥

यो० । सुक्षेत्रे जातं सुबीजं यथा संपद्यते तथा आर्यायां आर्यात् जातः सर्वसंस्कारं अर्हति ॥

भा० । ता० । अच्छे क्षेत्रमें पैदाहुआ बीज जैसे भलीप्रकार वृद्धिकोप्राप्तहोताहै इसीप्रकार द्विजातियों से द्विजाति स्त्रियों में पैदाहुआ पुत्रभी वर्णोंके सम्पूर्ण संस्कारों के योग्य होताहै और पारशव और चांडाल कभी नहींहोते ६९ ॥

बीजमेकेप्रशंसंतिक्षेत्रमन्येमनीषिणः। बीजक्षेत्रेतथैवान्येतत्रेयंतुव्यवस्थितिः ७० ॥

प० । बीजं एके प्रशंसन्ति क्षेत्रं अन्ये मनीषिणः बीजक्षेत्रे तथा एव अन्ये तत्र इयं तु व्यवस्थितिः

यो० । एकेबीजं अन्येमनीषिणः क्षेत्रं-तथैव अन्येबीजक्षेत्रे प्रशंसन्ति तत्रव्यवस्थितिः इयं (वक्ष्यमाणा) ज्ञेया ॥

भा० । ता० । कोई परिडत बीजकी प्रशंसा करतेहैं क्योंकि हरिणी से उत्पन्न ऋष्यशृंग ब्रह्मर्षि होगये कोई क्षेत्र की प्रशंसाकरतेहैं क्योंकि क्षेत्रके स्वामीका पुत्रहोताहै और कोई परिडत बीज और क्षेत्र दोनोंकी प्रशंसाकरतेहैं क्योंकि उत्तमक्षेत्रमें बोयेहुये बीजकी समृद्धि होतीहै इनसबमें व्यवस्था और युक्ति शास्त्रसे यहजाननी कि ७० ॥

अक्षेत्रेबीजमुत्सृष्टमन्तरैवविनश्यति। अबीजकमपिक्षेत्रंकेवलंस्थण्डिलंभवेत् ७१

प० । अक्षेत्रे बीजं उत्सृष्टं अन्तरा एव विनश्यति अबीजकं अपि क्षेत्रं केवलं स्थंडिलं भवेत् ॥

यो० । अक्षेत्रे (ऊपरभूमौ) उत्सृष्टं बीजं अन्तराएव विनश्यति अबीजकं केवलं क्षेत्रं अपि स्थंडिलं भवेत् ॥

भा० । ता० । ऊपर भूमिमें बोयाहुआ बीज फलके विनादिये बीचमेंही नष्टहोजाताहै और बीज से रहित अच्छाभी क्षेत्र केवल स्थंडिलही होजाता है इससे परस्पर सहायक होनेसे और सहायक के विना प्रत्येक की निंदासे दोनोंही प्रधान होतेहैं ७१ ॥

यस्माद्बीजप्रभावेणतिर्यग्जाऋषयोऽभवन्।पूजिताश्चप्रशस्ताश्चतस्माद्बीजंप्रशस्यते ७२

प० । यस्मात् बीजप्रभावेण तिर्यग्जाः ऋषयः अभवन् पूजिताः च प्रशस्ताः च तस्मात् बीजं प्रशस्यते ॥

यो० । यस्मात् तिर्यग्जाः बीजप्रभावेण पूजिताः चपुनः प्रशस्ताः ऋषयः अभवन् तस्मात् बीजं बुधैः प्रशस्यते ॥

भा० । ता० । अबबीजकी प्रधानतामें दृष्टांत कहतेहैं जिससे तिरछीयोनि से पैदाहुये ऋष्यशृंग आदि नमस्कार योग्यहोनेसे पूजित—और वेदज्ञाताहोनेसे प्रशस्त बीजकेप्रभावसे ऋषिहोगये तिससे पण्डितजन बीजकीही प्रशंसा करतेहैं यहभी बीजकी प्रधानता का सिद्धांत इसलिये है कि बीजऔर योनिके मध्यमें बीजसे उत्तम जो जाति वही प्रधानहै ७२ ॥

अनार्यमार्यकर्माणमार्यंचानार्यकर्मिणम् । संप्रधार्याब्रवीद्धातानसमौनासमाविति७३ ॥

प० । अनार्यं आर्यकर्माणं आर्यं च अनार्यकर्मिणं संप्रधार्य अब्रवीत् धाता न समौ न असमौ इति

यो० । आर्यकर्माणं अनार्यं चपुनः अनार्यकर्मिणं आर्यं धाता सम्प्रधार्य न समौ न असमौ इति अब्रवीत् ॥

भा० । द्विजातियों के कर्मकरनेवाला शूद्र और शूद्रके कर्मकरनेवाला द्विजाति इनदोनों को विचारकर ब्रह्मा ने यहकहाहै कि ये दोनों न समहैं न असम ॥

ता० । द्विजोंके कर्मकरनेवाला शूद्र—और शूद्रोंके कर्मकरनेवाले द्विजाति—इनदोनों को विचार कर ब्रह्माने यहकहा है कि न ये दोनों सम (तुल्य) और न असम (अतुल्य) हैं अर्थात् द्विजातियों के कर्मोंका करनेवाला भी शूद्र द्विजातियों के समान नहींहोता क्योंकि उसको द्विजातियों के कर्म करने का अधिकार न था इससे द्विजातियों के कर्मोंके आचरण करनेपर भी द्विजातियों की समता नहींहोसक्ती—इसीप्रकार शूद्रके कर्मोंको करनेवाला द्विजाति शूद्रकेसमान नहींहोता क्योंकि निषिद्ध कर्मके करनेसे उसकी जातिकीउत्तमता नष्टनहींहोसक्ती अर्थात् वह ब्राह्मणहीरहताहै—और ये दोनों असम भी नहीं हैं क्योंकि निषिद्ध के आचरण से दोनों समान हैं अर्थात् निषिद्धकर्म की महिमा से दोनों निंदित हैं—तिससे जिसजातिको जो धर्मशास्त्रसे निषिद्धहै वहजाति उसकर्मको न करै ७३ ॥

ब्राह्मणाब्रह्मयोनिस्थायेस्वकर्मण्यवस्थिताः।तेसम्यगुपजीवेयुःषट्कर्माणियथाक्रमम् ७४

प० । ब्राह्मणाः ब्रह्मयोनिस्थाः ये स्वकर्मणि अवस्थिताः ते सम्यक् उपजीवेयुः षट् कर्माणि यथाक्रमम् ॥

यो० । ब्रह्मयोनिस्थाः स्वकर्मणि अवस्थिताः ये ब्राह्मणाः संति ते षट् कर्माणि यथाक्रमं सम्यक् उपजीवेयुः ॥

भा० । ता० । जो ब्राह्मण ब्रह्मकी प्राप्तिके साधन ब्रह्मध्यानमें तत्पर हैं और अपने कर्ममें स्थित हैं वे क्रमसे छः कर्मोंसे अपनी जीविका को भलीप्रकारकरें उनछःकर्मोंको वर्णनकरतेहैं कि ७४ ॥

अध्यापनमध्ययनंयजनंयाजनंतथा। दानंप्रतिग्रहश्चैवषट्कर्माण्यग्रजन्मनः ७५ ॥

प० । अध्यापनं अध्ययनं यजनं याजनं तथा दानं प्रतिग्रहः च एव षट् कर्माणि अग्रजन्मनः ॥

यो० । अध्यापनं—अध्ययनं तथा यजनं याजनं चपुनः दानं प्रतिग्रहः इमानिषट् अग्रजन्मनः कर्माणि ज्ञेयानि ॥

भा० । ता० । ब्राह्मणों के ये छःकर्म जानने कि अंगोंसहित वेदकापढ़ना और पढ़ाना और यज्ञ करना और कराना और दानदेना और लेना ७५ ॥

षणांतुकर्मणामस्यत्रीणिकर्माणिजीविका । याजनाध्यापनेचैवविशुद्धाच्चप्रतिग्रहः ७६

प० । षणां तुँ कर्मणां अस्ये त्रीणि कर्माणि जीविको याजनाध्यापने चँ एवँ विशुद्धातूँ चँ प्रतिग्रहः

यो० । षण्णां कर्मणांमध्ये अस्य (ब्राह्मणस्य) याजनाध्यापने चपुनः विशुद्धात् प्रतिग्रहः इमानि त्रीणिकर्माणि जीविका अस्ति ॥

भा० । ता० । पूर्वोक्त छः कर्मोंके मध्यमें इसब्राह्मणके ये तीनोंकर्म जीविका होते हैं अर्थात् इन तीनोंकर्मोंसेही ब्राह्मण अपनी जीविकाकोकरै कि यज्ञकराना औरपढ़ाना और विशुद्ध (द्विजाति) से प्रतिग्रहलेना ७६ ॥

त्रयोधर्मानिवर्त्तन्तेब्राह्मणात्क्षत्रियंप्रति । अध्यापनंयाजनंचतृतीयश्चप्रतिग्रहः ७७

प० । त्रयः धर्माः निवर्त्तंते ब्राह्मणात् क्षत्रियं प्रति अध्यापनं याजनं चँ तृतीयः चँ प्रतिग्रहः ॥

यो० । ब्राह्मणात् क्षत्रियंप्रति अध्यापनं चपुनः याजनं चपुनः तृतीयः प्रतिग्रहः एतेत्रयः धर्माः निवर्त्तंते ॥

भा० । ता० । ब्राह्मणकी अपेक्षा क्षत्रीके ये तीनधर्म निवृत्ति होजातेहैं अर्थात् क्षत्री इनतीनों धर्मों को न करै कि पढ़ाना और यज्ञकराना और तीसरा प्रतिग्रहलेना ७७ ॥

वैश्यंप्रतितथैवैतेनिवर्तेरन्नितिस्थितिः । नतौप्रतिहितान्धर्मान्मनुराहप्रजापतिः ७८

प० । वैश्यं प्रति तथाँ एवँ एते निवर्तेरन्ँ इति स्थितिः नँ तौ प्रति हिँ तान् धर्मान् मनुः आह प्रजापतिः ॥

यो० । तथैव वैश्यंप्रति एते (पूर्वोक्ताः) धर्माः निवर्तेरन् इतिस्थितिः (मर्यादा) अस्ति हि (यतः) तौ प्रति तान् धर्मान् प्रजापतिः मनुः न आह ॥

भा० । ता० । जैसे क्षत्रीको ब्राह्मणकी अपेक्षा पढ़ाना यज्ञकराना और प्रतिग्रहलेना इनका निषेध है इसीप्रकार वैश्यको भी ये तीनोंकर्म न करने यही शास्त्रकी मर्यादाहै—क्योंकि क्षत्री और वैश्य के लिये वे धर्म प्रजाकेपति मनुने नहींकहे इससे क्षत्री और वैश्यके पढ़ना—यज्ञकरना—दानदेना ये तीनहीं कर्म हैं ७८ ॥

शस्त्रास्त्रभृत्त्वंक्षत्रस्यवणिक्पशुकृषिर्विशः । आजीवनार्थंधर्मस्तुदानमध्ययनंयजिः ७९

प० । शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्पशुकृषिः विशः आजीवनार्थं धर्मः तुँ दानं अध्ययनं यजिः ॥

यो० । क्षत्रस्य आजीवनार्थं शस्त्रास्त्रभृत्त्वं विशः (वैश्यस्य) आजीवनार्थं वणिक्पशुकृषिः अस्ति द्वयोः धर्मस्तुदानं अध्ययनं यजिः ॥

भा० । ता० । क्षत्रीकी आजीविकाकेलिये शस्त्र (खड्गआदि) अस्त्र (वाणआदि) इनकाधारण करना है और वैश्यकी जीविका के लिये वाणिज्य (लेनदेन) और पशुओं की रक्षा और खेती का करना है और इनदोनों का धर्म तो दानदेना—पढ़ना—यज्ञकरनाहै ७९ ॥

वेदाभ्यासोब्राह्मणस्यक्षत्रियस्यचरक्षणम् । वार्ताकर्मैववैश्यस्यविशिष्टानिस्वकर्मसु ८०

प० । वेदाभ्यासः ब्राह्मणस्य क्षत्रियस्य चँ रक्षणं वार्ता कर्म एवँ वैश्यस्य विशिष्टानि स्वकर्मसु ॥

यो० । ब्राह्मणस्य वेदाभ्यासः चपुनः क्षत्रियस्य रक्षणं वैश्यस्य वार्ता कर्मएव इमानि कर्माणि स्वकर्मसु विशिष्टानि (श्रेष्ठानि) भवंति ॥

भा०। ता०। इनतीनों के अपने २ कर्मोंमें यहकर्म श्रेष्ठ होतेहैं अर्थात् जीविकाके लिये यह श्रेष्ठ है कि ब्राह्मण को वेदका अभ्यास क्षत्रीको प्रजाकी रक्षा-और वैश्यको वाणिज्य और पशुओं की पालना ८० ॥

अजीवंस्तुयथोक्तेनब्राह्मणःस्वेनकर्मणा। जीवेत्क्षत्रियधर्मेणसह्यस्यप्रत्यनन्तरः ८१ ॥

प०। अजीवन् तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा जीवेत् क्षत्रियधर्मेण सः हि अस्य प्रत्यनंतरः ॥

यो०। यथोक्तेन स्वेनकर्मणा अजीवन् ब्राह्मणः क्षत्रियधर्मेण जीवेत् हि (यतः) सः क्षत्रियः अस्य (विप्रस्य) प्रत्यनंतरः (संनिकृष्टः) अस्ति ॥

भा०। ता०। शास्त्रोक्त अपने कर्म से नहींजीवताहुआ ब्राह्मण अर्थात् अपने नित्यके-कर्म-और कुटुम्बकी पालनाको न करताहुआ क्षत्रीके धर्मसेही जीविकाको करै क्योंकि वह क्षत्री इसब्राह्मणके समीप का वर्ण है ८१ ॥

उभाभ्यामप्यजीवंस्तुकथंस्यादितिचेद्भवेत्। कृषिगोरक्षमास्थायजीवेद्वैश्यस्यजीविकाम् ८२

प०। उभाभ्यां अपि अजीवन् तु कथं स्यात् इति चेत् भवेत् कृषिगोरक्षं आस्थाय जीवेत् वैश्यस्य जीविकाम् ॥

यो०। चेत् (यदि) कथंचित् उभाभ्यां अजीवन् स्यात् तर्हि कृषिगोरक्षं वैश्यस्यजीविकां आस्थाय जीवेत् ॥

भा०। ता०। यदि ब्राह्मण किसीप्रकार से पूर्वोक्त दोनों वृत्तियों से न जीसके तो कृषि और गौओं की रक्षारूप वैश्यकी जीविकासे जीवै अर्थात् वैश्योंके कर्मोंसेही अपना निर्वाह करै ८२ ॥

वैश्यवृत्त्यापिजीवंस्तुब्राह्मणःक्षत्रियोऽपिवा। हिंसाप्रायांपराधीनांकृषिंयत्नेनवर्जयेत् ८३

प०। वैश्यवृत्त्या अपि जीवन् तु ब्राह्मणः क्षत्रियः अपि वा हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ॥

यो०। वैश्यवृत्त्या अपि जीवन् ब्राह्मणः वा क्षत्रियः हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ॥

भा०। ता०। वैश्यकी वृत्तिसे जीवताहुआ ब्राह्मण और क्षत्रिय-प्रायः भूमिके जंतुओंकीहै हिंसा जिसमें और पराधीन अर्थात् बैल और वर्षा आदि के आधीन खेतीको यत्नसे वर्जदे अर्थात् पशुओंकी पालना न होने पर ही खेतीकरनी और क्षत्रिय भी अपनी वृत्तिके न होने पर ही वैश्य की वृत्ति से जीवै ८३ ॥

कृषिंसाध्वितिमन्यन्तेसावृत्तिःसद्विगर्हिता। भूमिंभूमिशयांश्चैवहन्तिकाष्ठमयोमुखम् ८४

प०। कृषिं साधु इति मन्यंते सा वृत्तिः सद्विगर्हिता भूमिं भूमिशयान् च एव हंति काष्ठं अयोमुखम्॥

यो०। केचित् इदं जीवनं साधु इति मन्यंते-किंतु सा (कृषिः) वृत्तिः सद्विगर्हिता अस्ति-यतः अयोमुखं काष्ठं भूमिं पुनः भूमिशयान् हंति ॥

भा०। ता०। कोई मनुष्य खेतीकी जीविका को श्रेष्ठ मानते हैं परंतु यह खेतीकी जीविका सज्जनोंने निंदित कही है क्योंकि लोहे का है मुख जिसका ऐसा हल भूमि और भूमिमें सोनेवाले जीवोंको नष्ट करदेता है ८४ ॥

इदंतुवृत्तिवैकल्यात्त्यजतोधर्मनैपुणम्। विट्पण्यमुद्धृतोद्धारंविक्रेयंवित्तवर्धनम् ८५

प० । इदं तु वृत्तिवैकल्यात् त्यजतः धर्मनैपुणं विट्पण्यं उद्धृतोद्धारं विक्रेयं वित्तवर्द्धनम् ॥

यो० । वृत्तिवैकल्यात् इदं धर्मनैपुणं त्यजतः विप्रस्य वा क्षत्रियस्य उद्धृतोद्धारं वित्तवर्धनं विक्रेयं विट्पण्यं कर्त्तव्यम् ॥

भा० । ता० । यदि अपनीवृत्तिके अभावमें अपने धर्म में निष्ठाको ब्राह्मण वा क्षत्री त्यागदें तो वैश्य के बेचने योग्य और वित्त (धन) का वर्धक निषिद्ध वस्तुओंसे रहित वस्तुओंके बेचने को करें परंतु इनको वर्जदें कि ८५ ॥

सर्वान्रसानपोहेतकृतान्नंचतिलैःसह । अश्मनोलवणंचैवपशवोयेचमानुषाः ८६

प० । सर्वान् रसान् अपोहेत कृतान्नं च तिलैः सह अश्मनः लवणं च एव पशवः ये च मानुषाः ॥

यो० । सर्वान् रसान् चपुनः तिलैः सह कृतान्नं अश्मनः चपुनः लवणं चपुनः येमानुषाः पशवः तान् अपोहेत (वर्ज्जयेत्) ॥

भा० । ता० । संपूर्ण रस कृतान्न (पूरी आदि) और तिल पाषाण और लवण और मनुष्यों के उपकारी पशु (बैल आदि) इनको वर्जदे यद्यपि लवण भी रसोंमें है तथापि पृथक् उसका निषेध अधिक दोष युक्त प्रायश्चित्त के लिये जानना इसीप्रकार अन्यत्र भी समझना ८६ ॥

सर्वंचतान्तवंरक्तंशाणक्षौमाविकानिच । अपिचेत्स्युररक्तानिफलमूलेतथौषधीः ८७

प० । सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च अपि चेत् स्युः अरक्तानि फलमूले तथा औषधीः ॥

यो० । सर्वरक्ततान्तवं चपुनः शाणक्षौमाविकानि चेत् अरक्तानि अपिस्युः तानि तथा फलमूले औषधीः अपोहेत (वर्ज्जयेत्) ॥

भा० । ता० । कुसुम आदि से रंगहुये सबप्रकारके वस्त्र शण, रेशम, भेडकी ऊन, इनकेवस्त्र चाहे रंगेहों वा न रंगेहों उनको—फल और मूल और गिलोह आदि औषधी इनको वर्जिदें ८७ ॥

अपःशस्त्रंविषंमांसंसोमंगन्धांश्चसर्वशः । क्षीरंक्षौद्रंदधिघृतंतैलंमधुगुडंकुशान् ८८

प० । अपः शस्त्रं विषं मांसं सोमं गंधान् च सर्वशः क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ॥

यो० । अपः (जलानि) शस्त्र—विष—मांसं—सोमं—चपुनः सर्वशः गंधान् क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् अपोहेत (वर्ज्जयेत्) ॥

भा० । ता० । जल—शस्त्र—विष—मांस—सोम (अमृत लता) और संपूर्ण कपूर आदि गंध—दूध—क्षौद्र (सहत) दधि—घी—तेल—मधु—(मदिरा वा मीठा) और गुड—कुशा इनको भी क्रमसे वर्जदें—अर्थात् ब्राह्मण क्षत्री इनको न बेचें ८८ ॥

आरण्यांश्चपशून्सर्वान्दंष्ट्रिणश्चवयांसिच । मद्यंनीलींचलाक्षांचसर्वांश्चैकशफांस्तथा८९

प० । आरण्यान् च पशून् सर्वान् दंष्ट्रिणः च वयांसि च मद्यं नीलीं च लाक्षां च सर्वान् च एकशफान् तथा ॥

यो० । सर्वान् आरण्यान् पशून्—दंष्ट्रिणः चपुनः वयांसि (पक्षिणः) मद्यं—नीलीं चपुनः लाक्षां—तथा सर्वान् एकशफान् वर्जयेत् ॥

भा० । ता० । वनके संपूर्ण पशु (हाथी आदि) और दंष्ट्री (सिंह आदि) और पक्षी (जल के वा अंडज) मदिरा—नील—लाख—और एक खुरवाले संपूर्ण पशु—इनको भी वर्जदें अर्थात् न बेचें ८९ ॥

काममुत्पाद्यकृष्यांतुस्वयमेवकृषीवलः । विक्रीणीततिलान्शुद्धान्धर्मार्थमचिरस्थितान् ९०

प० । कामं उत्पाद्य कृष्यां तु स्वयं एवं कृषीवलः विक्रीणीत तिलान् शुद्धान् धर्मार्थं अचिरस्थितान् ॥

यो० । कृषीवलः कृष्यां स्वयं एव तिलान् उत्पाद्य द्रव्यान्तरमिश्रान् शुद्धान् धर्मार्थं अचिरस्थितान् कामं विक्रीणीत ॥

भा० । ता० । अपनीखेती में स्वयं तिलोंको किसी अन्नके संग पैदाकरके और धर्म (होम आदि) के लिये बहुत शीघ्रही वह किसान बेचदे जो आपत्तिके समय ब्राह्मण और क्षत्रिय भी होकर खेती को करनेलगाहो—यद्यपि तिलोंका बेचना निषिद्ध है तथापि धर्म के लिये दूषित नहीं है ९० ॥

भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुतेतिलैः।कृमिभूतःश्वविष्ठायांपितृभिःसहमज्जति ९१

प० । भोजनाभ्यंजनात् दानात् यत् अन्यत् कुरुते तिलैः कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति ॥

यो० । भोजनाभ्यंजनात्—दानात् अन्यत् यत्कर्म तिलैः कुरुते सः कृमिभूतः सन् श्वविष्ठायां पितृभिः सह मज्जति ॥

भा० । ता० । जो ब्राह्मण वा क्षत्रिय—भोजन—अभ्यंजन (उबटना) और दानसे अन्य (विक्रय आदि) कामको तिलोंसे करताहै वह कृमिहोकर कुत्तेके विष्ठा (मल) में अपने पितरों सहित डूबताहै इससे तिलोंको कदाचित् लाभ के निमित्त न बेचै ९१ ॥

सद्यःपततिमांसेनलाक्षयालवणेनच। त्र्यहेणशूद्रीभवतिब्राह्मणःक्षीरविक्रयात् ९२

प० । सद्यः पतति मांसेन लाक्षया लवणेन च त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयात् ॥

यो० । ब्राह्मणः मांसेन—लाक्षया—चपुनः लवणेन सद्यः पतति—क्षीरविक्रयात् त्र्यहेण शूद्रीभवति(शूद्रजातिंप्राप्नोति॥)

भा० । ता० । मांस—लाख—लवण इनके बेचनेसे ब्राह्मण उसीसमय पतित होताहै—यदि मांस का बेचनाही पतितकरनेका हेतु है तो भक्षण से तो अत्यंत पतित होजातेहैं इससे कभी भी मांसका भक्षण न करै—और दूधके बेचनेसे तो ब्राह्मण तीनदिनमें शूद्रहोजाताहै अर्थात् दूधका बेचना अत्यंत दूषितहै ९२ ॥

इतरेषांतुपण्यानांविक्रयादिहकामतः ।ब्राह्मणःसप्तरात्रेणवैश्यभावंनियच्छति ९३ ॥

प० इतरेषां तु पण्यानां विक्रयात् इह कामतः ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ॥

यो० । इह इतरेषां पण्यानां कामतः विक्रयात् ब्राह्मणः सप्तरात्रेण वैश्यं भावं नियच्छति (गच्छति) ॥

भा० । ता० । पूर्वोक्त मांस आदिकों से इतर निषिद्ध बेचने योग्य वस्तुओं के इच्छापूर्वक बेचने से सात रात्रि में ब्राह्मण वैश्य भावको प्राप्त होजाताहै अर्थात् वैश्य के कर्मों को करनेवाला ब्राह्मण निषिद्ध पदार्थों को कभी न बेचै ९३ ॥

रसारसैर्निमातव्यानत्वेवलवणंरसैः । कृतान्नंचाकृतान्नेनतिलाधान्येनतत्समाः ९४ ॥

प० । रसाः रसैः निमातव्याः न तु एवं लवणं रसैः कृतान्नं च अकृतान्नेन तिलाः धान्येन तत्समाः ॥

यो० । मनुष्यैः रसाः रसैः निमातव्याः तुपुनः लवणं रसैः ननिमातव्यं—कृतान्नं (सिद्धान्नं) कृतान्नेन निमातव्यं— तत्समाः तिलाः धान्येन (अन्नेन) निमातव्याः (परिवर्तनीयाः) ॥

भा० । ता० । मनुष्य गुड आदि रसोंको घृत आदि रसोंसे परिवर्तन (बदलना) करलें परंतु लव-

णको इतर रसोंसे न बदलें—और कृतान्न (बनाहुआ पूरी आदि) को अकृतान्न (कच्चा) से और अन्नके समान तिलोंको अन्नसे बदललें ९४ ॥

जीवेदेतेनराजन्यःसर्वेणाप्यनयंगतः । नत्वेवज्यायसींवृत्तिमभिमन्येतकर्हिचित् ९५ ॥

प० । जीवेत् एतेन राजन्यः सर्वेण अपि अनयं गतः न तु एव ज्यायसीं वृत्तिं अभिमन्येत कर्हिचित् ॥

यो० । अनयंगतः राजन्यः (क्षत्रियः) एतेन सर्वेण अपि जीवेत्—तुपुनः कर्हिचित् अपि ज्यायसीं वृत्तिं न अभिमन्येत (न स्वी कुर्यात्) ॥

भा० । ता० । आपत्तिको प्राप्तहुआ क्षत्रिय भी इस पूर्वोक्त संपूर्ण निषिद्ध भी रस आदिके विक्रय से जीविकाकरै परंतु ब्राह्मणकी जीविका की अभिलाषा कभी भी न करै—और यह काम केवल क्षत्रियकाही नहीं किंतु वैश्य भी आपत्तिके समय ब्राह्मण की वृत्तिकी अभिलाषा न करै ९५ ॥

योलोभादधमोजात्याजीवेदुत्कृष्टकर्मभिः । तंराजानिर्धनंकृत्वाक्षिप्रमेवप्रवासयेत् ९६ ॥

प० । यः लोभात् अधमः जात्या जीवेत् उत्कृष्टकर्मभिः तं राजा निर्धनं कृत्वा क्षिप्रं एव प्रवासयेत् ॥

यो० । यःजात्या अधमः लोभात् उत्कृष्टकर्मभिःजीवेत् राजा तंनिर्धनं कृत्वा क्षिप्रं एव प्रवासयेत् (निःसारयेत्) ॥

भा० । ता० । जो जातिसे अधम मनुष्य लोभसे उत्कृष्ट जातिके कर्मोंसे जीविका करताहै—राजा उस मनुष्यको निर्धनकरके उसीसमय अपने देशमें से निकास दे ९६ ॥

वरंस्वधर्मोविगुणोनपारक्यःस्वनुष्ठितः । परधर्मेणजीवन्हिसद्यःपततिजातितः ९७ ॥

प० । वरं स्वधर्मः विगुणः न पारक्यः स्वनुष्ठितः परधर्मेण जीवन् हि सद्यः पतति जातितः ॥

यो० । विगुणः स्वधर्मः वरं (श्रेष्ठः) भवति स्वनुष्ठितः पारक्यः धर्मः वरं न भवति—हि (यतः) परधर्मेण जीवन् पुरुषः जातितः पतति ॥

भा० । ता० । विगुण भी अपनाधर्म (उत्तमरीतिसे न कियाहो) श्रेष्ठ होताहै—और भलीप्रकारसे किया भी अन्य का धर्म श्रेष्ठ नहीं होता—क्योंकि परधर्म से जीवताहुआ मनुष्य जातिसे उसीसमय पतित होताहै इससे अन्यके धर्म को कभी न करै ९७ ॥

वैश्योऽजीवन्स्वधर्मेणशूद्रवृत्त्यापिवर्तयेत् । अनाचरन्नकार्याणिनिवर्तेतचशक्तिमान् ९८ ॥

प० । वैश्यः अजीवन् स्वधर्मेण शूद्रवृत्त्या अपि वर्तयेत् अनाचरन् अकार्याणि निवर्तेत च शक्तिमान् ॥

यो० । स्वधर्मेण अजीवन् वैश्यः अकार्याणि अनाचरन् सन् शूद्रवृत्त्या अपि वर्तयेत्—शक्तिमान् चेत् शूद्रवृत्तितः निवर्तेत ॥

भा० । ता० । अपनी वृत्तिसे नहीं जीवताहुआ वैश्य शूद्रके कर्मोंसे जीविकाकरै परंतु उच्छिष्ट भोजन आदि निषिद्ध कर्मोंको न करै—और फिर शक्तिमान् (समर्थ) होने पर शूद्रकी वृत्तिसे निवृत्त होजाय अर्थात् त्यागदे ९८ ॥

अशक्नुवंस्तुशुश्रूषांशूद्रःकर्तुंद्विजन्मनाम् । पुत्रदारात्ययंप्राप्तोजीवेत्कारुककर्मभिः ९९ ॥

प० । अशक्नुवन् तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनाम् पुत्रदारात्ययं प्राप्तः जीवेत् कारुककर्मभिः ॥

यो० । द्विजन्मनां शुश्रूषां कर्तुं अशक्नुवन् पुत्रदारात्ययं प्राप्तः शूद्रः कारुककर्मभिः जीवेत् ॥

भा० । ता० । द्विजातियोंकी सेवाकरनेको असमर्थ—और क्षुधासे नष्टताको प्राप्त होतेहैं पुत्र और स्त्री जिसके ऐसा शूद्र कारुककर्मो (सूपकार वा कारीगरी) से जीविकाकरै ९९ ॥

यैःकर्मभिःप्रचरितैःशुश्रूष्यन्तेद्विजातयः।तानिकारुककर्माणिशिल्पानिविविधानिच १००

प० । यैः कर्मभिः प्रचरितैः शुश्रूष्यंते द्विजातयः तानि कारुककर्माणि शिल्पानि विविधानि च ॥

यो० । यैः प्रचरितैः कर्मभिः द्विजातयः शुश्रूष्यंते तानि (तक्षणादीनि) कर्माणि चपुनः विविधानि शिल्पानि (चित्रलिखितादीनि) शूद्रः कुर्यात् ॥

भा० । ता० । जिन कर्मोंसे द्विजातियों की सेवाकरसके उन कारुककर्मों (तक्षण आदि) को और चित्र लिखित आदि नानाप्रकारके शिल्प कर्मोंको शूद्र करै १०० ॥

वैश्यवृत्तिमनातिष्ठन्ब्राह्मणःस्वेपथिस्थितः।अवृत्तिकर्शितःसीदन्निमंधर्मंसमाचरेत् १०१

प० । वैश्यवृत्तिं अनातिष्ठन् ब्राह्मणः स्वे पथि स्थितः अवृत्तिकर्शितः सीदन् इमं धर्मं समाचरेत् ॥

यो० । स्वेपथिस्थितः अवृत्तिकर्शितः सीदन् ब्राह्मणः वैश्यवृत्तिं अनातिष्ठन् सन् इमं धर्मं समाचरेत् ॥

भा० । ता० । जीविकाके अभावसे पीडित और दुःखको प्राप्तहुआ अपने धर्म में स्थित ब्राह्मण वैश्यकी वृत्ति में नहीं टिककर इसी (वक्ष्यमाण) धर्म को करै अर्थात् दुःख अवस्था में क्षत्री और वैश्य वृत्तिको धारणकरै और विगुण भी अपनाधर्म इसी अध्यायके ९७ श्लोकमें उत्तम कहा है उसमें टिकाहुआ ब्राह्मण इस धर्म को करै क्योंकि यदि विगुण प्रतिग्रह—आदि अपनी वृत्ति न मिलसके तभी परवृत्ती का आश्रय लेना ठीक है कि १०१ ॥

सर्वतःप्रतिगृह्णीयाद्ब्राह्मणस्त्वनयंगतः । पवित्रंदुष्यतीत्येतद्धर्मतोनोपपद्यते १०२ ॥

प०।सर्वतः प्रतिगृह्णीयात् ब्राह्मणः तु अनयं गतः पवित्रं दुष्यति इति एतत् धर्मतः न उपपद्यते॥

यो० । पवित्रं दुष्यति इति एतत् धर्मतः यतः न उपपद्यते अतःकारणात् अनयंगतः ब्राह्मणः सर्वतः प्रतिगृह्णीयात् ॥

भा० । ता० । आपत्तिको प्राप्तहुआ ब्राह्मण अत्यंत निंदित भी सबसे प्रतिग्रहको ले क्योंकि पवित्रवस्तु किसी अपवित्रसे (जैसे गंगा निषिद्ध जलके मिलने से) दूषित होतीहै यह बात शास्त्रकी मर्यादासे सिद्ध नहीं होसक्ती क्योंकि १०२ ॥

नाध्यापनाद्याजनाद्वागर्हिताद्वाप्रतिग्रहात् । दोषोभवतिविप्राणांज्वलनाम्बुसमाहिते १०३

प० । न अध्यापनात् याजनात् वा गर्हितात् वा प्रतिग्रहात् दोषः भवति विप्राणां ज्वलनाम्बुसमाः हि ते ॥

यो० । गर्हितात्—अध्यापनात्—याजनात्—वाप्रतिग्रहात्—विप्राणां दोषो न भवति हि (यतः) ते (विप्राः) ज्वलनाम्बुसमाः भवंति ॥

भा० । ता० । आपत्तिके समय निंदित पढ़ाने और निंदित यज्ञकराने और निंदित प्रतिग्रह से ब्राह्मणोंको दोष (अधर्म) नहीं होता क्योंकि वे ब्राह्मण अग्नि और जलके समान स्वभावसे पवित्र होतेहैं १०३ ॥

जीवितात्ययमापन्नोयोऽन्नमत्तियतस्ततः । आकाशमिवपंकेननसपापेनलिप्यते १०४ ॥

प० । जीवितात्ययं आपन्नः यः अन्नं अत्ति यतः ततः आकाशं इव पंकेन न सः पापेन लिप्यते ॥

यो० । जीवितात्ययं आपन्नः यः ब्राह्मणः यतः ततः अन्नं अत्ति सःब्राह्मणः पंकेन आकाशं इव न लिप्यते ॥

भा० । ता० । प्राणोंके नाशको प्राप्तहुआ जो ब्राह्मण जहां तहां (प्रतिलोमज आदि) से अन्नको भक्षण करताहै वह इसप्रकार लिप्त नहीं होता जैसे पंक (कीच) से आकाश १०४ ॥

अजीगर्तःसुतंहन्तुमुपासर्पद्बुभुक्षितः। नचालिप्यतपापेनक्षुत्प्रतीकारमाचरन् १०५॥

प० । अजीगर्तः सुतं हंतुं उपासर्पत् बुभुक्षितः न च अलिप्यत पापेन क्षुत्प्रतीकारं आचरन् ॥

यो० । बुभुक्षितः अजीगर्तः सुतं (शुनःशेफं) हंतुं उपासर्पत् चपुनः क्षुत्प्रतीकारं आचरन् सन् पापेन न अलिप्यत ॥

भा० । ता० । भूखा अजीगर्त ऋषि अपनेपुत्र शुनःशेफके मारनेको उसके समीप जाता भया यद्यपि उसने उस पुत्रको बेचदियाथा तथापि यज्ञमें सौ गौओंके लाभके लिये हिंसकहोकर उसके मारने को उद्यत भया और क्षुधाका प्रतीकार (निवारण) करताहुआ वह अजीगर्त पापसे लिप्त न हुआ अर्थात् पापका भागी न हुआ यह बात बह्वृच ब्राह्मणके विषय शुनःशेफके आख्यान में प्रकट कही है १०५ ॥

श्वमांसमिच्छन्नार्तोत्तुंधर्माधर्मविचक्षणः। प्राणानांपरिरक्षार्थंवामदेवोनलिप्तवान् १०६॥

प० । श्वमांसं इच्छन् आर्तः अत्तुं धर्माधर्मविचक्षणः प्राणानां परिरक्षार्थं वामदेवः न लिप्तवान् ॥

यो० । धर्माधर्मविचक्षणः आर्तः वामदेवः श्वमांसं प्राणानां परिरक्षार्थं अत्तुंइच्छन् पापेन न लिप्तवान् ॥

भा० । ता० । धर्म और अधर्म का ज्ञाता क्षुधासे पीडित वामदेव ऋषि श्वमांसकेखानेकीइच्छा प्राणोंकी रक्षाके लिये करताहुआ पापसे लिप्त न हुआ अर्थात् दोषका भागी न हुआ १०६ ॥

भरद्वाजःक्षुधार्तस्तुसपुत्रोविजनेवने। बह्वीर्गाःप्रतिजग्राहवृधोस्तक्ष्णोमहातपाः १०७॥

प० । भरद्वाजः क्षुधार्तः तु सपुत्रः विजने वने बह्वीः गाः प्रतिजग्राह वृधोः तक्ष्णः महातपाः ॥

यो० । क्षुधार्तः सपुत्रः महातपाः भरद्वाजः मुनिः विजनेवने वृधोः तक्ष्णः बह्वीः गाः प्रतिजग्राह ॥

भा० । ता० । पुत्रोंसहित और क्षुधासे पीडित महान् तपस्वी भरद्वाज मुनि विजनवन (मनुष्यों रहित) में वृधुनामातक्षा (बढ़ई) की बहुतसी गौओंका प्रतिग्रह लेताभया १०७ ॥

क्षुधार्तश्चात्तुमभ्यागाद्विश्वामित्रःश्वजाघनीम्। चण्डालहस्तादादायधर्माधर्मविचक्षणः१०८

प०। क्षुधार्तः च अत्तुं अभ्यागात् विश्वामित्रःश्वजाघनीं चण्डालहस्तात् आदाय धर्माधर्मविचक्षणः॥

यो० । क्षुधार्तः धर्माधर्मविचक्षणः विश्वामित्रः चंडालहस्तात् आदाय श्वजाघनीं अत्तुं अभ्यागात् ॥

भा० । ता० । क्षुधासे पीडित धर्म और अधर्मका ज्ञाता विश्वामित्रऋषि चंडालके हाथसे ग्रहण करके कुत्तेकी जंघाके मांसके भक्षण करने को उद्यत होतेभये १०८ ॥

प्रतिग्रहाद्याजनाद्वातथैवाध्यापनादपि। प्रतिग्रहःप्रत्यवरःप्रेत्यविप्रस्यगर्हितः १०९ ॥

प० । प्रतिग्रहात् याजनात् वा तथा एव अध्यापनात् अपि प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ॥

यो० । प्रतिग्रहात् वायाजनात् तथैव अध्यापनात् विप्रस्य प्रेत्य गर्हितः प्रतिग्रहः प्रत्यवरः (निकृष्टः) अस्ति ॥

भा०।ता०। निंदित प्रतिग्रह—याजन—और अध्यापन—इनतीनोंमें ब्राह्मणको प्रतिग्रह अत्यन्त नि-

कृष्ट है क्योंकि प्रतिग्रह परलोक में नरकका हेतु होताहै इससे आपत्तिके समय प्रथम निंदित पढ़ाने और यज्ञ कराने में प्रवृत्तहो और यदि वे न मिलें तो निंदित प्रतिग्रह से निर्वाह करै क्योंकि १०९॥

याजनाध्यापनेनित्यंक्रियेतेसंस्कृतात्मनाम्। प्रतिग्रहस्तुक्रियतेशूद्रादप्यन्त्यजन्मनः११०

प०। याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनां प्रतिग्रहः तु क्रियते शूद्रात् अपि अंत्यजन्मनः ॥

यो०। याजनाध्यापने नित्यं संस्कृतात्मनां क्रियेते प्रतिग्रहस्तु अंत्यजन्मनः शूद्रात् अपि क्रियते ॥

भा०। ता०। यज्ञकराना और वेद पढ़ाना ये दोनों सदैव अर्थात्—आपत्तिके विना और आपत्ति के समय उनकेही किये जाते हैं जिन द्विजातियों का यज्ञोपवीत संस्कार होताहै और प्रतिग्रह तो निकृष्ट जाति शूद्रसे भी लियाजाता है इससे उन दोनोंसे प्रतिग्रह निंदित है ११० ॥

जपहोमैरपैत्येनोयाजनाध्यापनैःकृतम्। प्रतिग्रहनिमित्तंतुत्यागेनतपसैवच १११ ॥

प०। जपहोमैः अपैति एनः याजनाध्यापनैः कृतं प्रतिग्रहनिमित्तं तु त्यागेन तपसा एव च ॥

यो०। ब्राह्मणस्य याजनाध्यापनैः कृतंएनः जपहोमैः अपैति (नश्यति) प्रतिग्रहनिमित्तंतुएनः त्यागेन चपुनः तपसा अपैति ॥

भा०। ता०। निषिद्ध यज्ञ कराने और पढ़ाने से पैदाहुआ ब्राह्मणका पाप जप और होम करने से नष्ट होजाता है और प्रतिग्रहसे पैदाहुआ तो पाप प्रतिग्रह लिये द्रव्यके त्यागसे और महीने भर तक गोशालामें तपकरने सेही दूरहोताहै १११ ॥

शिलोञ्छमप्याददीतविप्रोऽजीवन्यतस्ततः।प्रतिग्रहाच्छिलःश्रेयांस्ततोप्युञ्छःप्रशस्यते ११२

प०। शिलोञ्छं अपि आददीत विप्रः अजीवन् यतः ततः प्रतिग्रहात् शिलः श्रेयान् ततः अपि उञ्छः प्रशस्यते ॥

यो०। अजीवन्विप्रः यतः ततः शिलोंछं अपि आददीत प्रतिग्रहात् शिलः श्रेयान भवति ततः (शिलात्) अपि उञ्छः बुधैः प्रशस्यते ॥

भा०। ता०। अपनी वृत्तिसे नहीं जीवताहुआ ब्राह्मण जहां तहांसे शिलोंछको भी ग्रहण करै अर्थात् शिलोंछ मिलसकै तो निषिद्ध प्रतिग्रह न ले क्योंकि प्रतिग्रहसे शिलाश्रेष्ठ होताहै और शिले से उंछको विद्वानोंने उत्तम कहा है—खेतमेंसे एक २ अन्नकी मंजरी (बाली) बीनकरि लाना उसे शिल कहते हैं और एक२ अन्नके दानेको बीनकर लाना उसे उंछ कहते हैं ११२ ॥

सीदद्भिःकुप्यमिच्छद्भिर्धनंवापृथिवीपतिः। याच्यःस्यात्स्नातकैर्विप्रैरदित्सन्त्यागमर्हति ११३ ॥

प०। सीदद्भिः कुप्यं इच्छद्भिः धनं वा पृथिवीपतिः याच्यः स्यात् स्नातकैः विप्रैः अदित्सन् त्यागं अर्हति ॥

यो०। सीदद्भिः कुप्यं धनं इच्छद्भिः स्नातकैः विप्रैः पृथिवीपतिः धनंयाच्यः स्यात् अदित्सन् राजात्यागं अर्हति—नयाच्य इत्यर्थः ॥

भा०। ता०। कुटुम्बकी पीड़ासे दुःखित और धनकी इच्छा करनेवाले स्नातक ब्राह्मणराजा से अन्न और वस्त्रकी अथवा यज्ञके उपयोगी सोने चांदी आदि धनकी याचना करें और जो राजा वा क्षत्रिय दिया न चाहताहो अथवा जिसे वे कृपण समझतेहों उसको त्यागिदें अर्थात् उसपर न मांगें

मेधातिथि गोविंदराज तो यह कहते हैं कि वह त्यागके योग्य है अर्थात् उसके राज्यमें न बसें ११३ ॥

अकृतंचकृतात्क्षेत्राद्गौरजाविकमेवच । हिरण्यंधान्यमन्नंचपूर्वंपूर्वमदोषवत् ११४ ॥

प० । अकृतं चँ कृतात् क्षेत्रात् गौः अजाविकं एवँ चँ हिरण्यं धान्यं अन्नं चँ पूर्वं पूर्वं अदोषवत् ॥

यो० । कृतात् क्षेत्रात् अकृतं क्षेत्रं-गौः-अजाविकं-हिरण्यं-धान्यं-चपुनः अन्नं-एषु प्रतिग्रहे पूर्वं पूर्वं अदोषवत् भवति ॥

भा० । ता० । जिसमें सस्य बोआहो उस क्षेत्रसे जिसमें न बोआहो वह क्षेत्र प्रतिग्रह में अदुष्ट है और गौ-बकरी-भेड़-सोना धान्य और अन्न (सरसों आदि) इनमें पहिला २ प्रतिग्रह में अदुष्ट होताहै अर्थात् पहिले २ के न मिलने पर ही पिछले २ का प्रतिग्रह ले ११४ ॥

सप्तवित्तागमाधर्म्यादायोलाभःक्रयोजयः । प्रयोगःकर्मयोगश्चसत्प्रतिग्रहएवच ११५

प० । सप्त वित्तागमाः धर्म्याः दायः लाभः क्रयः जयः प्रयोगः कर्मयोगः चँ सत्प्रतिग्रहः एवँ चँ ॥

यो० । दायः-लाभः-क्रयः जयः प्रयोगः कर्मयोगः चपुनः सत्प्रतिग्रहः एते सप्त वित्तागमाः धर्म्याः भवंति ॥

भा० । दाय-लाभ-क्रय-जय-प्रयोग-कर्मयोग-और उत्तम प्रतिग्रह-ये सात धनकी प्राप्तिके उपाय धर्म के अनुकूल होतेहैं ॥

ता० । दाय आदि सात धनकी प्राप्तिके कारण अपने २ अधिकार के अनुसार धर्म के अनुकूल होतेहैं अर्थात् दूषित नहीं होते-जिन सातोंमें दाय (वंशकी परंपरा से आयाहुआ धन) लाभ (निधि आदि का वा मित्र आदिसे मिलाहुआ धन) क्रय (मोललेना) ये तीनों चारों वर्णोंके लिये धर्म से होतेहैं-और जय (जो विजयसे मिले) का धन क्षत्रिय के लिये धर्म से है प्रयोग (वृद्धि वा व्याज) परधन देना और कर्म योग (खेती लेन देन) ये सब वैश्यके लिये धर्मसे होते हैं-और उत्तमसे प्रतिग्रह यह ब्राह्मण के लिये धर्म से होताहै अर्थात् ये सब यथासंभव द्विजातियों के मुख्य धर्म हैं-और इनको धर्म्य कहने से यह तात्पर्य है कि इनके न मिलने परही शास्त्र विहित इतर कर्मोंमें विना आपत्तिके समय में द्विजाति प्रवृत्तहों और वे इतर कर्म भी न मिलें तो आपत्कालमें कहेहुये धर्मों में ही प्रवृत्तहोकर अपना निर्वाह करें ११५ ॥

विद्याशिल्पंभृतिःसेवागोरक्ष्यंविपणिःकृषिः । धृतिर्भैक्ष्यंकुसीदंचदशजीवनहेतवः ११६ ॥

प० । विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः धृतिः भैक्ष्यं कुसीदं चँ दश जीवनहेतवः ॥

यो० । विद्या-शिल्पं भृतिः सेवा-गोरक्ष्यं-विपणिः कृषिः धृतिः-भैक्ष्यं-चपुनः कुसीदं-एते दशजीवनहेतवः भवंति ॥

भा० । वेदविद्या-शिल्प-वेतन-सेवा-गौओंकी रक्षा-लेनदेन-खेती-धैर्य-भिक्षा-सूदपर धन देना-ये दश जीविकाके हेतु होतेहैं ॥

ता० । विद्या (वेद विद्या) और वेदसे भिन्न वैद्य-तर्क-विषका दूरकरना-आदि जो विद्याहैं वे भी आपत्तिके समय जीवनके लिये दूषित नहीं होतीहैं-और शिल्प (चित्राम वा गंधयुक्त आदि का करना) भृतिः (सेवा) अर्थात् दासभाव से वेतनका ग्रहण-सेवा (दूसरे की आज्ञाका संपादन) गौओंकी रक्षा अर्थात् पशुओंकी पालना-विपणि (लेनदेन)-कृषि (खेती) अर्थात् स्वयं खेती को करना-धृति (संतोष) क्योंकि संतोष होय तो अल्पसे भी जीवन होसक्ता है-और भिक्षा-और कुसीद (सूदपर धनदेना) इन दश कर्मोंसे आपत्तिके समय जीवन होसक्ता है इससे ये दश जीवन के हेतु होते हैं-

परंतु यह आपत्तिका प्रकरण है और इन दशों कर्मोंको जीवनका हेतु कहाहै इससे इन दशोंमें जिस वृत्तिसे आपत्ति में जो जीविकाकरै वह उस वृत्तिसे विना आपत्ति के समय भी करले तो दूषित नहीं होता जैसा ब्राह्मण भृति वा सेवा आदि से—इसीप्रकार शिल्प आदि में भी समझना ११६ ॥

ब्राह्मणःक्षत्रियोवापिवृद्धिंनैवप्रयोजयेत् । कामंतुखलुधर्मार्थंदद्यात्पापीयसेऽल्पिकाम् ११७ ॥

प० । ब्राह्मणः क्षत्रियः वा अपि वृद्धिं न एव प्रयोजयेत् कामं तु खलु धर्मार्थं दद्यात् पापीयसे अल्पिकाम् ॥

यो० । ब्राह्मणः वा क्षत्रियः वृद्धिं नैव प्रयोजयेत्—किंतु धर्मार्थं पापीयसे अल्पिकां कामं दद्यात् ॥

भा० । ता० । ब्राह्मण वा क्षत्रिय—आपत्ति के समय में भी सूदके लिये धनको न दे किंतु निकृष्ट कर्म से धर्म के लिये अत्यंत अल्प सूदको दे वा ले ११७ ॥

चतुर्थमाददानोऽपिक्षत्रियोभागमापदि । प्रजारक्षन्परंशक्त्याकिल्बिषात्प्रतिमुच्यते ११८॥

प० । चतुर्थं आददानः अपि क्षत्रियः भागं आपदि प्रजाः रक्षन् परं शक्त्या किल्बिषात् प्रतिमुच्यते ॥

यो० । आपदि चतुर्थं भागं आददानः अपि क्षत्रियः शक्त्या परं प्रजाः रक्षन् सन् किल्बिषात् प्रतिमुच्यते (पापभागी न भवति) ॥

भा० । आपत्ति के समय चौथेभाग को ग्रहणकरिकै अपनीशक्ति से प्रजाकी रक्षा करताहुआ राजा पापसे छूटता है ॥

ता० । अब राजाओंका आपत्तिका धर्मकहतेहैं कि राजाको अन्नआदिकोंमेंसे आठवांभाग ग्रहण करना धर्मसे कहाहै यदि वह राजा आपत्तिके समय धान्यआदि का चौथाभाग भी अपनेकरमें ग्रहण करिले और अपनी उत्तमशक्तिसे प्रजाकीरक्षाकरै तो उस अधिककरिकै ग्रहणकरनेका जो पाप उस से छूटजाता है क्योंकि आपत्ति के समय में भी राजाको प्रजाकी रक्षा शास्त्रकारोंने कही है ११८ ॥

स्वधर्मोविजयस्तस्यनाहवेस्यात्पराङ्मुखः । शस्त्रेणवैश्यान्रक्षित्वाधर्म्यमाहारयेद्बलिम् ११९

प० । स्वधर्मः विजयः तस्य न आहवे स्यात् पराङ्मुखः शस्त्रेण वैश्यान् रक्षित्वा धर्म्यं आहारयेत् बलिम् ॥

यो० । तस्य (राज्ञः) विजयः स्वधर्मः अस्ति राजा आहवे (युद्धे) पराङ्मुखः नस्यात् वैश्यान् शस्त्रेण रक्षित्वा धर्म्यं बलिं आहारयेत् ॥

भा० । ता० । विजयकरना राजाका स्वधर्महै और संग्राम में राजा पराङ्मुखनहो और शस्त्रोंसे वैश्योंकीरक्षा अर्थात् चोरोंको नष्टकरताहुआ राजा धर्मके अनुकूल बलि(कर)को ग्रहणकरै ११९ ॥

धान्येऽष्टमंविंशांशुल्कंविंशंकार्षापणावरम् । कर्मोपकरणाःशूद्राःकारवःशिल्पिनस्तथा १२०॥

प० । धान्ये अष्टमं विंशं शुल्कं विंशं कार्षापणावरं कर्मोपकरणाः शूद्राः कारवः शिल्पिनः तथा ॥

यो० । धान्ये विंशां अष्टमं—कार्षापणावरं विंशं शुल्कं भवति शूद्राः कारवः तथा शिल्पिनः कर्मोपकरणाः भवंति॥

भा० । राजा आपत्ति के समय अन्नका आठवां और सुवर्णादि में बीसवांभागकरले और शूद्र कारीगर—बढ़ई—इनसे कर न ले किंतु महीने में एक वा दोदिन वेतन दिये विना इनसे अपना काम कराले ॥

ता० । धान्य (अन्न) में वैश्यों से आठवांभागकरकाले यद्यपि पहिले बारहवांभागकहाहै तथापि आपत्ति के समय आठवां और अत्यन्त आपत्तिमें पूर्वोक्त चौथेभागको ग्रहणकरै और कार्षापण (सुवर्ण आदि) कोंमें बीसवांभागकर ग्रहणकरै और राजाको इसै वचनसे पशु और सुवर्णमें पचासवां भाग करलेना लिखाहै परन्तु आपत्तिके समय बीसवांभागग्रहणकरै और शूद्र—कारु (सूपकारआदि) शिल्पी (बढ़ईआदि) इनसे आपत्ति के समयमें भी राजा करको ग्रहण न करै क्योंकि ये अपने २ कामसेही राजाका उपकार विना वेतनलिये करें १२० ॥

शूद्रस्तुवृत्तिमाकांक्षन्क्षत्रमाराधयेद्यदि । धनिनंवाप्युपाराध्यवैश्यंशूद्रोजिजीविषेत् १२१ ॥

प० । शूद्रः तु वृत्तिं आकांक्षन् क्षत्रं आराधयेत् यदि धनिनं वा अपि उपाराध्य वैश्यं शूद्रःजिजीविषेत् ॥

यो० । अजीवन् शूद्रः यदि वृत्तिं आकांक्षन् भवति तर्हि क्षत्रं आराधयेत् वा शूद्रः धनिनं वैश्यं उपाराध्य जिजीविषेत्

भा० । ता० । ब्राह्मणकी सेवासे नहींजीवताहुआ शूद्र यदि जीविकाकी इच्छाकरै तो क्षत्री की सेवाकरै और क्षत्रीके न मिलनेपर धनवाले वैश्यकी सेवाकरके जीवै और यदि तीनों द्विजातियों की सेवाकरने का सामर्थ्य न होय तो पूर्वोक्त कर्मोंकोकरै १२१ ॥

स्वर्गार्थमुभयार्थंवाविप्रानाराधयेत्तुसः । जातब्राह्मणशब्दस्यसाह्यस्यकृतकृत्यता १२२

प० । स्वर्गार्थं उभयार्थं वा विप्रान् आराधयेत् तु सः जातब्राह्मणशब्दस्य सा हि अस्य कृतकृत्यता

यो० । सः (शूद्रः) स्वर्गार्थं वा उभयार्थं विप्रान् आराधयेत् हि (यतः) जातब्राह्मणशब्दस्य अस्य सा (विप्राराधना) कृतकृत्यता अस्ति ॥

भा० । ता० । स्वर्गकी प्राप्तिकेलिये अथवा अपनी जीविका के लिये वा दोनोंके लिये शूद्र ब्राह्मणोंकी सेवाकरै क्योंकि ब्राह्मणोंके आश्रयके लिये पैदाहुये इसशूद्रकी वहब्राह्मणों की आराधनाही कृतकृत्यता होतीहै अर्थात् ब्राह्मणों की सेवासेही कृतकृत्यहोताहै क्योंकि १२२ ॥

विप्रसेवैवशूद्रस्यविशिष्टंकर्मकीर्त्यते । यदतोऽन्यद्धिकुरुतेतद्भवत्यस्यनिष्फलम् १२३॥

प० । विप्रसेवा एव शूद्रस्य विशिष्टं कर्म कीर्त्यते यत् अतः अन्यत् हि कुरुते तत् भवति अस्य निष्फलम् ॥

यो० । शूद्रस्य विप्रसेवाएव विशिष्टंकर्म बुधैः कीर्त्यते हि (यतः) अतः (सेवायाः) अन्यत् यत् कर्म कुरुते तत् अस्य निष्फलं भवति ॥

भा० । ता० । शूद्रके इतरकर्मोंसे ब्राह्मणकी सेवाही श्रेष्ठकर्म शास्त्रकारोंने कहाहै क्योंकि सेवासे भिन्न जो कर्म यहकरताहै वह निष्फलहोताहै यहश्लोक इसलिये है कि विप्रकी सेवा शूद्रका मुख्य कर्म है इसलिये नहींहै कि इतरकर्म (पाकयज्ञादि) उसके निष्फल होतेहैं १२३ ॥

प्रकल्प्यातस्यतैर्वृत्तिःस्वकुटुम्बाद्यथार्हतः । शक्तिंचावेक्ष्यदाक्ष्यंचभृत्यानांचपरिग्रहम् १२४ ॥

प० । प्रकल्प्या तस्य तैः वृत्तिः स्वकुटुंबात् यथार्हतः शक्तिं च अवेक्ष्य दाक्ष्यं च भृत्यानां च परिग्रहम्

यो० । तैः (ब्राह्मणैः) तस्य (शूद्रस्य) स्वकुटुंबात् शक्ति—दाक्ष्यं चपुनः भृत्यानां परिग्रहं अवेक्ष्य यथार्हतः वृत्तिः प्रकल्प्या (कर्तव्या) ॥

---

१ पंचाशद्भागआदेयोराज्ञापशुहिरण्ययोः ॥

भा० । ता० । वे ब्राह्मण उसशूद्रकी अपने कुटुम्ब से उसकी सेवाका सामर्थ्य—कर्म में उत्साह और पुत्रस्त्रीआदि का प्रमाण देखकर यथायोग्य अर्थात् उसके कुटुम्बके भरण पोषणके अनुरूप जीविका को नियतकरदें जिससे निश्चिंत हुआ वह सेवाको कियाकरै १२४ ॥

उच्छिष्टमन्नंदातव्यंजीर्णानिवसनानिच । पुलकाश्चैवधान्यानांजीर्णाश्चैवपरिच्छदाः १२५॥

प० । उच्छिष्टं अन्नं दातव्यं जीर्णानि वसनानि च पुलकाः च एव धान्यानां जीर्णाः च एव परिच्छदाः ॥

यो० । ब्राह्मणैः तस्मै (शूद्राय) उच्छिष्टं अन्नंदातव्यं चपुनः जीर्णानि वसनानि धान्यानां पुलकाः चपुनः जीर्णाः परिच्छदाः दातव्याः ॥

भा० । ता० । ब्राह्मण उस अपने सेवक शूद्रको भोजन से शेषअन्नको और जीर्णवस्त्रों को और अन्नके पुलक (निकृष्टअन्न) और जीर्ण परिच्छद (गृहकीसामग्री) दे इसश्लोकमें शूद्रको उच्छिष्ट अन्नदेना लिखाहै इससे पूर्वोक्त इस श्लोकमें शूद्रको उच्छिष्टका जो निषेधहै वह उसी शूद्रकोहै जो अपनी सेवा न करताहो १२५ ॥

नशूद्रेपातकंकिञ्चिन्नचसंस्कारमर्हति । नास्याधिकारोधर्मेऽस्तिनधर्मात्प्रतिषेधनम् १२६॥

प० । न शूद्रे पातकं किंचित् न च संस्कारं अर्हति न अस्य अधिकारः धर्मे अस्ति न धर्मात् प्रतिषेधनम् ॥

यो० । शूद्रे किंचित् पातकं न अस्ति शूद्रः संस्कारं न अर्हति अस्यधर्मे अधिकारः धर्मात् प्रतिषेधनं न अस्ति ॥

भा०। ता०। शूद्रको लशुनआदिके भक्षणमें कुछ पातकनहीं है अर्थात् ब्रह्मवधआदिमें अवश्य पातक है क्योंकि अहिंसाआदि धर्म चारोंवर्णो के साधारण रीतिसे कहे हैं और शूद्र यज्ञोपवीत संस्कार के योग्यनहींहोता और अग्निहोत्रआदि धर्मोंमेंभी शूद्रको अधिकारनहीं और शास्त्रविहित पाकयज्ञादिक शूद्रके धर्मोंका निषेध भी शूद्रको नहींहै १२६ ॥

धर्मेप्सवस्तुधर्मज्ञाःसतांवृत्तमनुष्ठिताः । मन्त्रवर्ज्यंनदुष्यन्तिप्रशंसांप्राप्नुवन्तिच १२७ ॥

प० । धर्मेप्सवः तु धर्मज्ञाः सतां वृत्तं अनुष्ठिताः मंत्रवर्ज्यं न दुष्यंति प्रशंसां प्राप्नुवंति च ॥

यो० । धर्मेप्सवः धर्मज्ञाः सतांवृत्तं अनुष्ठिताः शूद्राः मंत्रवर्ज्यं पंचयज्ञादि धर्मान् कुर्वाणाः न दुष्यंति चपुनः प्रशंसां प्राप्नुवंति ॥

भा० । ता० । जो शूद्र अपने धर्म के अभिलाषी वा ज्ञाता हैं और सत्पुरुषोंके उत्तम आचरणमें आश्रित हैं अर्थात् द्विजातियोंके सेवकहैं वे वेदोक्त मंत्रोंको छोड़कर अर्थात् इस याज्ञवल्क्यके वचनानुसार नमस्कार मंत्रसे पंचयज्ञादि धर्मोंकोकरतेहुये दूषित नहीं होतेहैं और जगत् में प्रशंसा (कीर्ति) को प्राप्त होतेहैं १२७ ॥

यथायथाहिसद्वृत्तमातिष्ठत्यनसूयकः । तथातथेमंचामुंचलोकंप्राप्नोत्यनिन्दितः १२८ ॥

प० । यथा यथा हि सद्वृत्तं आतिष्ठति अनसूयकः तथा तथा इमं च अमुं च लोकं प्राप्नोति अनिंदितः ॥

यो० । यथा यथा अनसूयकः शूद्रः सद्वृत्तं आतिष्ठति तथा तथा अनिंदितः सन् इमं चपुनः अमुंलोकं प्राप्नोति ॥

---

१ नशूद्रायमतिंदद्यान्नोच्छिष्टंनहविष्कृतम् ॥

२ नमस्कारेणमंत्रेणपंचयज्ञान्नहापयेत् ॥

भा० । ता० । अन्यके गुणोंकी निंदाको नहीं करताहुआ शूद्र जैसे २ द्विजातियोंकी सेवाको करताहै तैसेही तैसे निंदा रहित होकर इसलोक और परलोक को प्राप्त होताहै अर्थात् दोनों लोकोंके सुखको प्राप्त होताहै १२८ ॥

शक्तेनापिहिशूद्रेणनकार्योधनसंचयः । शूद्रोहिधनमासाद्यब्राह्मणानेवबाधते १२९

प० । शक्तेन अपि हि शूद्रेण न कार्यः धनसंचयः शूद्रः हि धनं आसाद्य ब्राह्मणान् एव बाधते ॥

यो० । शक्तेन अपि शूद्रेण धनसंचयः न कार्यः हि (यतः)शूद्रः धनं आसाद्य ब्राह्मणान् एव बाधते ॥

भा० । ता० । धनके संचय में समर्थ भी शूद्र धनके संचयको न करै अर्थात् जितने से अपनेकुटुंबका भरण पोषण और पंचयज्ञादि उचित कर्म होसकें उससे अधिक धनके संचय में तत्पर नहो क्योंकि शूद्र धनको प्राप्त होकर ब्राह्मणोंकोही पीडा देताहै क्योंकि शास्त्रका इसको ज्ञान नहीं होता और धनके मदसे ब्राह्मणोंकी सेवा नहीं करेगा १२९ ॥

एतेचतुर्णांवर्णानामापद्धर्माःप्रकीर्तिताः।यान्सम्यगनुतिष्ठन्तोव्रजन्तिपरमांगतिम्१३०

प० । एते चतुर्णां वर्णानां आपद्धर्माः प्रकीर्तिताः यान् सम्यक् अनुतिष्ठंतः व्रजंति परमां गतिम् ॥

यो० । चतुर्णां वर्णानां एते आपद्धर्माः मयाप्रकीर्तिताः यान् सम्यक् अनुतिष्ठंतः सर्वे वर्णाः परमांगतिं व्रजंति ॥

भा० । ता० । चारों वर्णों के आपत्ति में करने योग्य ये धर्म मैंने तुमको कहे जिन धर्मोंको भली प्रकार करतेहुये अर्थात् विहित कर्म क करने और निषिद्ध कर्म के न करनेसे निष्पापहुये चारों वर्ण ब्रह्मज्ञानके लाभसे परमगति (मोक्ष) को प्राप्त होते हैं १३० ॥

एषधर्मविधिःकृत्स्नश्चातुर्वर्ण्यस्यकीर्तितः अतःपरंप्रवक्ष्यामिप्रायश्चित्तविधिंशुभम् १३१॥

इतिमानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायांदशमोऽध्यायः १० ॥

प० । एषः धर्मविधिः कृत्स्नः चातुर्वर्ण्यस्य कीर्तितः अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम् ॥

यो० । चातुर्वर्ण्यस्य एषः कृत्स्नः धर्मविधिः मयाकीर्तितः अतः परं शुभं प्रायश्चित्तविधिं प्रवक्ष्यामि ॥

भा० । ता० । चारों वर्णोंका यह संपूर्ण धर्म का विधान मैंने तुमको कहा इससे आगे उत्तम प्रायश्चित्त का विधान कहूंगा १३१ ॥

इति मन्वर्थभास्करे दशमोऽध्यायः १० ॥

अथ एकादशोऽध्याय प्रारंभः ॥

सान्तानिकंयक्ष्यमाणमध्वगंसर्ववेदसम् । गुर्वर्थंपितृमात्रर्थंस्वाध्यायार्थ्युपतापिनः १ ॥

नवैतान्स्नातकान्विद्याद्ब्राह्मणान्धर्मभिक्षुकान् । निःस्वेभ्योदेयमेतेभ्योदानंविद्याविशेषतः २॥

प० । सांतानिकं यक्ष्यमाणं अध्वगं सर्ववेदसम् गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः ॥

प० । नव एतान् स्नातकान् विद्यात् ब्राह्मणान् धर्मभिक्षुकान् निःस्वेभ्यः देयं एतेभ्यः दानं विद्याविशेषतः ॥

यो० । सांतानिकं यक्ष्यमाणं अध्वगं सर्ववेदसम् गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः एतान् नव स्नातकान् ब्राह्मणान् धर्मभिक्षुकान् विद्यात् निःस्वेभ्यः एतेभ्यः विद्याविशेषतः दानंदेयम् ॥

भा० । विवाह और यज्ञके अभिलाषी मार्गगामी–सर्वस्वदेकर विश्वजित् का कर्ता–गुरु पिता माता इनतीनों के लिये याचक–वेदपाठी–और रोगी इननवधर्म के भिक्षुक ब्राह्मणों को स्नातक (ब्रह्मचारी) जानै और निर्धनी इनको विद्याके अनुसार दानदे ॥

ता० । जो ब्राह्मण ब्रह्मचारी सान्तानिकहो अर्थात् सन्तानहै फलजिसका ऐसे विवाहका अभिलाषीहो और आवश्यक ज्योतिष्टोमआदि यज्ञ कियाचाहताहो–और जो अध्वगःमार्ग में गमनकरता हो–और जिसने अपना सर्वस्वदेकर विश्वजित् यज्ञकियाहो और जो विद्यापढ़ानेवाले अपने गुरुके लिये भोजन वस्त्रकी याचना करताहो और जो पिताके माताके भोजन वस्त्रकेलिये याचनाकरै और जो वेदपढ़ने के समय भोजन वस्त्रकी याचनाकरै ऐसा ब्रह्मचारी और जो रोगीहो–इननवप्रकारके ब्रह्मचारी ब्राह्मणको धर्मभिक्षुकजानै इनकोही स्नातक कहतेहैं यदि ये नवनिर्धनहों तो इनकोविद्या के अनुसार गौ–सुवर्णआदि दानकोदे–इसमें कोई यह शंकाकरतेहैं कि पहिले यहप्रतिज्ञा करिआये हैं कि इससे आगे प्रायश्चित्त का विधान कहूंगा फिर इन श्लोकों में इनको दान देना यहदान का वर्णन पूर्वप्रतिज्ञा के विरुद्ध मनुजीने किसप्रकारकिया यह शंकाकरना उनका ठीकनहीं है मनुजी यह पहिले कहिआयेहैं कि (दानेनाकार्यकारिणः) कि निंदित कर्मकरनेवाले दानसे शुद्धहोते हैं और आगे भी मनुजी यहकहैंगे (दानेनवधनिर्णेकं सर्पादीनामशक्नुवन्) कि जो सर्पआदिकों के वधका प्रायश्चित्त न करसकै वहदान से शुद्धहोताहै इससे उत्तम प्रायश्चित्त रूपदानके पात्रोंकाकहना इस प्रायश्चित्त प्रकरणकी आदि में असंगत नहीं है और इसीप्रकार वर्णआश्रमके धर्मसे भिन्न प्रायश्चित्त के निमित्तधर्मों के वर्णनकरनेकेलिये यहअध्याय है इससे किसी निमित्तसे किसी अन्यधर्म का लिखना भी असंगतनहीं है १–२ ॥

एतेभ्योहिद्विजाग्र्येभ्योदेयमन्नंसदक्षिणम् । इतरेभ्योबहिर्वेदिकृतान्नंदेयमुच्यते ३ ॥

प० । एतेभ्यः हि द्विजाग्र्येभ्यः देयं अन्नं सदक्षिणं इतरेभ्यः बहिर्वेदि कृतान्नं देयं उच्यते ॥

यो० । एतेभ्यः (पूर्वोक्त नवभ्यः) द्विजाग्र्येभ्यः अन्तर्वेदिसदक्षिणं अन्नंदेयं इतरेभ्यः कृतान्नं बहिर्वेदिदेयं मन्वादिभिः उच्यते ॥

भा० । ता० । इनपूर्वोक्त ब्राह्मणोंमें श्रेष्ठ नव ९ ब्राह्मणोंको वेदीकेभीतर बुलाकरि दक्षिणासहित सिद्धान्नको दे और इनसे अन्यब्राह्मणों को वेदीसे बाहिर सिद्धान्नकोदेना मनुआदिकोंने कहाहै ३ ॥

सर्वरत्नानिराजातुयथार्हंप्रतिपादयेत् । ब्राह्मणान्वेदविदुषोयज्ञार्थंचैवदक्षिणाम् ४ ॥

प० । सर्वरत्नानि राजा तु यथार्हं प्रतिपादयेत् ब्राह्मणान् वेदविदुषः यज्ञार्थं च एव दक्षिणाम् ॥

यो० । राजा सर्वरत्नानि यज्ञार्थं धनं चपुनः दक्षिणां वेदविदुषः ब्राह्मणान् यथार्हं प्रतिपादयेत् ॥

भा० । ता० । राजा मणिमुक्ताआदि सम्पूर्ण रत्न यज्ञके उपयोगी धन और दक्षिणा वेदके ज्ञाता ब्राह्मणों को स्वीकार करावै अर्थात् दे ४ ॥

कृतदारोऽपरान्दारानभिक्षित्वायोऽधिगच्छति।रतिमात्रंफलंतस्यद्रव्यदातुस्तुसंततिः५

प०। कृतदारः अपरान् दारान् भिक्षित्वा यः अधिगच्छति रतिमात्रं फलं तस्य द्रव्यदातुः तु संततिः॥

यो०। यः कृतदारः अपरान् दारान् भिक्षित्वा अधिगच्छति तस्य रतिमात्रं फलं भवति सन्ततिस्तु द्रव्यदातुः भवति॥

भा०। ता०। जो मनुष्य एकस्त्रीके विद्यमानसन्ते अन्यस्त्रियोंको द्रव्यकीयाचनाकरिके विवाहता है अर्थात् दूसरीस्त्री विवाहा चाहताहै उस दूसरी स्त्रीके संग रतिकरनाही विवाहका फल होताहै वह सन्तान तो उसकीही होती है जिससे धनलेकर विवाह कियाहो इससे इसप्रकार धनकी याचना करके द्वितीयविवाहको न करै और न इसप्रकार विवाहकरनेवालेकोधनदे क्योंकि यह द्वितीयविवाह अत्यन्त निंदित है ५॥

धनानितुयथाशक्तिविप्रेषुप्रतिपादयेत् । वेदवित्सुविविक्तेषुप्रेत्यस्वर्गंसमश्नुते ६॥

प०। धनानि तु यथाशक्ति विप्रेषु प्रतिपादयेत् वेदवित्सु विविक्तेषु प्रेत्य स्वर्गं समश्नुते॥

यो०। यः वेदवित्सु विविक्तेषु विप्रेषु धनानि यथाशक्ति प्रतिपादयेत् सः प्रेत्य स्वर्गं समश्नुते॥

भा०। ता०। जो मनुष्य वेदपाठी और पुत्र स्त्री आदिकोंमें आसक्त ब्राह्मणों को अपनी शक्तिके अनुसार धनों (गो भूआदि) को देताहै वहमनुष्य मृत्युके अनन्तर स्वर्गको भोगता है ६॥

यस्यत्रैवार्षिकंभक्तंपर्याप्तंभृत्यवृत्तये । अधिकंवापिविद्येतससोमंपातुमर्हति ७॥

प०। यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये अधिकं वा अपि विद्येत सः सोमं पातुं अर्हति॥

यो०। यस्य पुरुषस्य त्रैवार्षिकं वा अधिकं भक्तं भृत्यवृत्तये पर्याप्तं विद्येत सः पुरुषः सोमं पातुं अर्हति॥

भा०। ता०। जिसमनुष्य के घरमें तीनवर्ष के लिये वा तीनवर्ष से अधिक भोजनकी सामग्री सेवक और अपने कुटुम्बकी पालना के लिये पर्याप्त (पूर्ण) हो वही मनुष्य सोमयज्ञ करनेके योग्य होताहै—यह सोमयज्ञ का निषेध नहीं है क्योंकि यह सोमयज्ञ वर्ष के अन्तमें इस वचनके अनुसार नित्यकर्त्तव्य मनुजी कहआये हैं इससे गृहस्थी अपने कुटुम्ब के निर्वाह में चाहै संकोचकरले परन्तु इसयज्ञका परित्याग न करै ७॥

अतःस्वल्पीयसिद्रव्येयःसोमंपिबतिद्विजः।सपीतसोमपूर्वोऽपिनतस्याप्नोतितत्फलम्८॥

प०। अतः स्वल्पीयसि द्रव्ये यः सोमं पिबति द्विजः सः पीतसोमपूर्वः अपि न तस्य आप्नोति तत् फलम्॥

यो०। अतः कारणात् यः द्विजः स्वल्पीयसि द्रव्येसति सोमं पिबति पीतसोमपूर्वः अपिसः तस्य तत्फलं न आप्नोति

भा०। ता०। जो द्विज तीनवर्षकेलिये पर्याप्तधनसे अल्पधनहोनेपर सोमयज्ञको करताहै पहिले कियाहै सोमयज्ञ जिसने ऐसाभी वहद्विज उसप्रथम सोमयज्ञको प्राप्तनहींहोता अर्थात् उसकापहिला यज्ञभी सम्पन्न नहींहोता दूसरा तो सफल कहांसेहो ८॥

शक्तःपरजनेदातास्वजनेदुःखजीविनि । मध्वापातोविषास्वादःसधर्मप्रतिरूपकः ९॥

प०। शक्तः परजने दाता स्वजने दुःखजीविनि मध्वापातः विषास्वादः सः धर्मप्रतिरूपकः॥

---

१ समाप्तेसोमकेमखेः॥

यो० । यः शक्तः स्वजने दुःखजीविनिसति परजने दाता भवति मध्वापातः विषास्वादः सः धर्मप्रतिरूपकः—अस्ति ॥

भा० । ता० । जो दाता अपने पिता माता ज्ञातिआदिके जनोंको दुर्गतिसे दुःखित होनेपर अपने यशकेलिये अन्यजनों को देताहै मीठेसे प्रारम्भकरिके अन्तमें विषको भक्षण करनेवाला वह धर्मका प्रतिरूपक डिंबधारी है अर्थात् पछिसे नरक में जाताहै इसमें ऐसा न करना चाहिये ९ ॥

भृत्यानामुपरोधेनयत्करोत्यौर्द्ध्वदैहिकम् । तद्भवत्यसुखोदर्कंजीवतश्चमृतस्यच १० ॥

प० । भृत्यानां उपरोधेन यत् करोति और्द्ध्वदैहिकं तत् भवति असुखोदर्कं जीवतः च मृतस्य च ॥

यो० । यत् औद्ध्र्वदैहिकं भृत्यानां उपरोधेन करोति जीवतः चपुनः मृतस्य तत्—औद्ध्र्वदैहिकं असुखोदर्कं भवति ॥

भा० । ता० । पुत्र स्त्री भृत्य आदि अपने पालने योग्योंकी पीडासे जो और्द्ध्व दैहिक (पारलौकिक) कर्म अर्थात् धर्म दान आदि को करताहै वह धर्म आदि जीवते और मरे मनुष्यको दुःखदायी होताहै १० ॥

यज्ञश्चेत्प्रतिरुद्धःस्यादेकेनांगेनयज्वनः । ब्राह्मणस्यविशेषेणधार्मिकेसतिराजनि ११ ॥
योवैश्यःस्याद्बहुपशुर्हीनक्रतुरसोमपः । कुटुम्बात्तस्यतद्द्रव्यमाहरेद्यज्ञसिद्धये १२ ॥

प० । यज्ञः चेत् प्रतिरुद्धः स्यात् एकेन अंगेन यज्वनः ब्राह्मणस्य विशेषेण धार्मिके सति राजनि ॥

प० । यः वैश्यः स्यात् बहुपशुः हीनक्रतुः असोमपः कुटुंबात् तस्य तत् द्रव्यं आहरेत् यज्ञसिद्धये ॥

यो० । चेत् यदि यज्वनः विशेषेण ब्राह्मणस्य यज्ञः धार्मिके राजनि सति एकेन अंगेन प्रतिरुद्धः स्यात्—तर्हि—यः वैश्यः बहुपशुः हीनक्रतुः असोमपः स्यात् तस्य कुटुंबात् यज्ञसिद्धये तत् द्रव्यं आहरेत् ॥

भा० । ता० । यदि क्षत्रिय आदि यज्ञकरनेवाले का और विशेषकर ब्राह्मणका यज्ञ संपूर्ण अंगों की पूर्णता होनेपर किसी एक अंगसे असंपूर्ण रहजाय और धार्मिक राजा होय तो—जिस वैश्य के यहां बहुत पशुहों और जो वैश्य यज्ञसे हीन और सोमपान रहित हो उसके कुटुंबसे यज्ञकी सिद्धि के लिये उतने द्रव्यको राजा ग्रहणकरले जितने से वह यज्ञका अंग पूर्ण हो ११ । १२ ॥

आहरेत्त्रीणिवाद्वेवाकामंशूद्रस्यवेश्मनः । नहिशूद्रस्ययज्ञेषुकश्चिदस्तिपरिग्रहः १३ ॥

प० । आहरेत् त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः न हि शूद्रस्य यज्ञेषु कश्चित् अस्ति परिग्रहः ॥

यो० । शूद्रस्य वेश्मनः सकाशात् त्रीणि अंगानि वा द्वे अंगे कामं आहरेत् (बलात् गृह्णीयात्) हि (यतः) शूद्रस्य कश्चित् अर्थे परिग्रहः न अस्ति ॥

भा० । ता० । जो यज्ञके तीनवादो अंगोंकी विकलता होय और वैश्यके यहांसे धन न मिलसकै तो शूद्रके घरमें से तीनवादो अंगोंको राजाबलात् कारसे ग्रहणकरिले क्योंकि शूद्रका यज्ञोंके विषे कोई संबन्ध नहीं होता—और इस वचनसे जो यज्ञके लिये शूद्रसे धनका निषेध है वह प्रतिग्रहका निषेध है और बलसे धनलेनेका नहीं है १३ ॥

योऽनाहिताग्निःशतगुरयज्वाचसहस्रगुः । तयोरपिकुटुम्बाभ्यामाहरेदविचारयन् १४ ॥

प० यः अनाहिताग्निः शतगुः अयज्वा च सहस्रगुः तयोः अपि कुटुंबाभ्यां आहरेत् अविचारयन् ॥

---

१ नयज्ञार्थंधनंशूद्राद्विप्रोभिक्षेत ॥

यो० । यः शतगुः अनाहिताग्निः-चपुनः यः सहस्रगुः अयज्वा तयोः अपिकुटुम्बाभ्यां त्रीणिद्वेअङ्गानिवाद्वे अंगे अविचारयन् सन् आहरेत् ॥

भा० । ता० । सौहैं गौ जिसके ऐसा मनुष्य यदि अनाहिताग्निहो अर्थात् अग्निहोत्र न करताहो और सहस्र गौ होनेपर जो यज्ञनकरताहो इनदोनों के कुटुम्बोंमेंसे भी तीन वा दोअंगोंको विनाविचारे बलसे ग्रहणकरिले अर्थात् ब्राह्मण और क्षत्रीके कुटुम्बमेंसे धनको ग्रहणकारिले और क्षत्री को ब्राह्मण के घरसे धनके ग्रहणकरने का निषेध आगे मनुजी कहेंगे १४ ॥

आदाननित्याच्चादातुराहरेदप्रयच्छतः । तथायशोऽस्यप्रथतेधर्मश्चैवप्रवर्धते १५ ॥

प० । आदाननित्यात् च आदातुः आहरेत् अप्रयच्छतः तथा यशः अस्य प्रथते धर्मः च एवं प्रवर्धते ॥

यो० । आदातुः अप्रयच्छतः आदाननित्यात् (ब्राह्मणादेः) त्रीणि वा द्वेअंगे आहरेत् तथा कृतेसति अस्य (अपहर्तुः) यशः प्रथते चपुनः धर्मः प्रवर्धते ॥

भा० । ता० । प्रतिग्रहआदि से जिसके धनको ग्रहणकरसक्ते हैं यदि वह यज्ञ और पूर्तमें दान न देताहो और यज्ञके लिये याचनाकरनेपर धनको न दे उसके यहांसेभी बलात्कार वा चोरीसे दो वा तीनयज्ञ के अंगोंको ग्रहणकरै ऐसा करनेपर उसहरणकरनेवाले की कीर्त्तिकाप्रकाश और धर्मकीवृद्धि होतीहै १५ ॥

तथैवसप्तमेभक्तेभक्तानिषडनश्नता । अश्वस्तनविधानेनहर्तव्यंहीनकर्मणः १६ ॥

प० । तथा एवं सप्तमे भक्ते भक्तानि षट् अनश्नता अश्वस्तनविधानेन हर्त्तव्यं हीनकर्मणः ॥

यो० । तथा एव षट् भक्तानि अनश्नता पुरुषेण सप्तमे भक्ते हीनकर्मणः सकाशात् अश्वस्तनविधानेन एकदिन पर्याप्तं धनं हर्त्तव्यं ॥

भा० । ता० । जिसमनुष्यको छःसमयतक भोजन न मिलाहो अर्थात् तीनउपवास होचुकेहों वह मनुष्य सातवें भोजन के समय अर्थात् चौथेदिन प्रातःकाल के समय हीनकर्मा मनुष्य से भी अश्वस्तन विधिसे अर्थात् जितने धनमें एकदिन का निर्वाहहोसकै उतनाधन चोरीआदिसेभी ग्रहण करले १६ ॥

खलात्क्षेत्रादगाराद्वायतोवाप्युपलभ्यते । आख्यातव्यंतुतत्तस्मैपृच्छतेयदिपृच्छति १७

प० । खलात् क्षेत्रात् अगारात् वा यतः वा अपि उपलभ्यते आख्यातव्यं तु तत् तस्मै पृच्छते यदि पृच्छति ॥

यो० । खलात् क्षेत्रात् वा अगारात् वा यतः उपलभ्यते तत् धनं तस्मै (हीनकर्मणे) आख्यातव्यं यदि सः हीनकर्मा पृच्छति ॥

भा० । ता० । खलियानमें से -क्षेत्रसे-वा घर-वा अन्य किसीस्थानमेंसे हीनकर्माके जिसधन को चोरीआदि से ग्रहणकरै और यदि धनका स्वामी उसधनको पूछे तो उसको कहदे अर्थात् यदि किसलिये किसप्रकार मेरे धनको ग्रहणकिया ऐसे पूछे तो भोजन के लिये चोरीसे ग्रहणकिया यह कहदे १७ ॥

ब्राह्मणस्वंनहर्तव्यंक्षत्रियेणकदाचन । दस्युनिष्क्रिययोस्तुस्वमजीवन्हर्तुमर्हति १८॥

प० । ब्राह्मणस्वं न हर्त्तव्यं क्षत्रियेण कदाचन दस्युनिष्क्रिययोः तु स्वं अजीवन् हर्तुं अर्हति ॥

यो० । क्षत्रियेण ब्राह्मणस्वं नहर्त्तव्यं दस्युनिष्क्रिययोः (ब्राह्मणक्षत्रिययोः) स्वं तु अजीवन् क्षत्रियः हर्तुं अर्हति ॥

भा० । ता० । ब्राह्मणके धनको क्षत्री कदाचित्भी ग्रहण न करै अर्थात् पूर्वोक्त विपत्तियोंके होने पर भी ब्राह्मण के धनको चोरिआदि से न ले और इसीप्रकार वैश्य शूद्र भी ब्राह्मण क्षत्री से न लें और यदि चौर और शास्त्रोक्तकर्मके त्यागी ब्राह्मण क्षत्रियहोयँ तो आपत्तियों के समय उनके धनको ग्रहणकरिले १८ ॥

योऽसाधुभ्योऽर्थमादायसाधुभ्यःसंप्रयच्छति । सकृत्वाप्लवमात्मानंसंतारयतितावुभौ १९ ॥

प०। यः असाधुभ्यः अर्थं आदाय साधुभ्यः सम्प्रयच्छति सः कृत्वा प्लवं आत्मानं संतारयति तौ उभौ॥

यो० । यः पुरुषः असाधुभ्यः सकाशात् अर्थं आदाय साधुभ्यः सम्प्रयच्छति सः आत्मानं प्लवं कृत्वा तौ उभौ संतारयति ॥

भा० । ता० । जो मनुष्य हीनकर्म मनुष्योंसे धनको लेकरि अर्थात् पूर्वोक्तयज्ञ आदिकी सिद्धिके लिये यज्ञके उपयोगी धनको लेकरि साधुओं (ऋत्विगादि) को देताहै वहमनुष्य अपनी आत्माको नावबनाकर उनदोनों को संसारके दुःखसे पारकरताहै अर्थात् जिसके धनको हरताहै उसकेपापको और जिसको देताहै उसकी दुर्गति (दरिद्रता) को नष्टकरताहै १९ ॥

यद्धनंयज्ञशीलानांदेवस्वंतद्विदुर्बुधाः । अयज्वनांतुयद्वित्तमासुरस्वंतदुच्यते २० ॥

प० । यत् धनं यज्ञशीलानां देवस्वं तत् विदुः बुधाः अयज्वनां तु यत् वित्तं आसुरस्वं तत् उच्यते॥

यो० । यज्ञशीलानां यद्धनं भवति तत् बुधाः देवस्वं विदुः तुपुनः अयज्वनां यत्वित्तं तत् बुधैः आसुरस्वं उच्यते ॥

भा० । ता० । यज्ञकरनेवालों का जो धन है वहधन पंडितों ने देवताओंका कहाहै और यज्ञके न करनेवाले का जो धन है उसको पंडितोंने राक्षसों का धनकहाहै—इससे राक्षस धनकोभी देवताओं का धन बनाकर यज्ञकरना अत्यन्त श्रेष्ठ है २० ॥

नतस्मिन्धारयेद्दण्डंधार्मिकःपृथिवीपतिः । क्षत्रियस्यहिबालिश्याद्ब्राह्मणःसीदतिक्षुधा २१

प० । न तस्मिन् धारयेत् दंडं धार्मिकः पृथिवीपतिः क्षत्रियस्य हि बालिश्यात् ब्राह्मणः सीदति क्षुधा ॥

यो० । धार्मिकः पृथिवीपतिः तस्मिन् दंडं न धारयेत् हि (यतः) क्षत्रियस्य बालिश्यात् ब्राह्मणः क्षुधासीदति ॥

भा० । ता० । धार्मिक राजा चोरिआदि से यज्ञकरनेवाले मनुष्यको दंडनदे क्योंकि क्षत्रीकीही मूर्खतासे ब्राह्मण क्षुधासे पीडित होताहै इससे क्षत्री ब्राह्मणकी इसप्रकार रक्षाकरै कि २१ ॥

तस्यभृत्यजनंज्ञात्वास्वकुटुम्बान्महीपतिः । श्रुतशीलेचविज्ञायवृत्तिंधर्म्यांप्रकल्पयेत् २२ ॥

प० । तस्य भृत्यजनं ज्ञात्वा स्वकुटुम्बात् महीपतिः श्रुतशीले च विज्ञाय वृत्तिं धर्म्यां प्रकल्पयेत्॥

यो० । महीपतिः तस्य भृत्यजनं ज्ञात्वा चपुनः श्रुतशीले विज्ञाय स्वकुटुम्बात् धर्म्यां वृत्तिं प्रकल्पयेत् ॥

भा० । ता० । राजा उसब्राह्मणके अवश्य पालनेयोग्य पुत्रआदि जनोंको और ब्राह्मणकी विद्या और स्वभावको जानकर अपने कुटुम्बमेंसे धर्मके अनुसार उसब्राह्मणकी जीविकाको नियतकरै २२॥

कल्पयित्वाऽस्यवृत्तिंचरक्षेदेनंसमन्ततः।राजाहिधर्मषड्भागंतस्मात्प्राप्नोतिरक्षितात् २३ ॥

प०। कल्पयित्वा अस्य वृत्तिं च रक्षेत् एनं समंततः राजा हि धर्मषड्भागं तस्मात् प्राप्नोति रक्षितात्

यो० । राजा अस्य ब्राह्मणस्य वृत्तिं कल्पयित्वा एनं समंततः रक्षेत् हि (यतः) रक्षितात् तस्मात् धर्मषड्भागं प्राप्नोति ॥

भा० । ता० । राजा ब्राह्मणकी जीविकाको नियतकरके इस ब्राह्मणकी चारोंतरफसे रक्षाकरै क्योंकि ब्राह्मणकी रक्षाकरनेसे धर्म के छठेभागको राजा प्राप्त होताहै अर्थात् ब्राह्मणके कियेहुये धर्म का छठाभाग राजाको मिलता है २३ ॥

नयज्ञार्थंधनंशूद्राद्विप्रोभिक्षेतकर्हिचित् ।यजमानोहिभिक्षित्वाचाण्डालःप्रेत्यजायते २४ ॥

प० । नं यज्ञार्थं धनं शूद्रात् विप्रः भिक्षेतं कर्हिचित् यजमानः हि भिक्षित्वा चाण्डालः प्रेत्य जायते ॥

यो० । विप्रः शूद्रात् यज्ञार्थं धनं कर्हिचित् न भिक्षेत हि (यतः) भिक्षित्वा यजमानः प्रेत्य चाण्डालः जायते ॥

भा० । ता० । ब्राह्मण यज्ञकी सिद्धिके लिये शूद्रसे कदाचित् भी याचना न करै क्योंकि शूद्रसे धनकी याचनाकरके यज्ञकरताहुआ ब्राह्मण मरनेके अनंतर कुत्तेकी योनिको प्राप्तहोताहै—यदि विना याचनाके शूद्रसे धन मिलजाय तो उस धनसे यज्ञकरताहुआ ब्राह्मण दूषित नहीं होता २४ ॥

यज्ञार्थमर्थंभिक्षित्वायोनसर्वंप्रयच्छति ।सयातिभासतांविप्रःकाकतांवाशतंसमाः २५॥

प० । यज्ञार्थं अर्थं भिक्षित्वा यः न सर्वं प्रयच्छति सः याति भासतां विप्रः काकतां वा शतं समाः॥

यो० । यः विप्रः यज्ञार्थं अर्थं भिक्षित्वा सर्वं न प्रयच्छति सः (विप्रः) भासतां वा काकतां शतं समाः याति ॥

भा० । ता० । जो ब्राह्मण यज्ञके लिये धनकी याचना करके संपूर्ण धनको नहीं देता अर्थात् याचनासे संचय कियेहुये संपूर्ण धनको यज्ञमें नहीं लगाता वह ब्राह्मण सौवर्ष तक भास वा काक की योनिको प्राप्त होताहै २५ ॥

देवस्वंब्राह्मणस्वंवालोभेनोपहिनस्तियः। सपापात्मापरेलोकेगृध्रोच्छिष्टेनजीवति२६॥

प० । देवस्वं ब्राह्मणस्वं वा लोभेन उपहिनस्ति यः सः पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति॥

यो० । यः (पुरुषः) देवस्वं ब्राह्मणस्वं लोभेन वा उपहिनस्ति सः पापात्मा परलोके गृध्रोच्छिष्टेन जीवति ॥

भा० । ता० । जो मनुष्य देवता के वा ब्राह्मणके धनको लोभसे हरताहै वह पापात्मा परलोक में गीधोंके उच्छिष्टसे जीता है विष्णु आदि की मूर्त्तिके लिये अर्पणकिया जो द्रव्य उसको देव द्रव्य कहते हैं २६ ॥

इष्टिंवैश्वानरींनित्यंनिर्वपेदब्दपर्यये। क्लृप्तानांपशुसोमानांनिष्कृत्यर्थमसम्भवे २७ ॥

प० । इष्टिं वैश्वानरीं नित्यं निर्वपेत् अब्दपर्यये क्लृप्तानां पशुसोमानां निष्कृत्यर्थं असंभवे ॥

यो० । क्लृप्तानां पशुसोमानां असंभवे निष्कृत्यर्थं अब्दपर्यये वैश्वानरीं इष्टिं नित्यं निर्वपेत् ॥

भा० । ता० । वर्षके पर्ययमें अर्थात् प्रथम वर्षकी समाप्ति और द्वितीय वर्ष के प्रारंभ में सदैव वैश्वानर यज्ञको करै यदि शास्त्र विहित पशु और सोमयज्ञ न होसके तो उनके दोषकी निवृत्तिके लिये वैश्वानर यज्ञको शूद्र आदि से धनलेकर भी करदे २७ ॥

आपत्कल्पेनयोधर्मंकुरुतेऽनापदिद्विजः।सनाप्नोतिफलंतस्यपरत्रेतिविचारितम् २८ ॥

प० । आपत्कल्पेन यः धर्मं कुरुते अनापदि द्विजः सः न आप्नोति फलं तस्य परत्र इति विचारितम् ॥

यो० । यः द्विजः अनापदि आपत्कल्पेन धर्मं कुरुते सः तस्य धर्मस्य फलं परत्र न आप्नोति इति विचारितम् ॥

भा० । ता० । जो द्विज विना आपत्ति के समयमें भी आपत्कालकी विधिसे धर्मको करताहै वह द्विज परलोक में उस धर्म के फलको प्राप्त नहीं होता यह मनु आदिकोंने विचार किया है २८ ॥

विश्वैश्चदेवैःसाध्यैश्चब्राह्मणैश्चमहर्षिभिः।आपत्सुमरणाद्भीतैर्विधेःप्रतिनिधिःकृतः २९

प० । विश्वैः चँ देवैः साध्यैः चँ ब्राह्मणैः चँ महर्षिभिः आपत्सुँ मरणात् भीतैः विधेः प्रतिनिधिः कृतः ॥

यो० । मरणात् भीतैः विश्वैः देवैः चपुनः साध्यैः चपुनः महर्षिभिः ब्राह्मणैः आपत्सु विधेः प्रतिनिधिः कृतः ॥

भा० । ता० । मरनेसे भयभीत विश्वेदेवा और साध्य और महर्षि ब्राह्मणोंने विधिका प्रतिनिधि अर्थात् सोमयागके असंभव में वैश्वानरयज्ञ आपत्कालके समयमें ही किया है इससे जबतक मुख्य कर्म होसके तबतक प्रतिनिधि कर्म को द्विज कदाचित् भी न करै २९ ॥

प्रभुःप्रथमकल्पस्ययोऽनुकल्पेनवर्तते । नसाम्परायिकंतस्यदुर्मतेर्विद्यतेफलम् ३० ॥

प० । प्रभुः प्रथमकल्पस्य यः अनुकल्पेन वर्तते नँ सांपरायिकं तस्य दुर्मतेः विद्यते फलम् ॥

यो० । यः प्रथमकल्पस्य प्रभुः सन् अनुकल्पेनवर्तते तस्यदुर्मतेः सांपरायिकं फलं न विद्यते ॥

भा० । ता० । मुख्य कर्म के करने में समर्थ होकर भी जो मनुष्य आपत्काल में करने योग्य विधिसे कर्म को करताहै उस दुर्मतिको परलोकमें जाकर प्रतापका उदयरूप और पापका नाशरूप फल नहीं होता यद्यपि (आपत्कल्पेन) इस श्लोकसेही यहबात कहआये थे तथापि शास्त्रके आदरके लिये पुनः कही है ३० ॥

नब्राह्मणोऽवेदयतकिञ्चिद्राजनिधर्मवित्।स्ववीर्येणैवतान्शिष्यान्मानवानपकारिणः ३१

प० । नँ ब्राह्मणः ऽवेदयतँ किंचित् राजँनि धर्मवित् स्ववीर्येणँ एवँ तान् शिष्यात् मानवान् अपकारिणः ॥

यो० । धर्मवित् ब्राह्मणः राजनि किंचित् नऽवेदयत किंतु तान् अपकारिणः मानवान् स्ववीर्येण एव शिष्यात् ॥

भा० । ता० । धर्म के जाननेवाला ब्राह्मण किंचित् भी किसीके अपराध का निवेदन न करै किंतु अपने पराक्रमसेही उन अपराधी मनुष्योंको दंडदे अर्थात् यदि कोई मनुष्य अपने धर्म के विरोधसे निकृष्ट अपराधकरै तो उसके अभिचार (हिंसाआदि) करनेमें दोष नहीं ऐसे अभिचार करनेवालोंको ब्राह्मण स्वयं दंडदे और अधिक अपराधियोंको तो अवश्य राजाको कहै ३१ ॥

स्ववीर्याद्राजवीर्याच्चस्ववीर्यंबलवत्तरम्।तस्मात्स्वेनैववीर्येणनिगृह्णीयादरीन्द्विजः ३२

प० । स्ववीर्यात् राजवीर्यात् चँ स्ववीर्यं बलवत्तरं तस्मात् स्वेनँ एवँ वीर्येणँ निगृह्णीयात् अरीन् द्विजः ॥

यो० । स्ववीर्यात् चपुनः राजवीर्यात् स्ववीर्यं बलवत्तरं भवति तस्मात् द्विजः स्वेनैववीर्येण अरीन् निगृह्णीयात् ॥

भा० । ता० । अपनावीर्य (सामर्थ्य) और राजाका वीर्य इन दोनोंमें अपनावीर्य अत्यंत बलवान् होताहै—क्योंकि राजाका वीर्य पराधीन है और अपनावीर्य स्वाधीन होताहै तिससे अपनेही वीर्यसे ब्राह्मण शत्रुओं को दंडदे वह ब्राह्मणका वीर्य यह है कि ३२ ॥

श्रुतीरथर्वांगिरसीःकुर्यादित्यविचारयन्।वाक्शस्त्रंवैब्राह्मणस्यतेनहन्यादरीन्द्विजः ३३

प० । श्रुतीः अथर्वाङ्गिरसीः कुर्यात् इति अविचारयन् वाक्शस्त्रं वै ब्राह्मणस्य तेन हन्यात् अरीन् द्विजः ॥

यो० । द्विजः इति (हेतोः) अविचारयन् (सन्) अथर्वाङ्गिरसीः श्रुतीः कुर्यात् वै (निश्चयेन) ब्राह्मणस्य वाक्शस्त्रं भवति तेन (वाक्शस्त्रेण) द्विजः अरीन् हन्यात् ॥

भा० । ता० । इससे अथर्वण वेदकी अंगिरा ऋषिकी कहीहुई जो दुष्टोंके अभिचार (मारना)की श्रुतिहैं उनको करै अर्थात् शत्रुओंके मारने के लिये अभिचार कर्म को करै क्योंकि अभिचार मंत्रका उच्चारणरूप वाणीही ब्राह्मणका शस्त्र होताहै अर्थात् शस्त्र के कामको देसक्ताहै तिस शस्त्रसे ब्राह्मण शत्रुओं को नष्टकरै ३३ ॥

क्षत्रियोबाहुवीर्येणतरेदापदमात्मनः । धनेनवैश्यशूद्रौतुजपहोमैर्द्विजोत्तमः ३४ ॥

प० । क्षत्रियः बाहुवीर्येण तरेत् आपदं आत्मनः धनेन वैश्यशूद्रौ तु जपहोमैः द्विजोत्तमः ॥

यो० । क्षत्रियः आत्मनः आपदं बाहुवीर्येण तरेत् वैश्यशूद्रौ धनेन तरेताम् द्विजोत्तमः जपहोमैः आपदं तरेत् ॥

भा० । ता० । क्षत्री अपनी भुजाओंके बलसे शत्रुओंसे तिरस्काररूप आपत्तियोंको दूरकरै और वैश्य शूद्र धनसे और ब्राह्मण अभिचार के जप और होमसे अपनी आपत्तियोंको दूरकरै ३४ ॥

विधाताशासितावक्तामैत्रोब्राह्मणउच्यते । तस्मैनाकुशलंब्रूयान्नशुष्कांगिरमीरयेत् ३५

प० । विधाता शासिता वक्ता मैत्रः ब्राह्मणः उच्यते तस्मै न अकुशलं ब्रूयात् न शुष्कां गिरं ईरयेत् ॥

यो० । शास्त्रविहितकर्मणां विधाताशासिता वक्ता ब्राह्मणः मैत्रः उच्यते तस्मै (ब्राह्मणाय) अकुशलं न ब्रूयात्—शुष्कां गिरं न ईरयेत् ॥

भा० । ता० । शास्त्रविहित कर्मोंका स्वयंकरनेवाला और शास्त्रोक्तकर्मकी पुत्र और शिष्यआदिकों को शिक्षादेनेवाला और प्रायश्चित्तआदि कर्मों का उपदेशकरनेवाला ब्राह्मण सम्पूर्ण प्राणियों का मित्र कहाहै—उस ब्राह्मणको अकुशल (इसको बांधलो) वचन न कहै और शुष्क अर्थात् निंदा और वाग्दण्ड और धिग्दण्डरूप वाणीको न कहै ३५ ॥

नवैकन्यानयुवतिर्नाल्पविद्योनबालिशः । होतास्यादग्निहोत्रस्यनार्तोनासंस्कृतस्तथा ३६

प० । न वै कन्या न युवतिः न अल्पविद्यः न बालिशः होता स्यात् अग्निहोत्रस्य न आर्तः न असंस्कृतः तथा ॥

यो० । कन्या युवतिः—अल्पविद्यः—बालिशः आर्तः—तथा असंस्कृतः अग्निहोत्रस्य होता न स्यात् ॥

भा० । ता० । कन्या, और युवति, (जवानस्त्री) और अल्पविद्यावान् मूर्ख, रोगपीडित, और अनुपनीत (जिसका यज्ञोपवीत न हुआहो) ये सब सायंकाल और प्रातःकालकरनेके योग्य वेदोक्त होमों के होता (आहुतिके दाता) न बनें ३६ ॥

नरकेहिपतन्त्येतेजुह्वन्तःसचयस्यतत् । तस्माद्वैतानकुशलोहोतास्याद्वेदपारगः ३७ ॥

प० । नरके हि पतंति एते जुह्वंतः सः च यस्य तत् तस्मात् वैतान कुशलः होता स्यात् वेदपारगः ॥

यो० । जुह्वतः एते चपुनः यस्य अग्निहोत्रं सः हि (निश्चयेन) नरकेपतंति तस्मात् वैतान कुशलः वेदपारगः होता स्यात् ॥

भा० । ता० । होमको करतेहुये ये कन्याआदि और जिस यजमानके होमको करतेहों वह यजमान नरकमें निश्चयपड़तेहैं तिससे वेदोक्तकर्ममें कुशल और सम्पूर्णवेदका पढ़नेवाला होता होताहै ३७ ॥

प्राजापत्यमदत्त्वाश्वमग्न्याधेयस्यदक्षिणाम्।अनाहिताग्निर्भवतिब्राह्मणोविभवेसति ३८

प० । प्राजापत्यं अदत्त्वा अश्वं अग्न्याधेयस्य दक्षिणां अनाहिताग्निः भवति ब्राह्मणः विभवे सति ॥

यो० । ब्राह्मणः विभवेसति अग्न्याधेयस्यदक्षिणां प्राजापत्यं अश्वं अदत्त्वा अनाहिताग्निः भवति ॥

भा० । ता० । जोब्राह्मण धनकी सम्पत्तिहोनेपर अग्निकेआधानकी दक्षिणारूप प्रजापति देवता के लिये अश्व (घोड़े) को न देकर अग्न्याधान (अग्निहोत्र का ग्रहण) करताहै वह अनाहिताग्नि होताहै अर्थात् आधान के करनेपरभी आधानके फलकाभागी नहींहोता तिससे अग्न्याधानके समय अश्वकी दक्षिणा अवश्यदे ३८ ॥

पुण्यान्यन्यानिकुर्वीतश्रद्दधानोजितेन्द्रियः । नत्वल्पदक्षिणैर्यज्ञैर्यजेतेहकथंचन ३९

प० । पुण्यानि अन्यानि कुर्वीत श्रद्दधानः जितेंद्रियः न तु अल्पदक्षिणैः यज्ञैः यजेत इह कथंचन ॥

यो० । श्रद्दधानः जितेंद्रियः ब्राह्मणः अन्यानि पुण्यानि कुर्वीत अल्पदक्षिणैः यज्ञैः तु कथंचन इह न यजेत ॥

भा० । ता० । जीतीहैं इन्द्रिय जिसने ऐसा श्रद्धावान् ब्राह्मण यज्ञसे अन्य तीर्थयात्रादि कर्मोंको करे परन्तु शास्त्रोक्त दक्षिणासे न्यूनहै दक्षिणा जिनमें ऐसीयज्ञोंसे कदाचित्भी यजन न करै क्योंकि दक्षिणाही यज्ञका उपकारक होताहै और शक्तिसे अधिक दीहुई दक्षिणा उद्वेगका हेतु होतीहै ३९ ॥

इन्द्रियाणियशःस्वर्गमायुःकीर्तिंप्रजाःपशून्।हन्त्यल्पदक्षिणोयज्ञस्तस्मान्नल्पधनोयजेत्४०

प० । इन्द्रियाणि यशः स्वर्गं आयुः कीर्तिं प्रजाः पशून् हंति अल्पदक्षिणः यज्ञः तस्मात् न अल्पधनः यजेत् ॥

यो० । यस्मात् अल्पदक्षिणः यज्ञः इन्द्रियाणि यशः स्वर्गं आयुः—कीर्तिं—प्रजाः पशून् हंति तस्मात् अल्पधनः न यजेत् ॥

भा० । ता० । अल्पहै दक्षिणा जिसमें ऐसा यज्ञ नेत्रआदिइंद्रिय यश, स्वर्ग—अवस्था—और कीर्त्ति—प्रजा पशु इनको नष्टकरताहै तिससे अल्पधनी मनुष्य यज्ञ न करै—अर्थात् यज्ञमें अल्पदक्षिणा न दे जीतेहुये मनुष्यकी ख्यातिको यश, और मरने के अनन्तर ख्यातिको कीर्त्ति कहतेहैं ४० ॥

अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणःकामकारतः। चांद्रायणंचरेन्मासंवीरहत्यासमंहितत्४१

प० । अग्निहोत्री अपविद्ध्य अग्नीन् ब्राह्मणः कामकारतः चांद्रायणं चरेत् मासं वीरहत्यासमं हि तत् ॥

यो० । अग्निहोत्री ब्राह्मणः कामकारतः अग्नीन् अपविद्ध्य मासं चांद्रायणं चरेत् हि (यतः) तत् वीरहत्यासमं भवति ॥

भा० । ता० । अग्निहोत्रकरनेवाला ब्राह्मणअपनइच्छासे अग्नियोंका त्यागकरिके अर्थात् सायंकाल और प्रातःकाल के होमको न करके मासपर्यंत चांद्रायणव्रतकोकरै क्योंकि वह अग्निहोत्र का

त्याग इस श्रुतिके अनुसार पुत्रहत्या के समान होताहै कि जो ब्राह्मण अग्निको त्यागताहै वह देवताओं की दृष्टिमें पुत्रका हतनेवाला होताहै और कोई आचार्य यह कहते हैं कि एकमासपर्यंत यदि अग्निहोत्रको त्यागै तो चांद्रायणव्रतकरै ४१ ॥

येशूद्रादधिगम्यार्थमग्निहोत्रमुपासते। ऋत्विजस्तेहिशूद्राणांब्रह्मवादिषुगर्हिताः४२॥

प० । ये शूद्रात् अधिगम्य अर्थं अग्निहोत्रं उपासते ऋत्विजः ते हि शूद्राणां ब्रह्मवादिषु गर्हिताः

यो० । ये ब्राह्मणाः शूद्रात् अर्थं अधिगम्य अग्निहोत्रं उपासते शूद्राणां हि निश्चयेन ऋत्विजः ते ब्राह्मणाः ब्रह्मवादिषु गर्हिताः भवंति ॥

भा० । ता० । जो ब्राह्मण शूद्रसे धनको ग्रहणकरके अग्निहोत्रकी उपासना करते हैं अर्थात् यज्ञ वा दान से शूद्रकेधनको ग्रहणकरके अग्न्याधान करतेहैं निश्चयसे शूद्रोंकी यज्ञकरानेवाले वे ब्राह्मण ब्रह्मवादियों में निंदितहोतेहैं अर्थात् उस अग्निहोत्र के फलभागी नहींहोते ४२ ॥

तेषांसततमज्ञानांवृषलाग्न्युपसेविनाम्। पदामस्तकमाक्रम्यदाताद्दुर्गाणिसंतरेत् ४३

प० । तेषां सततं अज्ञानां वृषलाग्न्युपसेविनां पदा मस्तकं आक्रम्य दाता दुर्गाणि संतरेत् ॥

यो० । वृषलाग्न्युपसेविनां अज्ञानां तेषां मस्तकं पदा आक्रम्य दाता (शूद्रः) दुर्गाणि सततं संतरेत् ॥

भा० । ता० । शूद्रकी अग्निके सेवनकरनेवाले, और मूर्ख उनब्राह्मणों के मस्तकपर चरणकोरखकर दानका देनेवाला शूद्र परलोकमें निरन्तर दुःखोंसे पार होता है अर्थात् उस यज्ञकाफल धनदेनेवाले शूद्रको होताहै ब्राह्मणोंको नहीं ४३ ॥

अकुर्वन्विहितंकर्मनिन्दितंचसमाचरन्। प्रसक्तश्चेन्द्रियार्थेषुप्रायश्चित्तीयतेनरः ४४॥

प० । अकुर्वन् विहितं कर्म निंदितं च समाचरन् प्रसक्तः च इंद्रियार्थेषु प्रायश्चित्तीयते नरः ॥

यो० । विहितं कर्म अकुर्वन् चपुनः निंदितं समाचरन् चपुनः इंद्रियार्थेषु प्रसक्तः नरः प्रायश्चित्तीयते ॥

भा० । शास्त्रोक्त कर्म को नहीं करता और निंदित कर्म को करताहुआ विषयों में आसक्त पुरुष प्रायश्चित्त के योग्य होताहै ॥

ता० । शास्त्रसे विहित सन्ध्योपासन आदि नित्यकर्म और शवस्पर्श आदि में स्नानआदि नैमित्तिक कर्मों को न करताहुआ और हिंसाआदि निषिद्धकर्मोंको करताहुआ इंद्रियों के विषयोंमें अत्यंत आसक्त मनुष्य प्रायश्चित्तके योग्य होताहै—कदाचित् कोई यह शंकाकरै कि सम्पूर्ण इंद्रियोंके विषयों में इच्छासे आसक्तनहो इसवचनसे इंद्रियोंमें आसक्तिको निंदितकहाहै निंदितपदसेही वहभी आय जाता फिर पृथक् इंद्रियार्थ प्रसक्त को प्रायश्चित्त का भागी कैसेकहा इसका यह समाधानहै कि यह स्नातकके व्रतों में पढ़ाहै इससे स्नातकके व्रतोंकी यह विधिहै निषेध नहीं कदाचित् कोई यह कहै कि शास्त्रविहित कर्म को न करताहुआ इससेही इसका ग्रहणहोजाता फिर पृथक् क्यों कहा सोभी ठीक नहीं क्योंकि स्नातकसे भिन्नको भी इन्द्रियों के विषयमें प्रसक्ति प्रायश्चित्तके योग्य होती है इसलिये पृथक् लिखी है ४४ ॥

---

१ वीरहावाएषदेवानांभवति योऽग्निमुद्वासयते ॥
२ इंद्रियार्थेषुसर्वेषु नप्रसज्येतकामतः ॥

अकामतःकृतेपापेप्रायश्चित्तंविदुर्बुधाः। कामकारकृतेऽप्याहुरेकेश्रुतिनिदर्शनात् ४५ ॥

प० । अकामतः कृते पापे प्रायश्चित्तं विदुः बुधाः कामकारकृते अपि आहुः एके श्रुतिनिदर्शनात् ॥

यो० । अकामतः पापे कृतेसति बुधाः प्रायश्चित्तं विदुः एके (आचार्याः) कामकारकृते अपि पापे श्रुतिनिदर्शनात् प्रायश्चित्तं आहुः ॥

भा० । अज्ञानसे कियेहुये पापका प्रायश्चित्त पंडितोंने कहाहै कोई आचार्य श्रुतिमें देखिकर जानकरि कियेहुये पापका भी प्रायश्चित्त कहते हैं ॥

ता० । अज्ञानसे कियेहुये पापका प्रायश्चित्त पंडितों ने कहाहै और जानकर किये पापका प्रायश्चित्त नहीं है और कोई आचार्य श्रुतिकेनिदर्शन (देखना) से जानकर कियेहुये पापका भी प्रायश्चित्त कहते हैं क्योंकि इस श्रुतिमें जानकर कियेहुये पापका भी प्रायश्चित्त कहाहै कि इंद्रने संन्यासियोंको जानकर कुत्तोंको सौंपदिया उस इंद्रको कठोर वाणीने आनकर कहा कि प्रायश्चित्तकर वह इंद्र ब्रह्माके समीप गया ब्रह्माने उसकी उपहव्य (हवन विशेष) कर्म प्रायश्चित्तकरना बताया इससे स्पष्ट है कि जानकर कियेहुये पापका भी प्रायश्चित्त है ४५ ॥

अकामतःकृतंपापंवेदाभ्यासेनशुद्ध्यति।कामतस्तुकृतंमोहात्प्रायश्चित्तैःपृथग्विधैः ४६

प० । अकामतः कृतं पापं वेदाभ्यासेन शुद्ध्यति कामतः तु कृतं मोहात् प्रायश्चित्तैः पृथक् विधैः ॥

यो० । अकामतः कृतं पापं वेदाभ्यासेन शुद्ध्यति तुपुनः मोहात् कामतः कृतं पापं पृथक्विधैः प्रायश्चित्तैः शुद्ध्यति ॥

भा० । अज्ञानसे कियाहुआ पाप वेदके अभ्याससे और मोहसे जानकर कियाहुआ पाप नाना प्रकार के प्रायश्चित्तों से नष्ट होताहै ॥

ता० । अज्ञानसे कियाहुआ पाप वेदके अभ्याससे नष्टहोजाताहै यद्यपि अन्य प्रायश्चित्तों से भी अज्ञानसे कियेहुये पापका नाश कहाहै तथापि वेदका अभ्यास उन प्रायश्चित्तों से लघु है जो जानिकर कियेहुये पापोंके धर्मशास्त्र में कहे हैं इससे वेदका अभ्यास उनका भी उपलक्षण है जो अज्ञान से कियेहुये पापोंके प्रायश्चित्त कहे हैं और रागद्वेषसे मूढ मनुष्य ने जो जानकर पापकिया है वह नानाप्रकारके विद्या, धन, तप, आदि प्रायश्चित्तोंसे नष्टहोताहै अर्थात् पूर्वोक्त प्रायश्चित्तोंसे गुरुहोताहै यद्यपि अधिकारी का निरूपण और प्रायश्चित्त आगे कहेंगे तथापि अज्ञानसे पापका कर्ता लघु प्रायश्चित्त का अधिकारी होताहै—और जानकर पाप का कर्ता गुरु प्रायश्चित्त का अधिकारी होताहै इसलिये अधिकारी के निरूपण केही लिये यह वचन है ४६ ॥

प्रायश्चित्तीयतांप्राप्यदैवात्पूर्वकृतेनवा। नसंसर्गंव्रजेत्सद्भिःप्रायश्चित्तेऽकृतेद्विजः ४७ ॥

प० । प्रायश्चित्तीयतां प्राप्य दैवात् पूर्वकृतेन वा न संसर्गं व्रजेत् सद्भिः प्रायश्चित्ते अकृते द्विजः ॥

यो० । द्विजः दैवात् वा पूर्वकृतेन कर्मणा प्रायश्चित्तीयतां प्राप्य प्रायश्चित्ते अकृतेसति सद्भिः सह संसर्गं न व्रजेत् ॥

भा० । ता० । द्विज दैवसे अथवा पूर्व जन्म में कियाहुआ जो पाप (जो क्षय रोग आदि से प्रतीत होताहै) से प्रायश्चित्त की योग्यताको प्राप्त होकर विना प्रायश्चित्त किये सज्जनों का यज्ञादि में संग न करै ४७ ॥

---

१ इंद्रोयतीन्शालावृकेभ्यःप्रायच्छत्तमश्लीलावागत्यावदत्सप्रजापतिमुपाधावत्तस्माउपहव्यंप्रायच्छत् ॥

इहदुश्चरितैःकेचित्केचित्पूर्वकृतैस्तथा।प्राप्नुवन्तिदुरात्मानोनरारूपविपर्ययम् ४८ ॥

प० । इहँ दुश्चरितैः केचिँत् केचिँत् पूर्वकैतैः तथाँ प्राप्नुवंति दुरात्मानः नराः रूपविपर्ययम् ॥

यो० । केचित् दुरात्मानो नराः इह दुश्चरितैः तथापूर्वकृतैः दुश्चरितैः रूपविपर्ययं प्राप्नुवंति ॥

भा० । ता० । दुष्ट स्वभाववाले कोई मनुष्य इस जन्मके ही निषिद्ध आचरणसे और कोई मनुष्य पूर्वजन्मके निषिद्ध आचरणसे रूपके विपर्यय (कुनख आदि) को प्राप्त होते हैं अर्थात् किये हुये पापसे देहके अंग विपरीत होजाते हैं उनकाही वर्णन करते हैं कि ४८ ॥

सुवर्णचौरःकौनख्यंसुरापःश्यावदन्तताम्।ब्रह्महाक्षयरोगित्वंदौश्चर्म्यंगुरुतल्पगः ४९
पिशुनःपौतिनासिक्यंसूचकःपूतिवक्रताम्।धान्यचौरोऽङ्गहीनत्वमातिरैक्यंतुमिश्रकः ५०
अन्नहर्त्तामयावित्वंमौक्यंवागपहारकः ।वस्त्रापहारकःश्वैत्र्यंपंगुतामश्वहारकः ५१ ॥
एवंकर्मविशेषेणजायन्तेसद्विगर्हिताः।जडमूकान्धबधिराविकृताकृतयस्तथा ५२ ॥

प० । सुवर्णचौरः कौनख्यं सुरापः श्यावदन्ततां ब्रह्महा क्षयरोगित्वं दौश्चर्म्यं गुरुतल्पगः ॥

प० । पिशुनः पौतिनासिक्यं सूचकः पूतिवक्रतां धान्यचौरः अंगहीनत्वं आतिरैक्यं तु मिश्रकः ॥

प० । अन्नहर्त्ता आमयावित्वं मौक्यं वागपहारकः वस्त्रापहारकः श्वैत्र्यं पंगुतां अश्वहारकः ॥

प० । एवं कर्मविशेषेण जायंते सद्विगर्हिताः जडमूकांधबधिराः विकृताकृतयः तथा ॥

यो० । सुवर्णचौरः कौनख्यं सुरापः श्यावदन्ततां ब्रह्महा क्षयरोगित्वं गुरुतल्पगः दौश्चर्म्यं पिशुनः पौतिनासिक्यं सूचकः पूतिवक्रतां धान्यचौरः अंगहीनत्वं मिश्रकः आतिरैक्यं अन्नहर्त्ता आमयावित्वं वागपहारकः मौक्यं वस्त्रापहारकः श्वैत्र्यं अश्वहारकः पंगुतां प्राप्नोति एवं कर्मविशेषेण सद्विगर्हिताः जडमूकांधबधिराः तथा विकृताकृतयः जायन्ते ॥

भा० । ता० । ब्राह्मणके सुवर्णका चौर कुत्सित नखोंको, और मदिरा पीनेवाला कालेदांतोंको, ब्रह्महत्यारा क्षयरोगको, गुरुकी स्त्री का गामी दौश्चर्म्य (शिथिलइंद्रिय होना) को, और पिशुन (जो किसीके सच्चे दोषोंको वर्णनकरे) नासिकामें दुर्गंधिको, और सूचक (जो झूठे दोषोंको कहे) मुखमें दुर्गंधिको, धान्यका चौर हीन अंगको, और धान्यमें निन्दित वस्तु मिलानेवाला अधिक अंग को, अन्नका चौर मन्दाग्नि को गुरुकी आज्ञाके विना जो पढ़े वह मूकता (गूंगा) को, वस्त्रोंका चौर श्वेत कुष्ठको, अश्वका चौर पंगु (लंगड़ा) ताको, प्राप्तहोताहै इसी प्रकार कर्मकी विशेषतासे अर्थात् पूर्वजन्ममें कियेहुये पापके शेषसे सज्जनों में निन्दित जड़–मूक–अन्ध–बधिर और विकल हैं आकार जिनका ऐसे होते हैं अर्थात् इस वचनके अनुसार दीपकका चौर अंधा दीपक बुझानेवाला काणा हिंसा करनेवाला सदारोगी और परस्त्रीका गामी वातांग (वातरोगी) होता है इससे अज्ञान वा ज्ञानसे कियेहुये पापोंका प्रायश्चित्त अवश्य करना चाहिये कि ४९।५०।५१।५२ ॥

चरितव्यमतोनित्यंप्रायश्चित्तंविशुद्धये।निन्द्यैर्हिलक्षणैर्युक्ताजायन्तेऽनिष्कृतैनसः ५३

प०।चरितव्यं अतः नित्यं प्रायश्चित्तं विशुद्धये। निन्द्यैः हि लक्षणैः युक्ताः जायन्ते अनिष्कृतैनसः

यो० । अतः विशुद्धये नित्यं प्रायश्चित्तं चरितव्यं हि (यतः) अनिष्कृतैनसः पुरुषाः निंद्यैः लक्षणैः जायंते ॥

---

(१) दीपहर्त्ताभवेदंधः काणोनिर्वापकस्तथा । हिंसारुचिःसदारोगीवातांगःपारदारकः ॥

भा० । इससे पाप नाशके लिये सदैव प्रायश्चित्त करै क्योंकि जिन्होंने प्रायश्चित्त नहीं किया वे देहमें पूर्वोक्त निंदित चिह्नोंसे युक्त होतेहैं ॥

ता० । जिससे नहीं कियाहै प्रायश्चित्त जिन्होंने ऐसे मनुष्य परलोकमें भोगेहुये पापके शेषसे पूर्वोक्त निंदित लक्षणोंसे युक्त होतेहैं तिससे विशुद्धि (पापनाश) के लिये सदैव प्रायश्चित्तको करै यहां प्रायश्चित्त निमित्तमात्रसे नहीं है किन्तु शुद्धिके लिये प्रायश्चित्तकरनाहै– जिन्होंने प्रायश्चित्त नहीं किया वे निंदित चिह्नोंसे युक्त होतेहैं इत्यादि वर्णनसे पापके क्षयका जो अभिलाषी है उसका ही प्रायश्चित्तमें अधिकारहै– यही दिखातेहैं कि प्रायश्चित्तं चरितव्यं अर्थात् प्रायश्चित्तकरैं इस विधिमें जब अधिकारीकी अपेक्षाभई तब अति रात्रि सत्रन्यायसे इसी श्लोकमें विशुद्धये अर्थात् शुद्धि के लिये यह फल अधिकारी का विशेषण मानना युक्तहै अर्थात् शुद्धिका अभिलाषी सदैव प्रायश्चित्त करै इसी विषयको याज्ञवल्क्यऋषि ने इन[1] वचनों से स्फुट कियाहै किविहित कर्मके न करनेसे और निंदित कर्मके करनेसे और इंद्रियोंको वशमें न रखनेसे मनुष्य पापको प्राप्त होता है तिससे पाप नाशके लिये प्रायश्चित्त को करै और मनुजी भी इस[2] वचनसे आगे यह वर्णन करेंगे कि महापातकी मनुष्य बहुत वर्षोंतक इन घोर नरकोंको प्राप्तहोकर पापके क्षयहोनेके अनंतर संसारमें जन्म लेतेहैं तिससे प्रायश्चित्त केवल निमित्तमात्रसे नहीं किंतु ब्रह्मवध आदि से पैदाहुये पाप के नाशके लिये है और पूर्वोक्त पापियोंकाही प्रायश्चित्त करने में अधिकार है ५३ ॥

ब्रह्महत्यासुरापानंस्तेयंगुर्वंगनागमः । महान्तिपातकान्याहुःसंसर्गश्चापितैःसह ५४ ॥

प० । ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः महांति पातकानि आहुः संसर्गः च अपि तैः सह ॥

यो० । ब्रह्महत्या, सुरापानं, स्तेयं, गुर्वङ्गनागमः, एतानि चपुनः तैः सहसंसर्गः महांति पातकानि बुधाः आहुः ॥

भा० । ब्रह्महत्या–सुराकापान–सुवर्ण की चोरी–गुरुकी स्त्री का गमन इन कर्मोंके करनेवालों के संगमें पांच पंडित जनोंने महापातक कहेहैं ॥

ता० । ब्राह्मणके प्राण वियोगके व्यापारको ब्रह्महत्या कहते हैं–कुछ साक्षात् ब्राह्मणके मारने को ब्रह्महत्यानहीं कहते तिसीप्रकार गौ हिरण्य आदि के ग्रहणके लिये ब्राह्मणका मरण होनेपर भी ब्रह्महत्या कहातीहै कदाचित् इसमें कोई यह शंकाकरै कि जिस वाणसे ब्राह्मण माराहो उस वाणके बनानेवालेको और मारनेवाले के गाली आदि से क्रोधको पैदाकरनेसे मरनेवाले ब्राह्मणको भी ब्रह्महत्या होनी चाहिये क्योंकि उनमें भी वाण और क्रोधकी उत्पत्ति रूप जो व्यापारहै वह ब्राह्मण के प्राण वियोगका जनक है–यह शंका ठीक नहीं है क्योंकि जो शास्त्रके द्वारा ब्राह्मणका हंता प्रतीतहोताहै उसीको ब्रह्महत्या लगती है–अतएव शातातप ऋषिने यह[3] कहा है कि गौ, भूमि, सुवर्ण इनके ग्रहणार्थ और स्त्री संबंधके लिये जिसके उद्देशसे प्राणोंको त्यागे उसीको ब्रह्मघातक कहते हैं और इसीप्रकार अन्य भी ब्राह्मण वधके कारण शास्त्रोक्त जानने वे येहैं कि इस[4] वचनसे ब्राह्मणके

१ विहितस्याननुष्ठानान्निंदितस्यचसेवनात् । अनिग्रहाच्चेंद्रियाणांनरःपतनमृच्छति ॥ तस्मात्तेनेहकर्त्तव्यंप्रायश्चित्तं विशुद्धये ॥

२ बहून्वर्षगणान्घोराननरकान्प्राप्यतत्क्षयात् । संसारान्प्रतिपद्यंतेमहापातकिनस्त्विमान् ॥

३ गोभूहिरण्यग्रहणेस्त्रीसंबंधकृतेपिवा । यमुद्दिश्यत्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम् ॥

४ रागाद्द्वेषात्प्रमादाद्वास्वतःपरतएववा । ब्राह्मणंघातयेद्यस्तुतमाहुर्ब्रह्मघातकम् ॥

मारनेमें जो प्रयोजक है अर्थात् सम्मतिका दाताहै वह भी ब्रह्मघातक है–कि जो मनुष्य राग, द्वेष, प्रमाद, से स्वयं वा किसी द्वारा ब्राह्मणको मरवादे उसको ब्रह्मघातक कहते हैं–और मदिराकापान, और ब्राह्मणके सुवर्ण का हरण, और गुरुकी भार्य्याका गमन इन चारोंके कर्म के करनेवालों का संग, ये पांच महापातक पंडितजनोंने कहे हैं–और इनका महापातक नाम इसलिये है कि आगे कियेहुये उपपातक इनसे लघु पाप हैं ५४ ॥

अनृतंचसमुत्कर्षेराजगामिचपैशुनम् । गुरोश्चालीकनिर्बंधःसमानिब्रह्महत्यया ५५ ॥

प० । अनृतं चँ समुत्कँर्षे राजगाँमि चँ पैशुँनं गुरोः चँ अलीकनिर्बँधः समाँनि ब्रह्महत्ययाँ ॥

यो० । समुत्कर्षेच अनृतं चपुनः राजगामि पैशुनं चपुनः गुरोः अलीकनिर्बंधः इमानि ब्रह्महत्यया समानि भवंति ॥

भा० । ता० । जातिकी बड़ाई के लिये झूठबोलना जैसे अब्राह्मण अपने को ब्राह्मण कहै और ऐसा चुगुलपन जो राजाके पास पहुंचे और जिससे चौर आदिकोंका मरणहो और गुरुके आगे मिथ्याबोलकर हठकरना ये तीनों ब्रह्महत्या के समान कहेहैं क्योंकि गौतम ऋषिने इस वचनसे गुरु के मिथ्याभिशंसनको ब्रह्महत्या के समान कहा है ५५ ॥

ब्रह्मोज्झतावेदनिन्दाकौटसाक्ष्यंसुहृद्वधः।गर्हितानाद्ययोर्जग्धिःसुरापानसमानिषट् ५६॥

प० । ब्रह्मोज्झता वेदनिंदा कौटसाक्ष्यं सुहृद्वधः गर्हितानाद्ययोः जग्धिः सुरापानसमानि षट् ॥

यो० । ब्रह्मोज्झता, वेदनिंदा, कौटसाक्ष्य–सुहृद्वधः गर्हितानाद्ययोः जग्धिः इमानि षट् सुरापान समानि (भवंति) ॥

भा० । ता० । पढ़ेहुये वेदकाअनभ्याससे विस्मरण और निंदित शास्त्रके माननेसे वेदकी निंदा और झूठी साक्षी और मित्रकावध और निंदित (लशुन आदि) और अनाद्य (पुरीष आदि) अर्थात् टोकनी के अन्नकी जलन ये छः मदिरापानके तुल्य होतेहैं–मेधातिथि तो अनाद्यपदसे उसको लेते हैं कि त्यागीहुई वस्तुका पुनः भक्षण करना ५६ ॥

निक्षेपस्यापहरणंनराश्वरजतस्यच । भूमिवज्रमणीनांचरुक्मस्तेयसमंस्मृतम् ५७ ॥

प० । निक्षेपस्य अपहरणं नराश्वरजतस्य चँ भूमिवज्रमणीनां चँ रुक्मस्तेयसमं स्मृतम् ॥

यो० । निक्षेपस्य नराश्वरजतस्य चपुनः भूमिवज्रमणीनां अपहरणं रुक्मस्तेयसमं बुधैः स्मृतम् ॥

भा० । ता० । निक्षेप (धरोहर) और मनुष्य घोड़ा चांदी भूमि वज्र (हीरा) मणि इनकी चोरी सुवर्ण की चोरी के समान पंडितजनोंने कही है ५७ ॥

रेतःसेकःस्वयोनीषुकुमारीष्वन्त्यजासुच । सख्युःपुत्रस्यचस्त्रीषुगुरुतल्पसमंविदुः ५८॥

प० । रेतःसेकः स्वयोनीषुँ कुमारीषुँ अंत्यजासुँ चँ सख्युः पुत्रस्यँ चँ स्त्रीषुँ गुरुतल्पसमं विदुः ॥

यो० । स्वयोनीषु कुमारीषु अंत्यजासु सख्युः चपुनः पुत्रस्य स्त्रीषु रेतःसेकः बुधाः गुरुतल्पसमं विदुः ॥

भा० । सहोदर भगिनी, चाण्डाली, मित्र और पुत्रकी वधू इनमें वीर्य के त्यागको गुरुकी स्त्रीकी शय्यागमन के समान पंडित जनोंने कहा है ॥

---

१ गुरोरनृताभिशंसनंमहापातकम् ॥

ता० । सोदर भगिनी चांडाली और मित्र और पुत्रकी स्त्री इनके विषय वीर्य का सेचन अर्थात् इनके संग रमण गुरु स्त्री के गमन के समान हैं इन सबको महापातकोंके तुल्य जो कहना इसलिये है कि जिस महापातकका प्रायश्चित्त है उसके तुल्य पातकका भी वही प्रायश्चित्त है और झूठीसाक्षी और मित्रके वधका सुरापान के तुल्य वर्णन इसलिये है कि उसमें ब्रह्महत्या का प्रायश्चित्त कहेंगे उसके संग विकल्प मानाजाय—और गुरुके संग मिथ्यावादका जो ब्रह्महत्या के तुल्य वर्णन है वह ब्रह्महत्या का जो प्रायश्चित्त है उससे कुछ न्यून प्रायश्चित्त के लिये है क्योंकि जगत् में भी राजा के तुल्य मंत्री है इस वर्णनसे मंत्रीमें न्यूनता प्रतीत होतीहै इससे जो प्रधान पातकोंमें प्रायश्चित्त है उससे न्यून प्रायश्चित्त महापातकों के समानों में होताहै ५८ ॥

गोवधोऽयाज्यसंयाज्यपारदार्यात्मविक्रयाः । गुरुमातृपितृत्यागःस्वाध्यायाग्न्योःसुतस्यच ५९
परिवित्तितानुजेऽनूढेपरिवेदनमेवच । तयोर्दानंचकन्यायास्तयोरेवचयाजनम् ६० ॥
कन्यायादूषणंचैववार्द्धुष्यंव्रतलोपनम् । तडागारामदाराणामपत्यस्यचविक्रयः ६१ ॥
व्रात्यताबान्धवत्यागोभृत्याध्यापनमेवच। भृताच्चाध्ययनादानमपण्यानांचविक्रयः ६२॥
सर्वाकरेष्वधीकारोमहायन्त्रप्रवर्तनम्।हिंसौषधीनांस्त्र्याजीवोऽभिचारोमूलकर्मच ६३
इन्धनार्थमशुष्काणांद्रुमाणामवपातनम् । आत्मार्थंचक्रियारम्भोनिन्दितान्नादनंतथा ६४ ॥
अनाहिताग्नितास्तेयमृणानामनपक्रिया।असच्छास्त्राधिगमनंकौशीलव्यस्यचक्रिया ६५॥
धान्यकुप्यपशुस्तेयंमद्यपस्त्रीनिषेवणम्।स्त्रीशूद्रविट्क्षत्रवधोनास्तिक्यंचोपपातकम्६६

प० । गोवधः अयाज्यसंयाज्यपारदार्यात्मविक्रयाः गुरुमातृपितृत्यागः स्वाध्यायाग्न्योः सुतस्य च ॥
प० । परिवित्तिता अनुजे अनूढे परिवेदनं एवं च तयोः दानं च कन्यायाः तयोः एवं च याजनम् ॥
प० । कन्यायाः दूषणं च एवं वार्द्धुष्यं व्रतलोपनं तडागारामदाराणां अपत्यस्य च विक्रयः ॥
प० । व्रात्यता बांधवत्यागः भृत्याध्यापनं एवं च भृतात् च अध्ययनादानं अपण्यानां च विक्रयः ॥
प० । सर्वाकरेषु अधीकारः महायंत्रप्रवर्त्तनं हिंसा औषधीनां स्त्र्याजीवः अभिचारः मूलकर्म च ॥
प० । इंधनार्थं अशुष्काणां द्रुमाणां अवपातनं आत्मार्थं च क्रियारंभः निंदितान्नादनं तथा ॥
प० । अनाहिताग्निता स्तेयं ऋणानां अनपक्रिया असच्छास्त्राधिगमनं कौशीलव्यस्य च क्रिया ॥
प० । धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवणं स्त्रीशूद्रविट्क्षत्रवधः नास्तिक्यं च उपपातकम् ॥

यो० । गोवधः अयाज्यसंयाज्यपारदार्यात्म विक्रयाः गुरु मातृ पितृ त्यागः स्वाध्या याग्न्योः चपुनः सुतस्यत्यागः अनुजे अनूढे सति परिवित्तिता चपुनः परिवेदनं चपुनः तयोः कन्यायाः दानं चपुनः तयोः एव याजनं कन्यायाः दूषणं वार्द्धुष्यं व्रतलोपनं तडागारामदाराणां चपुनः अपत्यस्यविक्रयः व्रात्यता बांधव त्यागः चपुनः भृत्याध्यापनं चपुनः भृतात् अध्ययनादानं चपुनः अपत्यानां विक्रयः सर्वाकरेषु अधिकारः महायन्त्रप्रवर्त्तनं औषधीनां हिंसा स्त्र्याजीवः अभिचारः मूलकर्म अशुष्काणां द्रुमाणां इंधनार्थं अवपातनं चपुनः आत्मार्थं क्रियारम्भः तथा निंदितान्नादनं अनाहिताग्निता स्तेयं ऋणानां अनपाक्रिया असच्छास्त्राधिगमनं चपुनः कौशीलव्यस्यक्रिया धान्यकुप्यपशुस्तेयं मद्यपस्त्री निषेवणं स्त्री शूद्र विट्क्षत्रवधः चपुनः नास्तिक्यं एतत् गोवधादि नास्तिक्यपर्य्यंतं उपपातकं भवति ॥

भा० । ता० । गौकावध और जाति वा कर्मसे दुष्ट जो यज्ञकराने के अयोग्य उनको यज्ञ कराना, और परस्त्रीगमन और अपने आत्माका विक्रय माता पिता गुरु इनका और स्वाध्याय और अग्नि-

होत्र इनका त्याग यहांपर स्वाध्याय पढ़ने ब्रह्मयज्ञ लेते हैं क्योंकि वेदके विस्मरणकात्याग ब्रह्मोज्झ- ता इस श्लोकसे कह आये हैं और अग्निपदसे स्मार्त अग्निलेते हैं क्योंकि श्रौत अग्नि का त्याग अग्निहोत्र्यपविद्धयाग्नीन् इस श्लोकसे कहआये हैं और सुतके त्यागसे उसका संस्कार और भ- रण पोषण का निषेधलेना बड़े भाईसे पहिले विवाह करनेवाला छोटा भाई परिवेत्ता होताहै बड़ा परिवित्ति होताहै—और ये (दोनों परिवित्तिता और परिवेदन) और इन दोनोंको कन्या देना और यज्ञकराना और कन्याको दूषितकरना अर्थात् अंगुलि प्रक्षेपसे दूषण लगाना और वृद्धि (व्याज) पर रुपया लगाना और व्रतको नष्टकरना अर्थात् ब्रह्मचर्य्य अवस्थामें मैथुनकरना और तलाव, आ- राम, (बाग) स्त्री, पुत्र इनका विक्रयकरना और यज्ञोपवीतके समयपर यज्ञोपवीत न होना और बन्धुओं (पितृव्यआदि) का त्याग अर्थात् उनकी आज्ञाकेअनुसार न चलना—भृतिलेकरपढ़ाना भृतिदेकर पढ़ना और विक्रयके योग्य तिलादिकोंको बेचना और सम्पूर्णआकरों (खान) में अधि- कारी होना और बड़े २ प्रवाहों के बंधनकरनेवाले यंत्रों (पुलआदि) की प्रवृत्तिकरना और ओष- धियों की हिंसा अर्थात् सामान्य जाति ओषधियोंको जानकर नष्टकरदेना और उत्तमजाति ओष- धियों की हिंसाका जो प्रायश्चित्त कहेंगे वह प्रायश्चित्तकी लघुताकेलियेहै और स्त्रियोंके व्यभिचार से और सेनादि यज्ञसे अपराधी को मारना और मूलकर्म (वशीकरण) और इंधनकेलिये विनासू- खे वृक्षोंको काटना और अपने भोजन के निमित्त पाकबनाना और निंदित (लशुनादि) अन्नका भक्षण और अग्निहोत्रका अग्रहण और चोरी और ऋणोंको न देना और श्रुति औरस्मृतिसे विरुद्ध शास्त्रोंकी शिक्षालेना नृत्यगीतवादित्र (बाजा) इनकीसेवा और अन्न, तांबा, लोहा, आदि पशु इनकी चोरीकरना और मदिरापनेवाली स्त्रीकासंगकरना स्त्री, शूद्र वैश्य और क्षत्री इनकावध नास्तिकता ये सब आठश्लोकोंमें कहेहुये गोवधआदि उपपातकहैं—इनमें बांधवत्याग इसपदसेही माताआदिकों का त्याग आजाता पृथक् वचन निंदाके लियेहै अर्थात् माताआदिके त्यागमें पितृव्यआदिके त्यागसे दोष और प्रायश्चित्त अधिक होतेहैं ५९।६०।६१।६२।६३।६४।६५।६६ ॥

ब्राह्मणस्यरुजःकृत्याघ्रातिरघ्रेयमद्ययोः । जैह्म्यंचमैथुनंपुंसिजातिभ्रंशकरंस्मृतम् ६७ ॥

प० । ब्राह्मणस्य रुजः कृत्या घ्रातिः अघ्रेयमद्ययोः जैह्म्यं च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम् ॥

यो० । ब्राह्मणस्य रुजः कृत्या अघ्रेयमद्ययोः घ्रातिः जैह्म्यं चपुनः पुंसि मैथुनं एतत् सर्वं जातिभ्रंशकरं बुधैः स्मृतम् ॥

भा० । ता० । दण्ड हाथआदि से ब्राह्मणको पीडादेना और अत्यन्त दुर्गंधि लशुन वा पुरीषआदि का और मदिराका घ्राण (सूंघना) कुटिलता और पुरुष के संग मैथुन ये सम्पूर्ण ऋषियोंने जाति भ्रष्टकरनेवाले कहेहैं अर्थात् इनके करनेसे मनुष्यजातिसे पतित होजाताहै ६७ ॥

खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा । संकरीकरणंज्ञेयंमीनाहिमाहिषस्यच ६८ ॥

प० । खराश्वोष्ट्रमृगेभानां अजाविकवधः तथा संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च ॥

यो० । खराश्वोष्ट्रमृगेभानां वधः तथा अजाविकवधः चपुनः मीनाहिमहिषस्यवधः बुधैः संकरीकरणं ज्ञेयम् ॥

भा० । ता० । खर—घोड़ा—ऊंट—मृग इभ (हाथी) छाग मेष (मेढ़ा) मत्स्य सर्प महिष इनका वध संकरीकरण जानना अर्थात् इनके वधकरनेवाला वर्णसंकरहोजाताहै ६८ ॥

निन्दितेभ्योधनादानंवाणिज्यंशूद्रसेवनम् । अपात्रीकरणंज्ञेयमसत्यस्यचभाषणम् ६९

प० । निंदितेभ्यः धनादानं वाणिज्यं शूद्रसेवनं अपात्रीकरणं ज्ञेयं असत्यस्य च भाषणम् ॥

यो० । निंदितेभ्यः धनादानं—वाणिज्यं शूद्रसेवनं—चपुनः असत्यस्यभाषणं एतत् सर्वं बुधैः अपात्रीकरणं ज्ञेयम् ॥

भा० । ता० । निंदितों (जिनसे धनलेनानिषिद्धहै) से प्रतिग्रहलेना वाणिज्य (व्यापारकरना) शूद्रकीसेवा और मिथ्याबोलना ये सम्पूर्ण पंडितजनों को अपात्रिकरण जानने अर्थात् इनका करने वाला प्रतिग्रह देनेके योग्य नहींरहता ६९ ॥

कृमिकीटवयोहत्यामद्यानुगतभोजनम् । फलैधःकुसुमस्तेयमधैर्यंचमलावहम् ७० ॥

प० । कृमिकीटवयोहत्या मद्यानुगतभोजनं फलैधः कुसुमस्तेयं अधैर्यं च मलावहम् ॥

यो० । कृमिकीटवयोहत्या मद्यानुगतभोजनं फलैधः कुसुमस्तेयं चपुनः अधैर्यं एतत् सर्वं प्रत्येकंमलावहं ज्ञेयम् ॥

भा० । क्षुद्रजीव, कीट, पक्षी, इनकीहत्या मदिरा के संग लायेहुये पदार्थका भोजन फल इंधन फूल इनकी चोरी और अधीरताये सम्पूर्ण मलिनीकरणजानने ॥

ता० । कृमि (छोटे २ जीव) कीट (कृमियोंसे कुछबड़े) पक्षी इनकीहत्या और मद्यानुगतभोजन अर्थात् जो शाक और पाकआदि भोजनकरने योग्य भी उसपात्र में रखकर लायागयाहो जिस में मदिरा भी रक्खीगईहो उसका भोजन इसपदका मेधातिथि ने तो यहअर्थ किया है कि जिसके संग मदिराका स्पर्शहुआहो सो ठीकनहीं क्योंकि उसके भोजनकरनेमें तो अधिक प्रायश्चित्त होताहै और फल इंधन फूल इनकीचोरी और अधैर्य अर्थात् यत्किंचित् धनआदिकी हानिहोनेपरभी अत्यंत व्याकुलहोना ये सम्पूर्ण प्रत्येक मलावह (मलिनीकरण) पंडितजनों ने कहे हैं अर्थात् इनके करने से निर्मल भी मलीन होजाता है ७० ॥

एतान्येनांसिसर्वाणियथोक्तानिपृथक्पृथक् । यैर्यैर्व्रतैरपोह्यन्तेतानिसम्यङ्निबोधत ७१ ॥

प० । एतानि एनांसि सर्वाणि यथोक्तानि पृथक् पृथक् यैः यैः व्रतैः अपोह्यंते तानि सम्यक् निबोधत ॥

यो० । यथोक्तानि एतानि सर्वाणि पृथक् २ एनांसि यैः यैः व्रतैः अपोह्यंते तानि व्रतानि यूयं सम्यक् निबोधत ॥

भा० । ता० । भिन्न भिन्न वर्णन कियेहुये ये सम्पूर्ण ब्रह्महत्याआदि पाप जिन २ व्रतोंसे दूरकिये जातेहैं उन उन व्रतों (प्रायश्चित्त) को यथार्थ रीतिसे तुमसुनो ७१ ॥

ब्रह्महाद्वादशसमाःकुटींकृत्वावनेवसेत् । भैक्षाश्यात्मविशुद्ध्यर्थंकृत्वाशवशिरोध्वजम् ७२

प० । ब्रह्महा द्वादशसमाः कुटीं कृत्वा वने वसेत् भैक्षाशी आत्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम् ॥

यो० । ब्रह्महा भैक्षाशी सन् शवशिरोध्वजं कृत्वा कुटीं कृत्वा आत्मविशुद्ध्यर्थं द्वादशसमाः वनेवसेत् ॥

भा० । ब्रह्महत्यारा कुटीबनाकर १२ वर्ष पर्यंत वनमें वसै और अपनी शुद्धिके लिये भिक्षा का भोजन करै और शवके शिरके चिह्नको धारण करै ॥

ता० । ब्राह्मणकी हत्याकरनेवाला ब्राह्मण वनमें कुटीको बनाकर और शव (मुर्दा) के शिर (कपाल) का अथवा किसी अन्यके कपाल का चिह्न धारणकरके भिक्षाके अन्नका भोजनकरता

हुआ अपनेपापकी शुद्धिकेलिये द्वादशवर्ष पर्यंत वनमें वसै और इसवचनके अनुसार केशोंकामुंडन कराकर वसै और भिक्षा भी इनयमके वचनानुसार इसप्रकार ग्रहणकरै कि नहीं निश्चय कियेहुये अर्थात् प्रतिदिन नये २ अपूर्व सातघरोंमें उससमय शनैः २ प्रवेशकरै जिससमय घरके मनुष्य भोजन करचुकेहों और अपने पापको प्रकटकरके विचरै और यहकहै कि मैं ब्रह्महत्याराहूं मुझे भिक्षा दो और उस भिक्षाको भी एकही समय मांगे यदि भिक्षा न मिलै तो जलकाही पानकरले और यह बारह १२ वर्षका प्रायश्चित्त ब्राह्मणका वधकरनेमेंहै क्योंकि आगे मनुजी इसवचनसे यहकहैंगे कि यह प्रायश्चित्त अज्ञानसे ब्राह्मणको ब्राह्मण के मारनेपरकहा और क्षत्री, वैश्य, शूद्रोंको तो क्रम से द्विगुण–त्रिगुण और चतुर्गुण प्रायश्चित्त करना इसै भविष्यपुराण के वचनानुसार होताहै कि क्षत्रियों के ब्राह्मणसे दूने वैश्यके तिगुने और शूद्रोंको चौगुने प्रायश्चित्त होते हैं और वे प्रायश्चित्त महात्माओंकी सभाके कहनेसे करने क्योंकि पापकर्मोंकी शुद्धिके लिये सभाका कहाहुआ व्रत होता है–और सभा भी जितने ब्राह्मणों की होती है उससे दूने क्षत्रियोंकी तिगुने वैश्यों की व्यवहार देखनेके लिये होती है और क्षत्री–वैश्य–शूद्र इनका व्रत भी ब्राह्मणसे दूना तिगुना चौगुना होताहै–और मनुके कहेहुये ये प्रायश्चित्त भी वहां ही समझने जहां गुणवान् ब्राह्मणने निर्गुण को हताहो क्योंकि इसै वचनों से यह वर्णन किया है कि यदि गुणवाले शूरवीर ब्राह्मणने निर्गुण ब्राह्मणको अज्ञानसे हताहो तो अश्वमेधके स्नानको करिकै मनुके कहेहुये प्रायश्चित्तोंको करै और ब्रह्महत्यारा बारह १२ वर्षतक कुटी बनाकर वनमें वसै अथवा अश्वमेधके अवभृथ (यज्ञान्त स्नान) को करै–यदि अज्ञानसे निर्गुणका वध कियाहो–यदि जानकर ब्रह्म वध कियाहो तो जाति–शक्ति–गुण–इनके अनुसार और पाप के संबन्धके अनुकूल प्रायश्चित्त करै क्योंकि इसै विश्वामित्रके वचनसे अधिक प्रायश्चित्त भी कहा है–यदि जानकर ब्राह्मण का वध ब्राह्मणने कियाहोय तो इसै अंगिरा ऋषिके वचनानुसार पूर्वोक्तरीतिसे चौबीस वर्षतक वनमें वसै कि अज्ञानसे कियेहुये पापका प्रायश्चित्त है और ज्ञानसे कियेहुये पापका प्रायश्चित्त नहीं और अज्ञान से कियेहुये पापका जो प्रायश्चित्त है ज्ञानसे किये पापका उससे दूना प्रायश्चित्त होताहै ७२ ॥

लक्ष्यंशस्त्रभृतांवास्याद्विदुषामिच्छयात्मनः।प्रास्येदात्मानमग्नौवासमिद्धेत्रिरवाक्शिराः ७३

प० । लक्ष्यं शस्त्रभृतां वा स्यात् विदुषां इच्छया आत्मनः प्रास्येत् आत्मानं अग्नौ वा समिद्धे त्रिः अवाक्शिराः ॥

---

१ कृतवपनोनिवसेत् ॥

२ सप्तागाराण्यपूर्वाणि यान्यसंकल्पितानिच। संविशंस्तानिशनकैर्विधूमेभुक्तवज्जने ॥ भ्रूणघ्नेदेहिमेभिक्षामेनोविख्याप्य संचरेत् । एककालंचरेद्भैक्ष्यंतदलब्धोदकंपिबेत् ॥

३ इयंविशुद्धिरुदिता प्रमाप्याकामतोद्विजम् ॥

४ द्विगुणाःक्षत्रियाणांतु वैश्यानांत्रिगुणाःस्मृतः । चतुर्गुणास्तुशूद्राणांपर्षदुक्तामहात्मनाम्॥पर्षदुच्यव्रतंप्रोक्तं शुद्ध्येपाप कर्मणाम् ॥

५ हताचेत्गुणवान्वीरःअकामान्निर्गुणोहतः । कर्त्तव्यानिमनूक्तानिकृत्वावैआश्वमेधिकम् ॥ ब्रह्महाद्वादशाब्दानिकुटीं कृत्वावनेवसेत् । गच्छेदवभृथंवापिअकामान्निर्गुणेहते ॥

६ जातिशक्तिगुणापेक्षं सकृद्बुद्धिकृतंतथा । अनुबंधादिविज्ञायप्रायश्चित्तंप्रकल्पयेत् ॥

७ अकामतःकृतेपापेप्रायश्चित्तंनकामतः ।स्यात्त्वकामकृतेयत्तुद्विगुणंबुद्धिपूर्वके ॥

यो० । आत्मनः इच्छया विदुषां शस्त्रभृतांलक्ष्यं स्यात् वा समिद्धे अग्नौ अवाक्शिराः सन् त्रिः (त्रिवारं) आत्मानं प्रास्येत् (प्रक्षिपेत्) ॥

भा० । ब्राह्मणकी हत्याकरनेवाला क्षत्री अपनी इच्छासे जाननेवाले शस्त्रधारियों का लक्ष्यहोजाय—अथवा जलतीहुई अग्निमें नीचेको शिरकरिके अपने देहकोगेरिदे ॥

ता० । ब्रह्महत्यारा जाननेवाले शस्त्रधारियों का लक्ष्य (निशाना) अपनी इच्छासे बनै अर्थात् धनुषवाण धारणकरनेवाले जिसको ऐसे जानतेहों कि यहब्राह्मण वधके प्रायश्चित्तार्थ हमारे वाणों का लक्ष्य (निशाना) हुआहै और उसकी शुद्धि इस[1] याज्ञवल्क्य के वचनानुसार तभीहोतीहै जब वह मरजाय अथवा मरनेके तुल्य होजाय कि लक्ष्य बनिकर संग्राममें मरकर शुद्धहोताहै अथवा वाणों के प्रहारसे मृतकके समान दुःखीहुआ जीवताभी शुद्धहोताहै—अथवा प्रज्वलित अग्निमें नीचेकोमुख करके तीनवार इस[2]आपस्तम्बके वचनानुसार शरीरकोडालदे जैसे मृत्युकोप्राप्तहोजाय ये दोनों और इनसे आगे अश्वमेधयज्ञका प्रायश्चित्त उसक्षत्री के लियेहै जिसने जानकर ब्राह्मणका वधकियाहो क्योंकि मनुके इसीवचनको लिखकर भविष्यपुराण में इन[3] वचनोंसे यहकहाहै कि ब्राह्मणके मारने वाला क्षत्री अश्वमेध यज्ञकरै वा अपनी इच्छासे शस्त्रधारियोंका लक्ष्य होजाय अथवा जलतीहुई अग्निमें अपनी देहको तीनवार गेरदे ये तीनों प्रायश्चित्त क्षत्रीके कहे हैं कि निर्गुण क्षत्री वेदके पारगामी धीर ब्राह्मणको इच्छासे हतकर शस्त्रधारी शूरवीरों का लक्ष्य होजाय अथवा चार वेद का ज्ञाता—धीर—अग्निहोत्री—ब्राह्मणको इच्छासे हतकर नीचेको शिरकर कर अपने देहको अग्नि में गेरदे—और गुणवाला और भूपति क्षत्री निर्गुण ब्राह्मणको इच्छासे मारकर अश्वमेध यज्ञ करने से शुद्ध होताहै ७३ ॥

यजेतवाश्वमेधेनस्वर्जितागोसवेनवा। अभिजिद्विश्वजिद्भ्यांवात्रिवृताग्निष्टुतापिवा ७४ ॥

प० । यजेत वा अश्वमेधेन स्वर्जिता गोसवेन वा अभिजिद्विश्वजिद्भ्यां वा त्रिवृता अग्निष्टुता अपि वा ॥

यो० । वा, अश्वमेधेन, स्वर्जिता,—वा गोसवेन, अभिजिद्विश्वजिद्भ्यां, वा त्रिवृता, अग्निष्टुता, यजेत ॥

भा० । अज्ञानसे ब्राह्मणका मारनेवाला क्षत्री अश्वमेध यज्ञकरै वा स्वर्जित वा गोसव वा अभिजित् वा विश्वजित् वा तीनवार अग्निष्टोम यज्ञकरै ॥

ता० । अथवा पूर्वोक्त क्षत्री अश्वमेध, स्वर्जित, अथवा गोसव, अथवा अभिजित्, अथवा तीनवार अग्निष्टोम यज्ञको करै ये अज्ञानसे ब्राह्मणके वधके ही प्रायश्चित्त हैं और तीनों वर्णोंमें भविष्यपुराणके इस[4] वचनानुसार इनका विकल्प है—कि अज्ञानपूर्वक ब्राह्मणका वध होनेपर तीनोंद्विजाति स्वर्जित आदि यज्ञोंको करैं ७४ ॥

---

१ संग्रामेवाहतोलक्ष्यभूतःशुद्धिमवाप्नुयात् । मृतकल्पःप्रहारार्तो जीवन्नपिविशुद्ध्यति ॥

२ तथा प्रास्येत यथाम्रियेत ॥

३ लक्ष्यंशस्त्रभृतांवास्याद्विदुषामिच्छयात्मनः । प्रास्येदात्मानमग्नौवासमिद्धेत्रिरवाक्शिराः ।यजेतवाश्वमेधेन क्षत्रियोविप्रघातकः । प्रायश्चित्तत्रयंह्येतत्क्षत्रियस्यप्रकीर्तितम् २ क्षत्रियोनिर्गुणोधीरंब्राह्मणंवेदपारगम् । निहत्यकामतोवीरःलक्ष्यःशस्त्रभृतोभवेत् । चतुर्वेदविदंधीरंब्राह्मणंचाग्निहोत्रिणम् । निहत्यकामादात्मानंक्षिपेदग्नाववाक्शिराः ॥ निर्गुणंब्राह्मणंहत्वाकामतो गुणवान्नृप । यष्टव्याश्वमेधेनक्षत्रियोयोमहीपतिः ॥

४ स्वर्जितादेश्चयद्वीरकर्मणापृतनापते । अनुष्ठानंद्विजातीनांवधेब्रह्मणःपूर्वके ॥

जपन्वान्यतमंवेदंयोजनानांशतंव्रजेत् । ब्रह्महत्यापनोदायमितभुङ्नियतेन्द्रियः ७५ ॥

प० । जपन् वा अन्यतमं वेदं योजनानां शतं व्रजेत् ब्रह्महत्यापनोदाय मितभुक् नियतेन्द्रियः ॥

यो० । वा मितभुक् नियतेंद्रियः ब्रह्महत्यापनोदाय अन्यतमं वेदंजपन् सन् योजनानां शतं व्रजेत् ॥

भा० । अथवा कोई से वेदको जपताहुआ और अल्प भोजन और इंद्रियोंको वशमें करके ब्रह्म-हत्या दूर करनेके लिये सौ योजन तक गमन करै ॥

ता० । अल्प आहार करताहुआ इंद्रियोंको वशमें करके चारों वेदोंमें किसी एक वेदको जपता हुआ ब्रह्महत्याको दूरकर सौ १०० योजन तक गमन करै—यह प्रायश्चित्त भी अज्ञानसे जातिमात्र ब्राह्मणके मारने पर तीनों वर्णों के लिये साधारण है क्योंकि भविष्यपुराण में यही श्लोकमें पढ़ा है और इस प्रकार अर्थ लिखा है—कि वेदकाज्ञाता और अग्निहोत्री द्विजाति यदि जातिमात्र ब्राह्मण का अज्ञानसे वधकरदे तो यही प्रायश्चित्त करै जो इस श्लोक में कहा है ७५ ॥

सर्वस्वंवेदविदुषेब्राह्मणायोपपादयेत् । धनंवाजीवनायालंगृहंवासपरिच्छदम् ७६ ॥

प० । सर्वस्वं वेदविदुषे ब्राह्मणाय उपपादयेत् धनं वा जीवनाय अलं गृहं वा सपरिच्छदम् ॥

यो० । अथवा—वेदविदुषे ब्राह्मणाय सर्वस्वं वा जीवनाय अलं धनं वा सपरिच्छदं गृहं उपपादयेत् ॥

भा० । वेदके जाननेवाले ब्राह्मणको सर्वस्वदानदे अथवा जीवने योग्य धन वा अन्न आदि सा-मग्री सहित घरको दे ॥

ता० । वेदके ज्ञाता ब्राह्मणको सर्वस्वदे अथवा ब्राह्मणके जीवन योग्य धनको अथवा सामग्री सहित गृहको दे अर्थात् धन, अन्न, ईंधन आदि से पूर्ण ऐसे गृहको दे जो ब्राह्मणके जीवन पर्यंत पर्याप्तहो और उससे अल्प न दे यह प्रायश्चित्त उस ब्राह्मणके लिये है जिसने जातिमात्र ब्राह्मणका वध किया हो क्योंकि भविष्यपुराण में इन वचनों से यह कहा है कि हे गुरु जो ब्राह्मण वेदके अ-भ्याससे हीन और धनवान् अग्निहोत्रसे रहित होकर जातिमात्र ब्राह्मणका वध करिदे तो पाप की शुद्धिके लिये यह प्रायश्चित्त करे कि ब्राह्मणको जन्मभरि के लिये सर्वस्व अथवा जीवन योग्य धन अथवा अन्न ईंधनसे पूर्ण घर दानकरिदे ७६ ॥

हविष्यभुग्वाऽनुसरेत्प्रतिस्रोतःसरस्वतीम् । जपेद्वानियताहारस्त्रिर्वैवेदस्यसंहिताम् ७७

प० । हविष्यभुक् वा अनुसरेत् प्रतिस्रोतः सरस्वतीं जपेत् वा नियताहारः त्रिः वै वेदस्य संहिताम्

यो० । अथवा हविष्यभुक् सरस्वतीं प्रतिस्रोतः अनुसरेत् वा नियताहारः सन् वेदस्यसंहितां त्रिःजपेत् ॥

भा० । नीवारआदि हविष्यको खाताहुआ सरस्वतीके तीर २ गमनकरै अथवा परिमित भोजन करताहुआ तीनवार वेदकी संहिताको जपे ॥

ता० । अथवा नीवारआदि हविष्य का भक्षण करताहुआ सरस्वती के तीर तीर अर्थात् पश्चिम से लेकर पूर्वतक जहां जहां सरस्वती बहतीहो वहां वहां गमनकरै—यह प्रायश्चित्त भी उसके लिये

---

१ जातिमात्रंयदाविप्रंहन्यादमतिपूर्वकम् । वेदविद्याग्निहोत्रीचतदातस्यभवेदिदम् ॥

२ जातिमात्रंयदाहन्याद्ब्राह्मणंब्राह्मणोगुरु । वेदाभ्यासविहीनोवैधनवाननग्निवर्जितः । प्रायश्चित्तंतदाकुर्यात्इदंपापविशु-द्धये । धनंवाजीवनायालंगृहंवासपरिच्छदम् ॥

है जो जानकर जातिमात्र ब्राह्मण का वधकरै क्योंकि भविष्यपुराण में इनै वचनोंसे यहकहाहै कि हे देवेन्द्र जानकर जातिमात्र ब्राह्मण के मारनेपर जो मारनेवाला वेदसेहीन और धनीहो तब इस प्रायश्चित्त को करै कि हविष्यका भोजनकरताहुआ सरस्वती के तीर २ पर गमनकरै अथवा परिमित भोजनकरताहुआ तीनवार वेदकी संहिताकोपढ़े अथवा ऋग्वेद, यजुर्वेद, सामवेद, इनको वह पढ़े जिसने अत्यन्त गुणी ब्राह्मणका जानकर वधकियाहो ७७ ॥

कृतवापनोनिवसेद्ग्रामान्तेगोव्रजेऽपिवा । आश्रमेवृक्षमूलेवागोब्राह्मणहितेरतः ७८॥

प० । कृतवापनः निवसेत् ग्रामांते गोव्रजे अपि वा आश्रमे वृक्षमूले वा गोब्राह्मणहितेरतः ॥

यो० । अथवा कृतवापनः सन् ग्रामांते वा गोव्रजे आश्रमे वा वृक्षमूले गोब्राह्मणहितेरतः (सन्) निवसेत् ॥

भा० । मुंडनकराकर गौ, और ब्राह्मणका उपकार करताहुआ ग्रामके समीप, गोशाला, आश्रम, वा वृक्षके मूल (नीचे) विषे वसै ॥

ता० । अब उसके लिये विशेष प्रायश्चित्त कहते हैं जिस द्वादशवर्ष के प्रायश्चित्तवाले को इसै वचनसे यहकहाहै कि बारहवर्ष की समाप्ति होनेपर यही कहाहै कि केश, नख, श्मश्रु, इनकामुंडन कराकर गौ और ब्राह्मणके हितमें रत अर्थात् इनका उपकारकरताहुआ ग्रामकेसमीपमें अथवा गोशाला अथवा पवित्रदेश अथवा वृक्षकेमूलमें वसै ७८ ॥

ब्राह्मणार्थेगवार्थेवासद्यःप्राणान्परित्यजेत्।मुच्यतेब्रह्महत्यायागोप्तागोर्ब्राह्मणस्यच ७९

प० । ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान् परित्यजेत् मुच्यते ब्रह्महत्यायाः गोप्ता गोब्राह्मणस्य च ॥

यो० । यः ब्राह्मणार्थे वा गवार्थे प्राणान् परित्यजेत् सः चपुनः गोब्राह्मणस्य गोप्ता ब्रह्महत्यायाः सकाशात् मुच्यते ॥

भा० । ता० । जो ब्रह्महत्यारा अग्नि, जल, वा किसीहिंसक से ब्राह्मण और गौकी रक्षाके लिये शीघ्रही प्राणोंकोत्यागै वह ब्रह्महत्याके पापसे छूटताहै ७९ ॥

त्रिवारंप्रतिरोद्धावासर्वस्वमवजित्यवा।विप्रस्यतन्निमित्तेवाप्राणालाभेविमुच्यते ८०॥

प० । त्रिवारं प्रतिरोद्धा वा सर्वस्वं अवजित्य वा विप्रस्य तन्निमित्ते वा प्राणालाभे विमुच्यते ॥

यो० । विप्रस्य सर्वस्वं त्रिवारं प्रतिरोद्धा वा अवजित्य वा तन्निमित्ते प्राणालाभे सति ब्रह्महत्यापापात् मुच्यते ॥

भा० । ब्राह्मणके सर्वस्वको तीनवार रोकनेवाला वा जीतनेवाला अथवा उसके निमित्त प्राणों का त्यागनेवाला मनुष्य ब्रह्महत्याके पापसे छूटताहै ॥

ता० । यदि चौरआदि ब्राह्मणके सर्वस्वको हरिकरलेजातेहों उसके लौटानेकेलिये विना व्याज जो यथाशक्ति यत्नकोकरै और वहां तीनवार युद्धकोकरता सर्वस्व के विना लौटाये भी ब्रह्महत्या के पापसे छूटताहै अथवा प्रथमवारही उक्त ब्राह्मणके हरेहुये सर्वस्वको जो जीतिकर अर्प्पणकरिदे

---

१ जातिमात्रेहतेविप्रेदेवेंद्रमतिपूर्वकम्।हंतायदावेदहीनोधनेनचभवेद्धतः॥तदैतत्कल्पयेत्तस्यप्रायश्चित्तंनिबोधमे । हविष्यभुक्चरेद्वापिप्रतिस्रोतःसरस्वतीम् ॥अथवापरिमिताहारस्त्रीन्वारान्वेदसंहिताम् । जातिमात्रंतुयोहन्याद्विप्रंत्वमतिपूर्वकम् । ब्राह्मणोत्यन्तगुणवान्तेनेदंपरिकल्पयेत् । जपेद्वानियताहारस्त्रिर्वेदस्यसंहिताम् । ऋचोयजूंषिसामानित्रैविद्याख्यंसुरोत्तम ॥

२ समाप्तेद्वादशवर्षे—

वहभी ब्रह्महत्या के पापसे छुटता है—अथवा धनके हरनेवाला चोर यदि पश्चात्तापसे ब्राह्मण की तृप्तिकेलिये अपने मरने में प्रवृत्तहो अथवा किसीदायादसे हरेहुये ब्राह्मणके धनकोदिलाकर ब्राह्मण के जीवनमें प्रवृत्तहो और उससमय उसके प्राणोंका लाभ न भी होय अर्थात् मरभीजाय तोभी ब्रह्महत्याके पापसे छुटताहै ८० ॥

एवंदृढव्रतोनित्यंब्रह्मचारीसमाहितः । समाप्तेद्वादशेवर्षेब्रह्महत्यांव्यपोहति ८१ ॥

प० । एवं दृढव्रतः नित्यं ब्रह्मचारी समाहितः समाप्ते द्वादशे वर्षे ब्रह्महत्यां व्यपोहति ॥

यो० । एवंनित्यंदृढव्रतः ब्रह्मचारी समाहितः पुरुषः द्वादशे वर्षे समाप्ते सति ब्रह्महत्यां व्यपोहति ॥

भा० । ता० ।इसप्रकार प्रतिदिन दृढहै संकल्पजिसका और ब्रह्मचारी अर्थात् स्त्रीकेसंगसे रहित और संयत (वशीभूत) है मन जिसका ऐसामनुष्य बारहवर्ष की समाप्ति होनेपर ब्रह्महत्या को दूर करताहै ८१ ॥

शिष्ट्वावाभूमिदेवानांनरदेवसमागमे । स्वमेनोऽवभृथस्नातोहयमेधेविमुच्यते ८२ ॥

प० । शिष्ट्वा वा भूमिदेवानां नरदेवसमागमे स्वं एनः अवभृथस्नातः हयमेधे विमुच्यते ॥

यो० । वा नरदेवसमागमे स्वंएनः भूमिदेवानां शिष्ट्वाहयमेधे अवभृथस्नातः ब्रह्महत्यायाः विमुच्यते ॥

भा० । अश्वमेधयज्ञके विषे ब्राह्मण और राजाओं के समागम में अपने पापको निवेदनकरने के अनन्तर अवभृथ स्नानसे ब्रह्महत्यारा शुद्धहोताहै ॥

ता० । अश्वमेधयज्ञ में ब्राह्मण और राजाओंके समागम में अपनेपापको निवेदन करने के अनन्तर अवभृथस्नानकरनेसे ब्रह्महत्या से छूटताहै—क्योंकि भविष्यपुराणमें इसवचनसे यहकहाहै कि जो गुणवान् ब्राह्मण निर्गुणब्राह्मण का वध अज्ञानसे करिके अश्वमेधके अवभृथस्नानकोकरै ८२ ॥

धर्मस्यब्राह्मणोमूलमग्रंराजन्यउच्यते।तस्मात्समागमेतेषामेनोविख्याप्यशुद्ध्यति ८३

प० । धर्मस्य ब्राह्मणः मूलं अग्रं राजन्यः उच्यते तस्मात् समागमे तेषां एनः विख्याप्य शुद्ध्यति ॥

ता० । पापकाकर्ता अपने पापोंके विदित करनेसे-अथवा मुझ पापकरनेवालेको धिक्कारहै इस प्रकार पश्चात्ताप करनेसे-और गायत्रीके जपआदि उग्रतपसे अथवा वेदके अध्ययनसे और आपत्ति के समय दानसे पापी अपने पापोंसे मुक्तहोताहै और यह पापोंका विदितकरना प्रकाश प्रायश्चित्त का अंगहै-रहस्य (गुप्त) प्रायश्चित्तका अंगनहीं-अन्यथा वह रहस्य न रहेगा-और पश्चात्ताप प्रकाश रहस्य दोनों प्रायश्चित्तों का अंगहै २२७ ॥

यथायथानरोऽधर्मस्वयंकृत्वानुभाषते । तथातथात्वचेवाहिस्तेनाधर्मेणमुच्यते २२८॥

प० । यथा यथा नरः अधर्मं स्वयं कृत्वा अनुभाषते-तथा तथा त्वचा इव अहिः तेन अधर्मेण मुच्यते ॥

यो० । नरः अधर्मंकृत्वा यथा यथा स्वयं-अनुभाषते तथा तथा त्वचा अहिः इव तेन अधर्मेण मुच्यते ॥

भा० । ता० । मनुष्य स्वयं अधर्म (पापों)को करके जैसे जैसे प्रकटकरताहै तैसे२ ही उस अधर्मसे इसप्रकार छूटताहै जैसे त्वचा (कांचली) से सर्प छूटताहै २२८ ॥

यथायथामनस्तस्यदुष्कृतंकर्मगर्हति । तथातथाशरीरंतत्तेनाधर्मेणमुच्यते २२९॥

प० यथा यथा मनः तस्य दुष्कृतं कर्म गर्हति-तथा तथा शरीरं तत् तेन अधर्मेण मुच्यते ॥

यो० । तस्य (पापकर्तुः) मनः यथा यथा दुष्कृतं कर्म गर्हति-तथा तथा तत् शरीरं तेन पापेन मुच्यते-पापहीनं भवतीत्यर्थः ॥

भा० । ता० । उस पापकरनेवालेका मन जैसे२ निंदितकर्मकी निंदाकरताहै तैसे तैसेही उस पापीका जीवात्मा उसअधर्मसे छूटताहै २२९ ॥

कृत्वापापंहिसंतप्यतस्मात्पापात्प्रमुच्यते । नैवंकुर्यांपुनरितिनिवृत्त्यापूयतेतुसः २३० ॥

प० । कृत्वा पापं हि सन्तप्य तस्मात् पापात् विमुच्यते न एवं कुर्यां पुनः इति निवृत्त्या पूयते तु सः ॥

यो० । मनुष्यः पापं कृत्वा संतप्य तस्मात् पापात् विमुच्यते एवं पुनः न कुर्यां इति निवृत्त्यातु सः पूयते ॥

भा० । मनुष्य पापकरनेपर पश्चात्ताप करनेसे उसपापसे मुक्तहोताहै—और ऐसा फिर न करूंगा इस निवृत्तिरूप संकल्पसे तो वहपापी भलीप्रकार पवित्रहोताहै ॥

ता० । मनुष्य पापकोकरके फिर उसपापका सन्तापकरके अर्थात् मैंने अनुचितकिया यह पश्चात्ताप करके उसपापसे भलीप्रकार छुटताहै—और जबवह पश्चात्ताप इसप्रकार संकल्पसे कियाजाता है कि फिर ऐसाकभीनहीं करूंगा—तब वहपापी उसपापसे भलीप्रकार पवित्रहोताहै—और यहवचन निवृत्तिरूप इस संकल्पके प्रकाश और अप्रकाशरूप प्रायश्चित्तके अंगका बोधकहै २३० ॥

एवंसंचिंत्यमनसाप्रेत्यकर्मफलोदयम् । मनोवाङ्मूर्तिभिर्नित्यंशुभंकर्मसमाचरेत् २३१ ॥

प० । एवं संचिंत्य मनसा प्रेत्य कर्मफलोदयं मनोवाङ्मूर्तिभिः नित्यं शुभं कर्म समाचरेत् ॥

यो० । प्रेत्यकर्मफलोदयं एवं मनसासंचिंत्य मनोवाङ्मूर्तिभिः नित्यं शुभंकर्म समाचरेत् ॥

भा० । ता० । शुभ और अशुभकर्मकी फलप्राप्तिको परलोकमें इसप्रकार मनसे विचारकर मन—वाणी—काया—से प्रतिदिन शुभकर्मकोही करै क्योंकि शुभकर्मही इष्टफलको देताहै—और नरकआदि दुःखदाता कर्मको कभी न करै २३१ ॥

अज्ञानाद्यदिवाज्ञानात्कृत्वाकर्मविगर्हितम् ।तस्माद्विमुक्तिमन्विच्छन्द्वितीयंनसमाचरेत् २३२

प० । अज्ञानात् यदि वा ज्ञानात् कृत्वा कर्म विगर्हितं तस्मात् विमुक्तिं अन्विच्छन् द्वितीयं न समाचरेत् ॥

यो० । अज्ञानात् यदि वा ज्ञानात् विगर्हितं कर्मकृत्वा तस्मात् (कर्मणः) विमुक्तिं अन्विच्छन् सन् द्वितीय तत् कर्म न कुर्यात् ॥

भा० । ता० । प्रमादसे अथवा अपनी इच्छासे निषिद्धकर्मको करके उसपापसे मुक्तिको चाहता हुआ मनुष्य पुनः उसकर्मको न करै क्योंकि पुनः करनेमें इसे देवलऋषीके वचनानुसार दूना प्रायश्चित्त होताहै २३२ ॥

यस्मिन्कर्मण्यस्यकृतेमनसःस्यादलाघवम् ।तस्मिंस्तावत्तपःकुर्याद्यावत्तुष्टिकरंभवेत् २३३ ॥

प० । यस्मिन् कर्मणि अस्य कृते मनसः स्यात् अलाघवं तस्मिन् तावत् तपः कुर्यात् यावत् तुष्टिकरं भवेत् ॥

यो० । यस्मिन् कर्मणि कृते सति अस्य (पापिनः) मनसः अलाघवंस्यात् तस्मिन् तावत् तपः कुर्यात् यावत् तुष्टिकरं भवेत् ॥

भा० । ता० । जिस प्रायश्चित्तरूप कर्मके करनेपर इसपापीके मनको अलाघवहो अर्थात् संतोष न होय उसमें उतनेही प्रायश्चित्तको पुनः पुनः करै जितनेसे इसके मनकी प्रसन्नताहो २३३ ॥

तपोमूलमिदंसर्वंदैवमानुषिकंसुखम् । तपोमध्यंबुधैःप्रोक्तंतपोऽन्तंवेददर्शिभिः २३४ ॥

प० । तपोमूलं इदं सर्वं दैवमानुषिकं सुखं तपोमध्यं बुधैः प्रोक्तं तपोन्तं वेददर्शिभिः ॥

---

१ विधेःप्राथमिकादस्माद्द्वितीयेद्विगुणंभवेत् ॥

यो० । इदं सर्वं दैवमानुषिकंसुखं वेददर्शिभिः बुधैः तपोमूलं तपोमध्यं तपोन्तं प्रोक्तम् ॥

भा० । देवता वा मनुष्यों का जितना सुख है उस सम्पूर्ण का मूल—मध्य—और अन्त वेदके देखनेवाले विद्वानोंने तपकोही कहाहै—अर्थात् देवता और मनुष्योंके सुखका आदि मध्य अन्त तप केही आधीनहै ॥

ता० । देवता और मनुष्योंका जो यह संपूर्ण सुखहै उसका तपही कारण है और तपही उसका मध्यहै अर्थात् तपसेही उसकी स्थितिहै और तपही उसका अन्तहै अर्थात् जितना तपहोताहै उतनीही दैव—और मानुषिक सुखकी अवधीहोती है—और वहतप पूर्वोक्त प्राजापत्य आदि होताहै—यह सबवेदके देखनेवाले विद्वानोंने कहाहै २३४ ॥

ब्राह्मणस्यतपोज्ञानंतपःक्षत्रस्यरक्षणम्।वैश्यस्यतुतपोवार्तातपःशूद्रस्यसेवनम् २३५॥

प० । ब्राह्मणस्य तपः ज्ञानं तपः क्षत्रस्य रक्षणं वैश्यस्य तु तपः वार्ता तपः शूद्रस्य सेवनम् ॥

यो० । ब्राह्मणस्य ज्ञानं तपः—क्षत्रस्यरक्षणंतपः-वैश्यस्यवार्तातपः—शूद्रस्यसेवनंतपः (अस्ति) ॥

भा० । ता० । ब्राह्मणका तप ज्ञान है अर्थात् ब्रह्मचारीके धर्म के बोधक वेदका ज्ञान है—और क्षत्री का तप प्रजाकी रक्षा है और वैश्यका तप वार्ता (कृषि व्यापार गोरक्षा आदि) है—और शूद्रका तप ब्राह्मणकी सेवा है २३५ ॥

ऋषयःसंयतात्मानःफलमूलानिलाशनाः।तपसैवप्रपश्यन्तित्रैलोक्यंसचराचरम् २३६ ॥

प० । ऋषयः संयतात्मानः फलमूलानिलाशनाः तपसा एव प्रपश्यंति त्रैलोक्यं सचराचरम् ॥

यो० । फलमूलानिलाशनाः संयतात्मानः ऋषयः तपसा एव सचराचरं त्रैलोक्यं प्रपश्यंति ॥

भा० । ता० । वाणी—मन—देह—इनके संयम में टिकेहुये फल मूल वायुको भक्षण करतेहुये ऋषि एक स्थानमें बैठकरही स्थावर जंगम रूप त्रिलोकी को भलीप्रकार तपसेही देखते हैं—अर्थात् तपसे परे और कोई उत्तम पदार्थ नहीं है २३६ ॥

औषधान्यगदोविद्यादैवीचविविधास्थितिः।तपसैवप्रसिध्यन्तितपस्तेषांहिसाधनम् २३७॥

प० । औषधानि अगदः विद्या दैवी च विविधा स्थितिः तपसा एव प्रसिध्यंति तपः तेषां हि साधनम् ॥

यो० । औषधानि अगदः विद्या चपुनः दैवी विविधा स्थितिः एतानि तपसा एव प्रसिध्यंति हि (यतः) तेषांसाधनं तपः अस्ति ॥

भा० । औषध—नीरोगता—विद्या—और देवताओंकी अनेकप्रकारकी स्थिति—ये सब तपसेही प्राप्त होते हैं क्योंकि इनका साधन तपही है ॥

ता० । रोगके दूरकरनेवाली औषध—और अगद (नीरोगता) और विद्या—अर्थात् ब्रह्मधर्म का आचरण जिससे हो ऐसा वेदांतका ज्ञान और दैवी विविध स्थिति अर्थात् देवताओं के योग्य नानाप्रकारके स्वर्ग आदि लोकों में स्थिति—ये सब तपसेही प्राप्त होतेहैं—क्योंकि इनकी प्राप्तिका निमित्त तपही है २३७ ॥

यद्दुस्तरंयद्दुरापंयद्दुर्गंयच्चदुष्करम् । सर्वंतुतपसासाध्यंतपोहिदुरतिक्रमम् २३८ ॥

प० । यत् दुस्तरं यत् दुरापं यत् दुर्गं यत् च दुष्करं सर्वं तु तपसा साध्यं तपः हि दुरतिक्रमम् ॥

यो० । यत् दुस्तरं—यत् दुरापं—यत् दुर्गं—चपुनः यत् दुष्करं भवति—तत्सर्वं तपसा साध्यं भवति हि (यतः) तपः दुरतिक्रमं अस्ति ॥

भा० । जो वस्तु दुस्तर है—जो दुराप है—जो दुर्ग है—जो दुष्कर है—वह सब तपसे सिद्धकरने योग्यहै क्योंकि तपही दुष्कर कर्म का साधक होताहै ॥

ता० । जो दुस्तर है अर्थात् ग्रह प्रारब्ध आदि से सूचित विपत्ति आदि दुःखसे तरीजाय—जो वस्तु दुराप हो—अर्थात् दुःखसे मिलसके जैसे क्षत्रिय आदि को उसी शरीरसे ब्राह्मणत्व का मिलना—जो स्थान दुःखसे गमनकरने योग्य हो जैसे मेरु पर्वत की शिखर—जो कर्म दुःखसे किया जाय जैसे गौ आदि का प्रचुरदान—ये सब तपसेही होसक्ते हैं क्योंकि दुष्कर भी कर्म का कारण तप होताहै २३८॥

महापातकिनश्चैवशेषाश्चाकार्यकारिणः।तपसैवसुतप्तेनमुच्यन्तेकिल्बिषात्ततः २३९॥

प० महापातकिनः च एव शेषाः च अकार्यकारिणः तपसा एव सुतप्तेन मुच्यंते किल्बिषात् ततः ॥

यो० । महापातकिनः चपुनः शेषाः अकार्यकारिणः सुतप्तेन तपसा एव ततः किल्बिषात् मुच्यंते ॥

भा० । ता० । ब्रह्महत्या आदि महापातकोंके कर्ता—और अन्य भी अकार्यों (उपपातक आदि)के कर्ता—पूर्वोक्त रीतिसे कियेहुये तपसेही उस पापसे मुक्त होतेहैं २३९ ॥

कीटाश्चाहिपतंगाश्चपशवश्चवयांसिच । स्थावराणिचभूतानिदिवंयान्तितपोबलात् २४० ॥

प० । कीटाः च अहिपतंगाः च पशवः च वयांसि च स्थावराणि च भूतानि दिवं यांति तपोबलात्॥

यो० । कीटाः अहिपतंगाः पशवः वयांसि—चपुनः स्थावराणि भूतानि तपोबलात् दिवं यांति ॥

भा० । कीट—सर्प—पतंग—पशु—पक्षी और स्थावर भूत—ये भी तपके बल से स्वर्गमें जाते हैं ॥

ता० । कीट—सर्प—पतंग—पशु—पक्षी और स्थावरभूत (वृक्ष गुल्मलताआदि) ये सब तपकेही माहात्म्यसे स्वर्गमें जातेहैं—क्योंकि कपोतआदि के इतिहासों में पक्षीआदिकों का भी अग्निमें प्रवेश आदि तप सुनाजाता है और कीटआदिकों को जो जातिसेही दुःखका सहना है वहीतप है उससेही पापरहित होकर स्वर्गमें उस पुण्यसे जातेहैं जो किसी अच्छेजन्मांतरमें कियाथा २४० ॥

यत्किञ्चिदेनःकुर्वन्तिमनोवाङ्मूर्त्तिभिर्जनाः । तत्सर्वंनिर्दहंत्याशुतपसैवतपोधनाः २४१ ॥

प० । यत् किंचित् एनः कुर्वंति मनोवाङ्मूर्तिभिः जनाः तत् सर्वं निर्दहंन्ति आशु तपसा एव तपोधनाः॥

यो० । जनाः मनोवाङ्मूर्तिभिः यत् किंचित् पापं कुर्वंति—तत् सर्वं पापं तपोधनाः तपसाएव आशु निर्दहंति (नाशयंति)

भा० । ता० । मन वाणी देहसे जो कुछ पाप मनुष्य करते हैं उससम्पूर्ण पापको तपकरनेसेही उसी समय नष्टकर देतेहैं २४१ ॥

तपसैवविशुद्धस्यब्राह्मणस्यदिवौकसः । इज्याश्चप्रतिगृह्णन्तिकामान्संवर्धयन्तिच २४२ ॥

प० । तपसा एव विशुद्धस्य ब्राह्मणस्य दिवौकसः इज्याः च प्रतिगृह्णंति कामान् संवर्धयंति च ॥

यो० । तपसा विशुद्धस्य एव ब्राह्मणस्य यज्ञे दिवौकसः इज्याः (हवींषि) प्रतिगृह्णंति—चपुनः कामान् संवर्धयंति ॥

भा० । ता० । प्रायश्चित्तरूप तपसे नष्टहोगया है पाप जिसका ऐसे ब्राह्मण के यज्ञकी हवि को देवता ग्रहणकरतेहैं और ब्राह्मणकी कामनाओं को पूर्णकरतेहैं २४२ ॥

प्रजापतिरिदंशास्त्रंतपसैवासृजत्प्रभुः । तथैववेदानृषयस्तपसाप्रतिपेदिरे २४३ ॥

प० । प्रजापतिः इदं शास्त्रं तपसा एव असृजत् प्रभुः तथा एव वेदान् ऋषयः तपसा प्रतिपेदिरे ॥

यो० । प्रभुः (समर्थः) प्रजापतिः (ब्रह्मा) इदं शास्त्रं तपसा एव असृजत्—तथा एव ऋषयः (वसिष्ठादयः) तपसा वेदान् प्रतिपेदिरे (वेदज्ञाः संपन्नाः) ॥

भा० । ता० । सम्पूर्ण जगत्की उत्पत्ति—पालन और प्रलयकरने में प्रभु (समर्थ) ब्रह्माने इस ग्रन्थको तपसेही रचा—और वसिष्ठआदि ऋषि भी तपसेही वेदके ज्ञाताहुये २४३ ॥

इत्येतत्तपसोदेवामहाभाग्यंप्रचक्षते।सर्वस्यास्यप्रपश्यन्तस्तपसःपुण्यमुत्तमम् २४४ ॥

प० । इति एतत् तपसः देवाः महाभाग्यं प्रचक्षते सर्वस्य अस्य प्रपश्यंतः तपसः पुण्यं उत्तमम् ॥

यो० । सर्वस्य अस्य जंतोः उत्तमं पुण्यं (दुर्ल्लभजन्म) तपसः सकाशात् प्रपश्यंतःदेवाः इति एतत् तपसः महाभाग्यं प्रचक्षते ॥

भा० । ता० । सम्पूर्ण इनजीवों के उत्तमपुण्य (दुर्ल्लभजन्म) को तपसेही उत्पन्न जानतेहुये देवताओंने यहपूर्वोक्त तपका माहात्म्यकहाहै—अर्थात् सबकामूलकारण तपकोही वर्णनकियाहै २४४ ॥

वेदाभ्यासोऽन्वहंशक्त्यामहायज्ञक्रियाक्षमा।नाशयन्त्याशुपापानिमहापातकजान्यपि २४५ ॥

प० । वेदाभ्यासः अन्वहं शक्त्या महायज्ञक्रिया क्षमा नाशयंति आशु पापानि महापातकजानि अपि ॥

यो० । अन्वहं शक्त्या वेदाभ्यासः महायज्ञक्रिया क्षमा एतानि महापातकजानि अपि पापानि आशु नाशयंति ॥

भा० । ता० । यथाशक्ति प्रतिदिन वेदकाअभ्यास और पांचमहायज्ञोंका करना और क्षमा अर्थात् किसीके अपराधको सहना ये सबमहापातक से पैदाहुये भी पापोंको शीघ्रनष्टकरतेहैं २४५ ॥

यथैधस्तेजसावह्निःप्राप्तंनिर्दहतिक्षणात् । तथाज्ञानाग्निनापापंसर्वंदहतिवेदवित् २४६ ॥

प० । यथा एधः तेजसा वह्निः प्राप्तं निर्दहति क्षणात् तथा ज्ञानाग्निना पापं सर्वं दहति वेदवित् ॥

यो० । यथावह्निः प्राप्तं एधः क्षणात् निर्दहति तथा वेदवित् ज्ञानाग्निना सर्वं पापं दहति ॥

भा० । ता० । जैसे अग्नि प्राप्तहुये काष्ठको क्षणमात्र में भस्मकरदेता है इसीप्रकार वेदकाज्ञाता ब्राह्मण सम्पूर्ण पापोंको नष्टकरदेता है २४६ ॥

इत्येतदेनसामुक्तंप्रायश्चित्तंयथाविधि।अतऊर्ध्वंरहस्यानांप्रायश्चित्तंनिबोधत २४७ ॥

प० । इति एतत् एनसां उक्तं प्रायश्चित्तं यथाविधि अतः ऊर्ध्वं रहस्यानां प्रायश्चित्तं निबोधत ॥

यो० । इति एतत् एनसां प्रायश्चित्तं यथाविधि उक्तं अतः ऊर्ध्वं रहस्यानां प्रायश्चित्तं निबोधत ॥

भा० । ता० । ब्रह्महत्यादि जो प्रकाश पापहैं उनका यह प्रायश्चित्त विधिपूर्वक कहा इससे आगे रहस्य (गुप्त) पापोंके प्रायश्चित्तको तुमसुनो २४७ ॥

सव्याहृतिप्रणवकाःप्राणायामास्तुषोडश । अपिभ्रूणहणंमासात्पुनन्त्यहरहःकृताः २४८ ॥

प० । सव्याहृतिप्रणवकाः प्राणायामाः तु षोडश अपि भ्रूणहणं मासात् पुनंति अहरहः कृताः ॥

यो० । अहरहः कृताः सव्याहृतिप्रणवकाः षोडश प्राणायामाः भ्रूणहणं अपि मासात्—पुनंति ॥

भा० । प्रतिदिन कियेहुये ७ व्याहृति और ओंकार गायत्री आदि सहित सोलह प्राणायाम एक मास में भ्रूणहत्यारे को भी पवित्र करते हैं ॥

ता० । भू आदि व्याहृति ओंकार गायत्री और शिरः मंत्र इनसे युक्त और पूरक, कुंभक, रेचक आदि विधिसे प्रतिदिन कियेहुये सोलह प्राणायाम एक मासमें ब्रह्महत्यारेको भी पवित्र करते हैं— और अपि शब्दसे उसको भी पवित्र करते हैं जो ब्रह्महत्याके शास्त्रोक्त प्रायश्चित्तका अधिकारी है और यह प्रायश्चित्त तीनों द्विजातियोंकोही कर्त्तव्य है क्योंकि स्त्री—और शूद्रों को तो वेद के मंत्र में अनधिकार है २४८ ॥

कौत्संजप्त्वापइत्येतद्वासिष्ठंचप्रतीत्यृचम् । माहित्रंशुद्धवत्यश्चसुरापोऽपिविशुद्ध्यति २४९ ॥

प० । कौत्सं जप्त्वा अपइतिएतत् वासिष्ठं च प्रतिइतिऋचम् माहित्रं शुद्धवत्यः च सुरापः अपि विशुद्ध्यति ॥

यो० । अपि इति एतत् कौत्सं—प्रति इति वासिष्ठं ऋचं—माहित्रं—चपुनः शुद्धवत्यः (तिस्रः ऋचः) जप्त्वा सुरापः अपि विशुद्ध्यति—शुद्धोभवतीत्यर्थः ॥

भा० । कौत्स ऋषि की कहीहुई अप इस ऋचाको—और वसिष्ठकी कही प्रति इस ऋचा को—और माहित्र सूक्तको—और शुद्धवती तीन ऋचाओंको प्रतिदिन मास पर्यंत सोलहवार भी जपकर मदिरा पीनेवाला भी शुद्ध होता है ॥

ता० । कौत्सऋषि के कहेहुये—अपनः शोशुचदघं—इससूक्तको—और वसिष्ठऋषि की कहीहुई— प्रतिस्तोमेतिरुपमनुशिष्य—इस ऋचाको—और—महित्रीणामवोस्तु—इत्यादि सूक्तको—और शुद्धवत्य एतोन्विंद्रंस्तवामशुद्धं—इनतीन ऋचाओंको—एकमास पर्यंत प्रतिदिन सोलहवार भी जपकर सुराप (मदिरा का पीनेवाला भी शुद्धहोताहै—और अपिशब्दसे वह भी शुद्धहोताहै जो सुरापान के प्रायश्चित्त का अधिकारीहै २४९ ॥

सकृज्जप्त्वास्यवामीयंशिवसंकल्पमेवच । अपहृत्यसुवर्णंतुक्षणाद्भवतिनिर्मलः २५० ॥

प० । सकृत् जप्त्वा अस्यवामीयं शिवसंकल्पं एव च अपहृत्य सुवर्णं तु क्षणात् भवति निर्मलः ॥

यो० । सुवर्णं अपहृत्य—अस्यवामीयं (सूक्तं) चपुनः शिवसंकल्पं सकृत् जप्त्वा क्षणात् निर्मलः भवति ॥

भा० । अस्य वामके सूक्तको और शिवसंकल्पको मासपर्यन्त एकवार भी जपकर ब्राह्मणके सुवर्णकी चोरी करनेवाला शुद्धहोताहै ॥

ता० । ब्राह्मणके सुवर्णको चुराकर—अर्थात् जो ब्राह्मणके सुवर्णकी चोरीकरै वह एकमास पर्यंत अस्यवाम (पलित) ऋषिके कहेहुये सूक्तको प्रतिदिन एकवार भी जपकर अथवा शिवसंकल्प (यज्जाग्रतोदूरमुदैतिदैवं—इत्यादि वाजसनेयीमें पठित सूक्तको जपकर उसीक्षणमें शुद्धहोताहै २५० ॥

हविष्यन्तीयमभ्यस्यनतमंहइतीतिच । जपित्वापौरुषंसूक्तंमुच्यतेगुरुतल्पगः २५१ ॥

प० । हविष्यंतीयं अभ्यस्य नतंमहइतीति च जपित्वा पौरुषं सूक्तं मुच्यते गुरुतल्पगः ॥

यो० । गुरुतल्पगः (गुरुस्त्रीगामी) हविष्यंतीयं—चपुनः नतं अंह इति अष्टौऋचः—पौरुषंसूक्तं जपित्वा—पापान्मुच्यते ॥

भा० । हविष्यंतीय २१ ऋचाओं को—और नतंमंह इनआठ ऋचाओंको और सहस्रशीर्षा इस पुरुषसूक्तको एकमास पर्यंत प्रतिदिन एकवार जपकर—गुरुस्त्रीका गमनकरनेवाला शुद्धहोताहै ॥

ता० । जो मनुष्य गुरु (पिता वा उपाध्याय) की स्त्रीकेसंग गमनकरै वह—हविष्यांगमजरंस्व-र्विदाम इत्यादि इक्कीस २१ ऋचाओंको—अथवा—नतंमंहोनदुरितं—इनआठ ऋचाओंको अथवा तन्मेमनः शिवसंकल्पमस्तु—इससूक्तको अथवा सोलहऋचाके पौरुष (सहस्रशीर्षा) सूक्तको एकमास पर्यंत एकवार प्रतिदिन जपकर—गुरुस्त्री गमनके पापसे छूटताहै २५१ ॥

एनसांस्थूलसूक्ष्माणांचिकीर्षन्नपनोदनम् । अवेत्यृचंजपेदब्दंयत्किञ्चेदमितीतिवा २५२ ॥

प० । एनसां स्थूलसूक्ष्माणां चिकीर्षन् अपनोदनम् अवइतिऋचं जपेत् अब्दं यत्किंचेदंइति इति वा ॥

यो० । स्थूलसूक्ष्माणां एनसां (पापानां) अपनोदनं (नाशं) चिकीर्षन् पुरुषः अवइतिऋचं—वा यत्किंचेदंइति अब्दं जपेत् ॥

भा० । छोटे—बडे पापोंका नाशचाहनेवाला मनुष्य अव इसऋचाको वा यत्किंचेदं इसऋचा को वर्षभर एकवार जपे ॥

ता० । महापातकआदि स्थूलपापोंका और उपपातकआदि सूक्ष्मपापोंका नाशचाहताहुआ मनुष्य अवतेहेलोवरुणनमोभिः—इसऋचाको अथवा—यत्किंचेदंवरुणदैव्येजने—इसऋचा को अथवा—मेमनः शिवसंकल्पमस्तु—इससूक्तको—एकवर्षपर्यंत प्रतिदिन एकवार जपे २५२ ॥

प्रतिगृह्याप्रतिग्राह्यंभुक्त्वाचान्नंविगर्हितम्।जपंस्तरत्समन्दीयंपूयतेमानवस्त्र्यहात् २५३॥

प० । प्रतिगृह्य अप्रतिग्राह्यं भुक्त्वा च अन्नं विगर्हितं जपन् तरत्समंदीयं पूयते मानवः त्र्यहात् ॥

यो० । अप्रतिग्राह्यं प्रतिगृह्य चपुनः विगर्हितं अन्नं भुक्त्वा मानवः तरत् समंदीयं जपन् सन् त्र्यहात् पूयते ॥

भा० । प्रतिग्रह के अयोग्य का प्रतिग्रहलेकर अथवा निषिद्ध अन्नको भक्षणकरके तरत्समंदीय ऋचाके तीनदिनतक जपकरनेसे मनुष्य शुद्धहोताहै ॥

ता० । प्रतिग्रहलेने अयोग्यवस्तु का प्रतिग्रहलेकर और स्वभाव वा कालसे प्रतिग्रह के संबन्धसे दुष्टअन्नको भक्षणकरके तरत्समंदीधावति इनचार ऋचाओंके तीनदिन जपकरनेसे अथवा अर्य्यमा-वरुणं-मित्रंच—इसऋचाको पढ़कर स्नानकरनेसे मनुष्य शुद्धहोताहै २५३ ॥

सोमारौद्रंतुबह्वेनामासमभ्यस्यशुद्ध्यति।स्रवन्त्यामाचरन्स्नानमर्यम्णामितिचत्यृचम् २५४॥

प० । सोमारौद्रं तु बह्वेनाः मासं अभ्यस्य शुद्ध्यति स्रवंत्यां आचरन् स्नानं अर्यम्णां इति च त्यृचं ॥

यो० । बह्वेनाः (मनुष्यः) सोमारौद्रं चपुनः अर्यम्णां इतित्यृचं मासं अभ्यस्य स्रवंत्यां स्नानं आचरन् सन् शुद्ध्यति ॥

भा० । बहुतपाप करनेवाला मनुष्य मासपर्यंत सोमारौद्रके अथवा अर्यमा वरुण इसऋचा के मासभर जपनेसे अथवा बहतीहुई नदीमें स्नानकरनेसे शुद्धहोताहै ॥

ता० । जिसमनुष्यने अनेकपापकियेहों वह मनुष्य एकमास पर्यंत—सोमारुद्राधारयेत् स्यामस्वयं इनचार ऋचाओंका, अथवा अर्यमा मित्रंवरुणंच—इनदोऋचाओंका एकमास पर्यंत अभ्यास (जप) करनेसे और बहतीहुईनदीमें स्नानकरनेसे शुद्धहोताहै—अर्थात् इनतीनों प्रायश्चित्तोंमेंसे एकभी प्राय-श्चित्तके मासभरकरनेसे बहुतपापकरनेवाला भी मनुष्य शुद्धहोताहै यहवचन इसबातको जनाताहै कि बहुतपापोंमें भी तंत्रसे एकप्रायश्चित्त होताहै २५४ ॥

अब्दार्धमिन्द्रमित्येतदेनस्वीसप्तकंजपेत् । अप्रशस्तंतुकृत्वाप्सुमासमासीतभैक्षभुक् २५५ ॥

प० । अब्दार्धं इंद्रंइतिएतत् एनस्वी सप्तकं जपेत् अप्रशस्तं तु कृत्वा अप्सु मासं आसीत भैक्ष-भुक् ॥

यो० । एनस्वी (पापी) इंद्रं इतिएतत् सप्तकं अब्दार्धं जपेत् तुपुनः अप्सु अप्रशस्तं (मलमूत्रं) कृत्वा मासं भैक्षभुक् आसीत ॥

भा० । ता० । पापीमनुष्य इंद्रं इत्यादि सातऋचाओंको छःमहीने पर्यंत जपै और जलमें मल मूत्रका त्यागकरिके मासपर्यंत भिक्षामांगकर भोजनकरै २५५ ॥

मन्त्रैःसाकलहोमीयैरब्दंहुत्वाघृतंद्विजः।सुगुर्वप्यपहन्त्येनोजप्त्वावानमइत्यृचम् २५६

प० । मंत्रैः साकलहोमैः यैः अब्दं हुत्वा घृतं द्विजः सुगुरु अपि अपहंति एनः जप्त्वा वा नमः इति ऋचं ॥

यो० । द्विजः साकलहोमैः यैः मंत्रैः अब्दं घृतंहुत्वा वानमः इति ऋचंजप्त्वा सगुरु अपि एनः अपहंति ॥

भा० । ता० । साकल होमके मंत्रोंसे (देवकृतस्यइत्याः) एकवर्ष पर्यंत घीकाहोमकरके अथवा नमः इंद्रश्च इसऋचाको जपकर भारीसे भारी भी पापको नष्टकरताहै २५६ ॥

महापातकसंयुक्तोऽनुगच्छेद्गाःसमाहितः।अभ्यस्याब्दंपावमानीर्भैक्षाहारोविशुद्ध्यति २५७॥

प०। महापातकसंयुक्तः अनुगच्छेत् गाः समाहितः अभ्यस्य अब्दं पावमानीः भैक्षाहारः विशुद्ध्यति॥

यो० । यः महापातकसंयुक्तः पुरुषः समाहितः सन् भैक्ष्याहारः अब्दं गाः अनुगच्छेत्—सः पुरुषः पावमानीः अभ्यस्य विशुद्ध्यति ॥

भा० । ता० । जो ब्रह्महत्यादि महापातकीहो वह भिक्षाका अन्न भक्षणकरताहुआ एकवर्षपर्यन्त गौओंका अनुगमन करनेसे और पावमानी (पुनन्तुदेवजना इत्यादि) ऋचाओंका अभ्यास (जप) करनेसे शुद्धहोताहै २५७ ॥

अरण्येवात्रिरभ्यस्यप्रयतोवेदसंहिताम्।मुच्यतेपातकैःसर्वैःपराकैःशोधितास्त्रिभिः२५८ ॥

प० । अरण्ये वा त्रिः अभ्यस्य प्रयतः वेदसंहितां मुच्यते पातकैः सर्वैः पराकैः शोधितः त्रिभिः॥

यो० । त्रिभिः पराकैः शोधितः द्विजः अरण्ये प्रयतः सन् वेदसंहितां त्रि. (त्रिवारं) अभ्यस्य सर्वैः पातकैः मुच्यते॥

भा० । ता० । तीन पराकव्रतों से शुद्धहुआ द्विज वनमें जाकर सावधानीसे तीनवार वेदकी सं-हिताका अभ्यासकरके सम्पूर्ण महापातकोंसे छुटताहै २५८ ॥

त्र्यहंतूपवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः।मुच्यतेपातकैःसर्वैस्त्रिर्जपित्वाऽघमर्षणम् २५९ ॥

प० । त्र्यहं तु उपवसेत् युक्तः त्रिः अह्नः अभ्युपयन् अपः मुच्यते पातकैः सर्वैः त्रिः जपित्वा अघमर्षणं ॥

यो० । यः पुरुषः अह्नः त्रिः (त्रिकालं) अपः अभ्युपयन् सन् त्रिः अघमर्षणं जपित्वा युक्तः सन् त्र्यहं उपवसेत् सः सर्वैः पातकैः मुच्यते ॥

भा० । ता० । जो मनुष्य प्रतिदिन त्रिकालस्नान करताहुआ और प्रत्येक स्नानकेसमय तीन२

वार अघमर्षणको जपताहुआ सावधानहोकर तीनदिनतक उपवास करताहै वह संपूर्णपापोंसे छुटताहै यह प्रायश्चित्त गुरु, लघु, पाप और पुरुषकी शक्तिके अनुसार एक—दो—आदि वारकराना २५९॥

यथाऽश्वमेधःक्रतुराट्सर्वपापापनोदनः । तथाऽघमर्षणंसूक्तंसर्वपापापनोदनम् २६० ॥

प० । यथा अश्वमेधः क्रतुराट् सर्वपापापनोदनः तथा अघमर्षणं सूक्तं सर्वपापापनोदनं ॥

यो० । यथा—क्रतुराट् अश्वमेधः सर्वपापापनोदनो भवति तथा अघमर्षणंसूक्तंसर्वपापापनोदनं भवति ॥

भा० । ता० । जैसे संपूर्ण यज्ञोंमें श्रेष्ठ—अश्वमेध संपूर्ण पापोंकोदूरकरताहै इसीप्रकार अघमर्षण सूक्तभी संपूर्ण पापोंको दूरकरताहै २६० ॥

हत्वालोकानपीमांस्त्रीनश्नन्नपियतस्ततः।ऋग्वेदंधारयन्विप्रोनैनःप्राप्नोतिकिञ्चन२६१॥

प० । हत्वा लोकान् अपि इमान् त्रीन् अश्नन् अपि यतः ततः ऋग्वेदं धारयन् विप्रः न एनः प्राप्नोति किंचन ॥

यो० । इमान् त्रीन् अपि लोकान् हत्वा यतस्ततः अपि अश्नन् विप्रः ऋग्वेदं धारयन् किंचन एनः नमाप्नोति ॥

भा०। ता०। तीनोंभी इनलोकोंको हतकर और जहांतहां भोजनको करताहुआ ब्राह्मण जो ऋग्वेदका धारण (अभ्यास) करताहै वह किंचित् भी पापको नहीं प्राप्तहोता है २६१ ॥

ऋक्संहितांत्रिरभ्यस्ययजुषांवासमाहितः । साम्नांवासरहस्यानांसर्वपापैःप्रमुच्यते २६२ ॥

प० । ऋक्संहितां त्रिः अभ्यस्य यजुषां वा समाहितः साम्नां वा सरहस्यानां सर्वपापैः प्रमुच्यते॥

यो० । ऋक्संहितां वा यजुषां वा सरहस्यानां साम्नां संहितां समाहितः त्रिः अभ्यस्य सर्वपापैः प्रमुच्यते ॥

भा० । ता० । ऋग्वेदकी मन्त्र और ब्राह्मणरूप संहिताको अथवा यजुर्वेदकी संहिताको अथवा रहस्योंसहित अर्थात् ब्राह्मण और उपनिषदोंसेयुक्त सामवेदकी संहिताको सावधानीसे तीनवार अभ्यास करके द्विज सम्पूर्ण पापोंसे मुक्तहोताहै २६२ ॥

यथामहाह्रदंप्राप्यक्षिप्तंलोष्टंविनश्यति। तथादुश्चरितंसर्वंवेदेत्रिवृतिमज्जति २६३॥

प० । यथा महाह्रदं प्राप्य क्षिप्तं लोष्टं विनश्यति तथा दुश्चरितं सर्वं वेदे त्रिवृति मज्जति ॥

यो० । यथा क्षिप्तं लोष्टं महाह्रदं प्राप्य विनश्यति तथा सर्वं दुश्चरितं त्रिवृति वेदे मज्जति ॥

भा०। ता०। जैसे फेंकाहुआ लोष्ट (मट्टीकाडेला) महाह्रद (जलकुंडमें)प्रविष्टहोकर नष्टहोजाता है तिसीप्रकार त्रिवृतवेदमें सम्पूर्णपाप नष्टहोताहै २६३ ॥

ऋचोयजूंषिचान्यानिसामानिविविधानिच । एषज्ञेयस्त्रिवृद्वेदोयोवेदैनंसवेदवित् २६४॥

प० ऋचः यजूंषि च अन्यानि सामानि विविधानि च एषः ज्ञेयः त्रिवृत् वेदः यः वेद एनं सः वेदवित् ॥

यो० । ऋचः यजूंषि—चपुनः विविधानि सामानि चपुनः अन्यानि मंत्र ब्राह्मणानि एषः सर्वः त्रिवृत् वेदज्ञेयः यः ब्राह्मणः एनं वेद सः वेदवित् भवति ॥

भा० । ता० । ऋग्वेदकेमन्त्र और यजुर्वेदकेमन्त्र और बृहद्रथन्तरआदि नानाप्रकारके सामवेद

और मन्त्र इनतीनोंके पृथक् पृथक् मन्त्र—ब्राह्मण—यह त्रिवृत्वेद जानना इस त्रिवृत्वेदको जो ब्राह्मण जानताहै वही वेदवित् होताहै २६४ ॥

आद्यंयत्त्र्यक्षरंब्रह्मत्रयीयस्मिन्प्रतिष्ठिता ।सगुह्योऽन्यस्त्रिवृद्वेदोयस्तंवेदसवेदवित् २६५ ॥

इतिमानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायामेकादशोऽध्यायः ११ ॥

प० । आद्यं यत् त्र्यक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता सः गुह्यः अन्यः त्रिवृत् वेदः यः तं वेद सः वेदवित् ॥

यो० । यत् त्र्यक्षरं आद्यं ब्रह्म (अस्ति) यस्मिन् त्रयी प्रतिष्ठिता (भवति)सः अन्यः त्रिवृत् वेदः गुह्यः अस्ति यः तं गुह्यं वेदं वेद सः वेदवित् भवति ॥

भा० । जो सबवेदोंकी आदिहै और जिसमें तीनअक्षरहैं और जो ब्रह्मरूप है और जिसमें तीनों वेदस्थितहैं वहदूसरा त्रिवृत्वेद गुप्तकरने योग्यहै जो उस ॐकारको जानताहै वहीवेदको जानताहै॥

ता० । जो सम्पूर्ण वेदोंका आद्यहै—और सम्पूर्ण वेदोंकासार ब्रह्महै और जिसमें अकार, उकार, मकार,तीनअक्षरहैं वह जो अन्य त्रिवृत्वेद अर्थात् ॐकाररूप वहगुह्य है अर्थात् सम्पूर्ण वेदके मंत्रोंमें श्रेष्ठहोनेसेऔरपरमार्थ(ब्रह्म)काबोधकहोनेसे—और इससिस्मरण,और जपसे मोक्षका जनकहोने से गुप्तकरने योग्यहै उसत्रिवृत् ॐकारके स्वरूप और अर्थको जो जानता है वही वेदके तत्त्वको जानताहै २६५ ॥

इतिमन्वर्थभास्करे एकादशोऽध्यायः ११ ॥

अथद्वादशोऽध्यायः ॥

चातुर्वर्ण्यस्यकृत्स्नोऽयमुक्तोधर्मस्त्वयानघ । कर्मणांफलनिर्वृत्तिंशंसनस्तत्त्वतःपराम् १ ॥

प० । चातुर्वर्ण्यस्य कृत्स्नः अयं उक्तः धर्मः त्वया अनघ कर्मणां फलनिर्वृत्तिं शंस—नः तत्त्वतः पराम् ॥

यो० । हे अनघ (पापरहित) अयं चातुर्वर्ण्यस्य धर्मः त्वया उक्तः-संप्रति कर्मणां परां फलनिर्वृत्तिं नः (अस्माकं) त्वं शंस (कथय) ॥

भा० । ता० । ब्राह्मणआदि चारोंवर्णों का और अन्तरप्रभवोंका यह धर्म आपने कहा—अब शुभ अशुभकर्मों की निर्वृत्ति (फल) जिसकर्म करनेसे जन्मांतरमें जो फल मिलताहै वहनिर्वृत्ति हमसे कहो—यहसब महर्षियों ने भृगुजीसे कहा १ ॥

सतानुवाचधर्मात्मामहर्षीन्मानवोभृगुः । अस्यसर्वस्यशृणुतकर्मयोगस्यनिर्णयम् २ ॥

प० । सः तान् उवाच धर्मात्मा महर्षीन् मानवः भृगुः अस्य सर्वस्य शृणुत कर्मयोगस्य निर्णयम् ॥

यो० । सः धर्मात्मा मानवः भृगुः तान् महर्षीन्—अस्य सर्वस्य कर्मयोगस्य निर्णयं यूयं शृणुत इति उवाच ॥

भा० । ता० । वह धर्मात्मा—मनुकापुत्र भृगु उनमहर्षियों के प्रति यहबोले कि इससम्पूर्ण कर्म योग के निर्णयको अर्थात् कर्मफलके निश्चयको तुमसुनो २ ॥

शुभाशुभफलंकर्ममनोवाग्देहसंभवम् । कर्मजागतयोनॄणामुत्तमाधममध्यमाः ३ ॥

प० । शुभाशुभफलं कर्म मनोवाग्देहसंभवं कर्मजाः गतयः नृणां उत्तमाधममध्यमाः ॥

यो० । मनोवाग्देहसम्भवं कर्म-शुभाशुभफलं भवति-नृणां उत्तमाधममध्यमाः गतयः कर्मजाः भवंति ॥

भा० । मन वाणी देहसेंपैदाहुये कर्मकाफल शुभ वा अशुभहोताहै और मनुष्योंको उत्तम मध्यम अधम जन्मोंकी प्राप्ति भी कर्मसे होती है ॥

ता० । मन वाणी और देहसे पैदाहुये कर्मकाफल शुभ अथवा अशुभहोताहै और मनुष्योंकी जो उत्तम अधम मध्यम गतिहै अर्थात् उत्तम मध्यम अधम जन्मान्तरों की प्राप्तिहैं वेभी कर्मसेही उत्पन्न होतीहैं और यहां कर्मशब्दसे केवल शरीरकी चेष्टाहीका ग्रहणनहीं है किंतु यह मेराधनहै इससंकल्प और ध्यान योगआदि क्रियामात्र का ग्रहणहै ३ ॥

तस्येहत्रिविधस्यापित्र्यधिष्ठानस्यदेहिनः । दशलक्षणयुक्तस्यमनोविद्यात्प्रवर्तकम् ४ ॥

प० । तस्य इह त्रिविधस्य अपि त्र्यधिष्ठानस्य देहिनः दशलक्षणयुक्तस्य मनः विद्यात् प्रवर्तकम् ॥

यो० । त्र्यधिष्ठानस्य त्रिविधस्य अपि तस्य—देहिनः (जीवसंबंधिनः) दशलक्षणयुक्तस्य कर्मणः प्रवर्तकं मनः विद्यात् (जानीयात्) ॥

भा० । मनवाणी देह इनतीनोंमें स्थित और उत्तम मध्यम भेदसे तीनप्रकार और दशलक्षण उस जीवात्माके कर्म का प्रवर्त्तक मनकोही जाने ॥

ता० । उत्तम मध्यम अधम भेदसे तीनप्रकार के और मन वाणी देह इनतीनों में आश्रित और वक्ष्यमाण दशलक्षणों से युक्त उसदेही (जीवात्मा) के कर्मका प्रवर्तक मनकोही जाने क्योंकि इसे तैत्तिरीय उपनिषद्के अनुसार जो मनका संकल्प है वही कहाजाता है और वही कियाजाता है कि तिससे यहमनुष्य जो मनसे जानताहै उसीको वाणीसे कहताहै और उसीको कर्मसे करता है और वे दशप्रकार के कर्म ये हैं कि ४ ॥

परद्रव्येष्वभिध्यानंमनसानिष्टचिंतनम् । वितथाभिनिवेशश्चत्रिविधंकर्ममानसम् ५ ॥

प० । परद्रव्येषु अभिध्यानं मनसा अनिष्टचिंतनम् वितथाभिनिवेशः च त्रिविधं कर्म मानसम् ॥

यो० । परद्रव्येषु अभिध्यानं, मनसा अनिष्टचिंतनं, पुनः वितथाभिनिवेशः एतत् त्रिविधं कर्ममानसं भवति ॥

भा० । ता० । परके द्रव्योंका अभिध्यान अर्थात् यहचिंताकरनी कि अन्यायसे परकाद्रव्य किसी तरह मिलै और मनसे अनिष्ट (ब्रह्मवधआदि) की चिंताकरनी और मिथ्याअभिनिवेश (आग्रह) अर्थात् परलोकनहीं है शरीरही आत्माहै—यहचिंताकरनी इसरीतिसे तीनप्रकार का और अशुभफल का दाता मानसकर्म होता है और इनतीनों से विपरीत जो तीनप्रकार का मानसकर्म है वहशुभ फलकादाता है ५ ॥

पारुष्यमनृतंचैवपैशून्यंचापिसर्वशः । असंबद्धप्रलापश्चवाङ्मयंस्याच्चतुर्विधम् ६ ॥

प० । पारुष्यं अनृतं च एव पैशून्यं च अपि सर्वशः असंबद्धप्रलापः च वाङ्मयं स्यात् चतुर्विधम् ॥

---

१ तस्माद्यत्पुरुषोमनसाभिगच्छतितद्वाचावदतितत्कर्मणाकरोतीति ॥

यो० । पारुष्यं, चपुनः अनृतं, सर्वशः पैशून्यं, चपुनः अ/संबद्धप्रलापः एतत् चतुर्विधं वाङ्मयं कर्मस्यात् ॥

भा० । कठोर–मिथ्यावचन और अन्यके दूष/गों का कथन और असंबद्ध (निष्प्रयोजन) वर्णन यहचारप्रकार का वाङ्मयकर्म होताहै ॥

ता० । अप्रिय (कठोरवचनकहना) और मिथ्याभाषण और पैशून्य अर्थात् पछिपरके दूषणकहने और राजा, देश, वा पुरवासियोंकी सत्यवार्ताको भी निष्प्रयोजन वर्णनकरना–इसरीतिसे चारप्रकार का और अशुभफलका देनेवाला वाचिककर्म (वाणीका) होता है और इससे विपरीत प्रिय और सत्यवचन परगुणकथन और श्रुति और पुराणोंमें राजादिकं चरित्रोंका वर्णन जो कर्म वह शुभफल का जनक होताहै ६ ॥

अदत्तानामुपादानंहिंसाचैवाविधानतः । परदारोपसेवाचशारीरंत्रिविधंस्मृतम् ७ ॥

प० । अदत्तानां उपादानं हिंसा चँ एवँ अविधानतः परदारोपसेवा चँ शारीरं त्रिविधं स्मृतम् ॥

यो० । अदत्तानां उपादानं चपुनः अविधानतः हिंसा चपुनः परदारोपसेवा एतत् त्रिविधं शारीरं कर्म स्मृतम् ॥

भा० । ता० । विनादिये परायेधनको ग्रहणकरना और शास्त्रोक्त विधिके विना हिंसा और पराई स्त्रीकी सेवा यह तीनप्रकार का अशुभकर्म शरीर से होताहै–और इससे विपरीत तीनप्रकारका कर्म शुभहोताहै ७ ॥

मानसंमनसैवायमुपभुंक्तेशुभाशुभम् । वाचावाचाकृतंकर्मकायेनैवचकायिकम् ८ ॥

प० । मानसं मनसा एवँ अयं उपभुंक्ते शुभाशुभम् वाचा वाचाकृतं कर्म कायेन एवँ चँ कायिकम् ॥

यो० । मानसं शुभाशुभं मनसाएव, वाचाकृतंकर्म वाचा, कायिकं कर्म कायेन एव, अयंजनः उपभुंक्ते ॥

भा० । मनके कियेहुये शुभ अशुभ कर्मको मनसे वाणीके कियेहुये उक्त कर्मको वाणीसे–और कायाके कियेहुये कर्मको कायासे यहप्राणी भोगताहै ॥

ता० । जो सुकृत अथवा दुष्कृतकर्म मनसे कियाहो उसके सुख वा दुःखरूप फलको इसजन्ममें अथवा जन्मांतर में मनसेही यहप्राणी भोगताहै इसीप्रकार वाणीसेकियेहुये शुभ अशुभकर्मको वाणी से भोगताहै अर्थात् मधुरवचन बोलनेवालेकी वाणी मधुर और कठोरवचन बोलनेवालेकी गद्गद (तोतली) होतीहै–इसीप्रकार शरीरसे कियेहुये शुभ अशुभकर्मको शरीरकेद्वारा भोगता है अर्थात् शुभकर्मसे पुष्प माला चन्दनआदि प्रियभोग और अशुभकर्मसे व्याधिआदिको भोगताहै तिससे धर्मसेहीन–मन वाणी और शरीरके कर्मोंको त्यागदे ८ ॥

शरीरजैःकर्मदोषैर्यातिस्थावरतांनरः । वाचिकैःपक्षिमृगतांमानसैरन्त्यजातिताम् ९ ॥

प० । शरीरजैः कर्मदोषैः याति स्थावरतां नरः वाचिकैः पक्षिमृगतां मानसैः अन्त्यजातिताम् ॥

यो० । नरः शरीरजैः कर्मदोषैः स्थावरतां–वाचिकैः पक्षिमृगतां–मानसैः अंत्यजातितां–याति ॥

भा० । शरीर से पैदाहुये कर्मदोषोंसे मनुष्य स्थावर और वाणीसे पैदाहुये कर्मदोषोंसे पक्षी वा मृग और मनसे पैदाहुये कर्मदोषोंसे अन्त्यज होताहै ॥

ता० । बहुधा शरीरकी क्रिया (चेष्टा) से पैदाहुये पापोंसेयुक्त मनुष्य वृक्षयोनिको प्राप्त होताहै

और बहुधा वाणीसे पैदाहुये पापोंसे संयुक्त मनुष्य पक्षी और मृगयोनिको–और बहुधा मनसे पैदाहुये पापोंसे संयुक्त मनुष्य चांडालयोनिको प्राप्तहोताहै–यद्यपि सबपापियोंके पाप काया वाणी मन इनतीनोंसेही उत्पन्न होते हैं तथापि वहप्राणी यदि अधर्महीं केवलकरै और धर्मको अल्पहीकरै इस बाहुल्यके अभिप्रायसे इसवचनका अर्थ वर्णन किया है–अर्थात् जिससे जिसपापको बहुधा करता है उसकाही कार्य होताहै ९॥

वाग्दण्डोऽथमनोदण्डःकायदण्डस्तथैवच।यस्यैतेनिहिताबुद्धौत्रिदण्डीतिसउच्यते १०

प०। वाग्दण्डः अथ मनोदण्डः कायदण्डः तथा एव च यस्य एते निहिताः बुद्धौ त्रिदण्डी इति सः उच्यते॥

यो०। वाग्दण्डः अथ–मनोदंडः चपुनः तथैव कायदंडः एते त्रयः दंडाः यस्य बुद्धौ निहिताः (स्थिताः) सः पुरुषः त्रिदंडी इति मन्वादिभिः उच्यते॥

भा०। ता०। वाणीका दण्ड (कठोरवचनकात्याग) और मनकादण्ड (असत्संकल्पकात्याग) और देहकादण्ड (निषिद्धआचरणका त्याग) ये तीनोंदण्ड जिसकी बुद्धिमें स्थितहैं उसको मनुआदिकोंने त्रिदण्डी (तीनदण्डवाला) कहाहै–केवल दण्डग्रहणसे दण्डी नहींहोताहै यहप्रशंसा भीतर के तीनों दण्डोंकीहै १०॥

त्रिदण्डमेतन्निक्षिप्यसर्वभूतेषुमानवः।कामक्रोधौतुसंयम्यततःसिद्धिंनियच्छति ११॥

प०। त्रिदंडं एतत् निक्षिप्य सर्वभूतेषु मानवः कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति॥

यो०। मानवः एतत् त्रिदंडं सर्वभूतेषु निक्षिप्य (दत्त्वा) तुपुनः कामक्रोधौ संयम्य–ततः सिद्धिं नियच्छति(प्राप्नोति)॥

भा०। ता०। मनुष्य इनतीनों दण्डोंको सम्पूर्ण भूतोंमें देकर अर्थात् निषिद्ध वाणीआदिकोंको सबप्राणियोंमें त्यागकरके और काम क्रोधको रोककर तिसके अनन्तर सिद्धिको प्राप्तहोताहै ११॥

योस्यात्मनःकारयितातंक्षेत्रज्ञंप्रचक्षते। यःकरोतितुकर्माणिसभूतात्मोच्यतेबुधैः १२॥

प०। यः अस्य आत्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते यः करोति तु कर्माणि सः भूतात्मा उच्यते बुधैः॥

यो०। अस्य आत्मनः यः कारयिता तं क्षेत्रज्ञं बुधाः प्रचक्षते तुपुनः यः कर्माणि करोति सः बुधैः भूतात्मा उच्यते॥

भा०। ता०। इसलोक प्रसिद्ध आत्मा (शरीर) को जो कर्मोंमें प्रवृत्त करता है उसजीवको पण्डितजन क्षेत्रज्ञकहतेहैं–और जो शरीर सम्पूर्णकर्मोंको करताहै उसको पण्डितजन भूतात्मा कहते हैं क्योंकि पृथिवीआदि पांचभूतों से इसकी उत्पत्ति होतीहै १२॥

जीवसंज्ञोऽन्तरात्माऽन्यःसहजःसर्वदेहिनाम्। येनवेदयतेसर्वंसुखंदुःखंचजन्मसु १३॥

प०। जीवसंज्ञः अंतरात्मा अन्यः सहजः सर्वदेहिनां येन वेदयते सर्वं सुखं दुःखं च जन्मसु॥

यो०। येन सर्वं सुखं चपुनः दुःखं सर्वजन्मसु अंतरात्मा वेदयते सः सर्वदेहिनां सहजः अन्तरात्मा–जीवसंज्ञः अन्यः अस्ति)॥

भा० । जिससे यह प्राणी प्रतिजन्ममें सम्पूर्ण सुख दुःखको जानताहै अर्थात् भोगता है सम्पूर्ण देहियों का सहज (स्वाभाविक) अन्तरात्मा और जीव (महान्) नामक अन्यहै ॥

ता० । इसश्लोकमें जीवशब्द महान्का बोधकहै क्योंकि येन यह करणमें तृतीयाहै—औरअगिले श्लोकमेंभी तत्शब्द से महान् और क्षेत्रज्ञ दोनोंका ग्रहण है—अहंकार—इंद्रियआदि रूपसे परिणाम को प्राप्तहुये जिसमहत्तत्त्व रूपकरणसे यह क्षेत्रज्ञ प्रतिजन्ममें सुख और दुःखको भोगता है—सम्पूर्ण देहियोंका—अन्तरात्मा और स्वाभाविक जीवरूप वह अन्यहै अर्थात् वह महान् क्षेत्रज्ञके सुख दुःखों का प्रतिजन्म सम्पादक है १३ ॥

तावुभौभूतसंपृक्तौमहान्क्षेत्रज्ञएवच । उच्चावचेषुभूतेषुस्थितंतंव्याप्यतिष्ठतः १४ ॥

प० । तौ उभौ भूतसम्पृक्तौ महान् क्षेत्रज्ञः एव च—उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः ॥

यो० । महान् चपुनः क्षेत्रज्ञः भूतसंपृक्तौ तौ उभौ उच्चावचेषु भूतेषु स्थितं तं—(परमात्मानं)व्याप्य(आश्रित्य) तिष्ठतः॥

भा० । ता० । पृथिवीआदि पांचभूतों से संपृक्त (मिलेहुये) महान् और क्षेत्रज्ञ ये दोनों छोटेबड़े भूतोंमें स्थित—और सर्व लोक—वेद—स्मृति—पुराणादिकों में प्रसिद्ध उस परमात्मा के आश्रय से टिकतेहैं १४ ॥

असंख्यामूर्तयस्तस्यनिष्पतन्तिशरीरतः। उच्चावचानिभूतानिसततंचेष्टयन्तियाः १५॥

प० । असंख्याः मूर्तयः तस्य निष्पतंति शरीरतः उच्चावचानि भूतानि सततं चेष्टयंति याः ॥

यो० । याः उच्चावचानि भूतानि सततं चेष्टयंति ताः असंख्याः मूर्तयः तस्य शरीरतः निष्पतंति ॥

भा० । उस परमात्मा के शरीरसे वे असंख्यमूर्त्ति (जीव) निकसती हैं जो उत्तम अधम देहधारियोंको सदैव कर्मोंमें प्रेरतीहैं ॥

ता० । वे असंख्यमूर्त्ति (जीव) उस परमात्मा के शरीरसे निकसती हैं जो उत्कृष्ट और अपकृष्ट भूतोंको अर्थात् देव मनुष्यादिरूप शरीरोंको सबकालमें कर्मोंमें प्रेरतीहैं- और वे मूर्त्ति क्षेत्रज्ञ शब्दसे वेदान्तमें कहीहैं और उनकीउत्पत्तिभी इसप्रकारकहीहै कि जैसे अग्निमेंसे अग्निकेस्फुलिंग (कणिके) अर्थात् जैसे अग्निकास्फुलिंग अग्निरूपहै—इसीप्रकार परमात्माके अंशजीवभी परमात्मारूपहैं १५ ॥

पञ्चभ्यएवमात्राभ्यःप्रेत्यदुष्कृतिनांनृणाम्।शरीरंयातनार्थीयमन्यदुत्पद्यतेध्रुवम् १६॥

प० । पंचभ्यः एव मात्राभ्यः प्रेत्य दुष्कृतिनां नृणां शरीरं यातनार्थीयं अन्यत् उत्पद्यते ध्रुवम् ॥

यो० । दुष्कृतिनां नृणां पंचभ्यः एवमात्राभ्यः यातनार्थीयं अन्यत् शरीरं प्रेत्य ध्रुवं उत्पद्यते ॥

भा० । ता० । पृथिवीआदि पंचभूतोंसेही पापीमनुष्यों का अन्य (जरायुजादि से भिन्न) शरीर यातना के लिये अर्थात् यमराज के दियेहुये दुःखभोगने के लिये निश्चयकरिके उत्पन्न होताहै १६ ॥

तेनानुभूयतायामीःशरीरेणेहयातनाः । तास्वेवभूतमात्रासुप्रलीयन्तेविभागशः १७ ॥

प० । तेन अनुभूय ताः यामीः शरीरेण इह यातनाः तासु एव भूतमात्रासु प्रलीयन्ते विभागशः ॥

यो० । तेन शरीरेण इह (यमलोके) ताः यामीः यातनाः अनुभूय तासु भूतमात्रासु विभागशः प्रलीयंते ॥

भा० । ता० । उस यातना के अन्यशरीरसे यमलोक में यमराज की दीहुई यातना (दुःख) ओं को भोगकर वे पापी उन्हीं पांचभूतों की मात्राओं में यथायोग्य लीनहोजातेहैं अर्थात् स्थूल शरीरके नाशहोनेपर देहके उत्पादक पंचभूतोंमें संयुक्त होकर टिकतेहैं १७ ॥

सोऽनुभूयासुखोदर्कान्दोषान्विषयसंगजान्। व्यपेतकल्मषोऽभ्येतितावेवोभौमहौजसौ१८

प० । सः अनुभूय असुखोदर्कान् दोषान् विषयसंगजान् व्यपेतकल्मषः अभ्येति तौ एव उभौ महौजसौ ॥

यो० । सः असुखोदर्कान् विषयसंगजान् दोषान् अनुभूय व्यपेतकल्मषः सन् महौजसौ तौ एव उभौ अभ्येति ॥

भा० । ता० । भूत सूक्ष्मआदि लिंगशरीर विशिष्ट वहजीव दुःखहै अधिक जिनमें ऐसे शब्दस्पर्श गंधआदि विषयों के पैदाहुये दुःखोंको भोगकर नष्टहुआ है पाप जिसका ऐसाहुआ उन्हीं दोनोंमहान् वीर्यवाले महत् परमात्माका आश्रयलेता है–अर्थात् उनदोनोंकेही आधीन होताहै १८ ॥

तौधर्मंपश्यतस्तस्यपापंचातन्द्रितौसह।याभ्यांप्राप्नोतिसंपृक्तःप्रेत्येहचसुखासुखम्१९

प० । तौ धर्मं पश्यतः तस्य पापं च अतंद्रितौ सह याभ्यां प्राप्नोति संपृक्तः प्रेत्य इह च सुखासुखम् ॥

यो० । अतंद्रितौतौ (महत्परमात्मानौ) तस्य धर्मं चपुनः पापं सहपश्यतः–याभ्यां (धर्माधर्माभ्यां) संपृक्तः (जीवः प्रेत्य चपुनः इह सुखासुखं प्राप्नोति ॥

भा० । ता० । वे दोनों महत् और परमात्मा आलस्यको छोडकर उसजीव के धर्मको और पाप को मिलकर देखतेहैं जिन धर्म और अधर्मसे संयुक्त जीव इसलोक और परलोकमें सुख और दुःख को प्राप्तहोता (भोगता) है १९ ॥

यद्याचरतिधर्मंसप्रायशोऽधर्ममल्पशः । तैरेवचावृतोभूतैःस्वर्गेसुखमुपाश्नुते २० ॥

प० । यदि आचरति धर्मं सः प्रायशः अधर्मं अल्पशः तैः एव च आवृतः भूतैः स्वर्गे सुखं उपाश्नुते ॥

यो० । सः जीवः यदि प्रायशः धर्मं अल्पशः अधर्मं आचरति तदा तैः एव भूतैः आवृतः सन् स्वर्गे सुखं उपाश्नुते॥

भा० । ता० । यदि वह जीव मनुष्यदशामें अधिकता से धर्मको और अल्पपापको करता है तब स्थूलशरीर के परिणामको प्राप्तहुये उन्हीं पृथिवीआदि पांचभूतों से युक्तहोकर स्वर्ग सुखको भोगता है २० ॥

यदितुप्रायशोऽधर्मंसेवतेधर्ममल्पशः । तैर्भूतैःसपरित्यक्तोयामीःप्राप्नोतियातनाः२१॥

प० । यदि तु प्रायशः अधर्मं सेवते धर्मं अल्पशः तैः भूतैः सः परित्यक्तः यामीः प्राप्नोति यातनाः॥

यो० । यदि सः प्रायशः अधर्मं–अल्पशः धर्मं सेवते तदा तैः भूतैः परित्यक्तः सः (जीवः) यामीः यातनाः प्राप्नोति॥

भा० । ता० । यदि वहजीव मनुष्यदशामें अधिकतासे पापको और अल्पपुण्यको करता है–तब मनुष्यदेह के परिणामको प्राप्तहुये उन्हींभूतों से त्यागाहुआ (मृत) वहजीव पूर्वोक्तरीति से यातना के योग्य देहको प्राप्तहोकर यमराजकी दीहुई पीडाओंको भोगताहै–अर्थात् नरकदुःख भोगेहै २१ ॥

यामीस्तायातनाःप्राप्यसजीवोवीतकल्मषः।तान्येवपञ्चभूतानिपुनरभ्येतिभागशः२२

प० । यामीः ताः यातनाः प्राप्य सः जीवः वीतकल्मषः तानि एव पंचभूतानि पुनः अभ्येति भागशः ॥

यो० । यामीः ताः यातनाः प्राप्य वीतकल्मषः सः जीवः पुनः तानि एव पंचभूतानि भागशः अभ्येति (प्राप्नोति) ॥

भा० । ता० । यमराज की दीहुई उनपीडाओं को उसी कठिन नरककेदेह से भोगकर नष्टहुआ है पापजिसका ऐसा वहजीव—फिर भी उन्हीं पांचभूतों के भागोंको प्राप्त होता है जो जरायुज आदि शरीरके उत्पादक हैं अर्थात् मनुष्य देहको ग्रहणकरताहै २२ ॥

एताद्दृष्ट्वास्यजीवस्यगतीःस्वेनैवचेतसा ।धर्मतोऽधर्मतश्चैवधर्मेदध्यात्सदामनः २३ ॥

प०। एताः दृष्ट्वा अस्य जीवस्य गतीः स्वेन एव चेतसा धर्मतः अधर्मतः च एव धर्मे दध्यात् सदा मनः ॥

यो० । । अस्य जीवस्य एताः गतीः धर्मतः चपुनः अधर्मतः स्वेन एव चेतसा दृष्ट्वा धर्मे एव सदा मनः दध्यात् ॥

भा० । ता० । धर्म और अधर्म से उत्पन्नहुये (पूर्वोक्त) इसजीवकी गती देखकर अर्थात् स्वर्ग और नरक के भोगोंके योग्य प्रिय और अप्रिय देहोंकी प्राप्ति अपनेही अन्तःकरणसे देखकर धर्म के करनेमेंही सदैव मनको लगावे २३ ॥

सत्वंरजस्तमश्चैवत्रीन्विद्यादात्मनोगुणान् ।यैर्व्याप्येमान्स्थितोभावान्महान्सर्वानशेषतः २४

प० । सत्वं रजः तमः च एव त्रीन् विद्यात् आत्मनः गुणान् यैः व्याप्य इमान् स्थितः भावान् महान् सर्वान् अशेषतः ॥

यो० । सत्वं रजः तमः एतान् त्रीन् आत्मनः गुणान् विद्यात्—यैः गुणैः इमान् अशेषतः सर्वान् भावान् व्याप्य महान् स्थितः ।।

भा० । ता० । सत्व रज तम ये तीन आत्मा (महान) के गुण जानने क्योंकि ये तीनोंआत्मा के उपकारक हैं और जिनगुणोंसे संयुक्तहोकर महान् इनसम्पूर्ण स्थावर जंगम रूपभावों (पदार्थों) को व्याप्तहोकर स्थित है अर्थात् पूर्वोक्त तीनोंगुणोंसे उत्पन्न देहोंमें महान् व्यापकहै २४ ॥

योयदैषांगुणोदेहेसाकल्येनातिरिच्यते ।सतदातद्गुणप्रायंतंकरोतिशरीरिणम् २५ ॥

प० । यः यदा एषां गुणः देहे साकल्येन अतिरिच्यते सः तदा तद्गुणप्रायं तं करोति शरीरिणम् ॥

यो० । एषां गुणानां मध्ये यदा यः गुणः देहे साकल्येन अतिरिच्यते (अधिकोभवति) सः गुणः तदा तं शरीरिणं तद्गुणप्रायं करोति ॥

भा० । ता० । जिससमय इनतीनोंगुणोंमेंसे जो गुण मनुष्यके देहमें सम्पूर्णरूपसे अधिक होता है—उससमय वहगुण उस जीवात्माको प्रायसे उसीगुणवाला करदेताहै अर्थात् वहीगुण अधिकतासे दीखताहै २५ ॥

सत्वंज्ञानंतमोऽज्ञानंरागद्वेषौरजःस्मृतम् । एतद्व्याप्तिमदेतेषांसर्वभूताश्रितंवपुः २६ ॥

प० । सत्वं ज्ञानं तमः अज्ञानं रागद्वेषौ रजः स्मृतम् एतत् व्याप्तिमत् एतेषां सर्वभूताश्रितं वपुः ॥

यो० । सत्वं ज्ञानं—तमः अज्ञानं—बुधैः स्मृतम्—रागद्वेषौ रजः स्मृतं—सर्वभूताश्रितं एतत् वपुः एतेषां (सत्वादिगुणानां) व्याप्तिमत् भवति ॥

भा० । ज्ञान सत्वरूप और अज्ञान तमोरूप—और रागद्वेष रजोगुणरूप पंडितजनोंनेकहाहै—और

इन तीनों गुणों का व्यापक लक्षण यहहै कि सम्पूर्ण भूतों से उत्पन्न देह में ये तीनों गुण स्थित हैं ॥

ता० । यथार्थ जो वस्तुकी प्रतीति उसे सत्वगुण कहतेहैं और सत्वका लक्षणभी वहीहै और अयथार्थ वस्तुकी जो प्रतीति उसे तमोगुणकहतेहैं और वही तमोगुणकालक्षणहै और रागद्वेष (विषाद) की जो प्रतीति वह रजोगुण कहाताहै और वही रजोगुणकालक्षणहै—और सत्वगुण—रजोगुण—तमोगुण इनतीनों का स्वरूप तो क्रमसे प्रीति—अप्रीति विषादरूप है क्योंकि ये तीनोंगुण प्रीति अप्रीति विषादरूप मनकी प्रकाशवृत्ति के नियमार्थ—परस्परगुण के तिरस्कारकर्ता और मिथुनवृत्ति (दोगुणों का मिलना) से होतेहैं—इनतीनों का लक्षण आग्रिमश्लोक से कहेंगे—और इनतीनोंगुणोंकी व्यापकता इसशरीरमें है अर्थात् इनतीनोंगुणोंका व्यापक लक्षणयहहै कि इनगुणों के ज्ञानआदि सम्पूर्ण प्राणियों में व्यापक हैं २६ ॥

तत्रयत्प्रीतिसंयुक्तंकिंञ्चिदात्मनिलक्षयेत्।प्रशान्तमिवशुद्धाभंसत्वंतदुपधारयेत् २७॥

प० । तत्र यत् प्रीतिसंयुक्तं किंचित् आत्मनि लक्षयेत् प्रशांतं इव शुद्धाभं सत्वं तत् उपधारयेत् ॥

यो० । तत्र आत्मनि यत् किंचित् प्रीतिसंयुक्तं लक्षयेत्—प्रशांतं इव शुद्धाभं तत् सत्वं उपधारयेत् (जानीयात्)॥

भा० । ता० । उस आत्मामें जो कुछभी प्रीतिसेसंयुक्त (ज्ञानआदि) अर्थात् क्लेशरहित सुखआदि को देखै तो भलीप्रकार शांत—और शुद्धकांति (निर्मल) वाले उसको सत्वगुणजाने २७ ॥

यत्तुदुःखसमायुक्तमप्रीतिकरमात्मनः । तद्रजोप्रतिपंविद्यात्सततंहारिदेहिनाम् २८ ॥

प० । यत् तु दुःखसमायुक्तं अप्रीतिकरं आत्मनः तत् रजः प्रतिपं विद्यात् सततं हारि देहिनाम् ॥

यो० । यत् आत्मनः अप्रीतिकरं—दुःखसमायुक्तं लक्षयेत्—देहिनां सततं हारितत् प्रतिपं रजः विद्यात् ॥

भा० । ता० । और जो कुछज्ञान आत्माकी अप्रसन्नताका कारक और दुःखसेसंयुक्त अर्थात् आत्मा की प्रीति का अजनक—दीखै—देहधारियों को विषयकी निरंतर इच्छा पैदाकरनेवाले उसको आत्मा के सत्वका नाशकहोनेसे प्रतिप (शत्रु) जानै २८ ॥

यत्तुस्यान्मोहसंयुक्तमव्यक्तंविषयात्मकम्।अप्रतर्क्यमविज्ञेयंतमस्तदुपधारयेत् २९ ॥

प० । यत् तु स्यात् मोहसंयुक्तं अव्यक्तं विषयात्मकम् अप्रतर्क्यं अविज्ञेयं तमः तत् उपधारयेत् ॥

यो० । तुपुनः यत् मोहसंयुक्तं—अव्यक्तं—विषयात्मकं—अप्रतर्क्यं—अविज्ञेयं स्यात् तत् तमः उपधारयेत् ॥

भा० । जो ज्ञान मोहसेसंयुक्त—अव्यक्त विषयात्मक—तर्कणाकेअयोग्य—और जाननेके अयोग्यहै—उस गुणको तमोगुण जानै ॥

ता० । जो मोहसे संयुक्तहो अर्थात् सत् असत् का विवेक जिसमें नहो और जो अव्यक्तहो जिसके विषयकाआकार प्रकट न होसके—और तर्कणाकरनेयोग्यनहो—और जो अविज्ञेयहो अर्थात् अन्तःकरण और बाह्य इंद्रियोंसे जिसकाज्ञान न होसकै—निदान जिसके स्वरूपकी यथार्थ प्रतीति न होसके—ऐसा जो आत्मामें ज्ञान उसको तमोगुण जानै अर्थात् तमोगुण की वृद्धिमेंही ऐसी दशाहोती है—इनतीनों गुणोंकास्वरूप इसलिये वर्णनकियाहै कि यहज्ञातव्यहै कि सत्वगुणकी वृत्तिकेसमय ऐसारहना चाहिये जिसमें रजोगुण तमोगुण न आसकैं २९ ॥

त्रयाणामपिचैतेषांगुणानांयःफलोदयः । अग्र्योमध्योजघन्यश्चतंप्रवक्ष्याम्यशेषतः ३०

प० । त्रयाणां अपि च एतेषां गुणानां यः फलोदयः अग्र्यः मध्यः जघन्यः च तं प्रवक्ष्यामि अशेषतः ॥

यो० । एषां त्रयाणां अपि गुणानां—अग्र्यः मध्यः चपुनः जघन्यः यः फलोदयः तं अशेषतः अहं प्रवक्ष्यामि (कथयिष्यामि) ॥

भा० । ता० । इनतीनों गुणोंका जो उत्तम मध्यम अधमरूप फलका उदय है अर्थात् फलजनक सामग्री है उसको विशेषकरके मैं कहताहूं ३० ॥

वेदाभ्यासस्तपोज्ञानंशौचमिन्द्रियनिग्रहः।धर्मक्रियात्मचिन्ताचसात्विकंगुणलक्षणम् ३१

प०। वेदाभ्यासः तपः ज्ञानं शौचं इंद्रियनिग्रहः धर्मक्रिया—आत्मचिंता च सात्विकं गुणलक्षणम्॥

यो० । वेदाभ्यासः तपः—ज्ञानं—शौचं—इंद्रियनिग्रहः—धर्मक्रिया—चपुनः आत्मचिंता (आत्मविचारः) एतत् सात्विकं गुणलक्षणं—ज्ञेयम् ॥

भा० । ता० । वेदका अभ्यास अर्थात् पठनपाठन प्राजापत्यआदि तपको करना शास्त्रके अर्थको जानना मिट्टी और जलसे शुद्धरहना विषयोंसे इन्द्रियोंको रोकना धर्मको करना आत्माके ध्यानमें तत्पररहना—येसब सात्विकगुणके लक्षणहैं अर्थात् सत्वगुणके कार्यहैं ३१ ॥

आरम्भरुचिताधैर्यमसत्कार्यपरिग्रहः । विषयोपसेवाचाजस्रंराजसंगुणलक्षणम् ३२ ॥

प० । आरम्भरुचिता अधैर्यं असत्कार्यपरिग्रहः विषयोपसेवा च अजस्रं राजसं गुणलक्षणम् ॥

यो० । आरम्भरुचिता—अधैर्यं—असत्कार्यपरिग्रहः चपुनः अजस्रं विषयोपसेवा एतत् राजसं गुणलक्षणं (ज्ञेयं) ॥

भा० । ता० । फलके अर्थ कर्मकरनेमें रुचि—अधैर्य—अर्थात् अल्प अर्थकेलिये व्याकुलता निषिद्ध कर्मका आचरण और निरन्तर विषयोंका उपभोग ये रजोगुणके लक्षणहैं अर्थात् रजोगुणसे उत्पन्न होतेहैं ३२ ॥

लोभःस्वप्नोऽधृतिःक्रौर्यंनास्तिक्यंभिन्नवृत्तिता।याचिष्णुताप्रमादश्चतामसंगुणलक्षणम् ३३

प०।लोभः स्वप्नः अधृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता याचिष्णुता प्रमादः च तामसं गुणलक्षणम्॥

यो० ।लोभः—स्वप्नः—अधृतिः—क्रौर्यं—नास्तिक्यं—भिन्नवृत्तिता याचिष्णुता चपुनः प्रमादः एतत्सर्वं तामसं गुणलक्षणं ज्ञेयम् ॥

भा० । ता० । लोभ—(अधिकधनकीइच्छा) स्वप्न (निद्रा) कृपणता क्रूरता (चुगुलपन) परलोकको न मानना भिन्नवृत्ति—अर्थात् आचारका लोप याचनाका स्वभाव—धर्मआदिके करनेमें असावधानी ये सब तमोगुणके लक्षणहैं अर्थात् तमोगुणसे होतेहैं ३३ ॥

त्रयाणामपिचैतेषांगुणानांत्रिषुतिष्ठताम्।इदंसामासिकंज्ञेयंक्रमशोगुणलक्षणम् ३४ ॥

प० । त्रयाणां अपि च एतेषां गुणानां त्रिषु तिष्ठतां इदं सामासिकं ज्ञेयं क्रमशः गुणलक्षणम् ॥

यो०। त्रिषु (भूतभविष्यत् वर्तमानेषु) तिष्ठतां त्रयाणां अपि एतेषां गुणानां क्रमशः इदं सामासिकं गुणलक्षणंज्ञेयम्॥

भा०। ता०। भूत—भविष्यत् वर्त्तमानकालमें विद्यमान जो ये सत्वादि तीनोंगुण उनका संक्षेप और क्रमसे यह गुणलक्षण जानना ३४ ॥

यत्कर्मकृत्वाकुर्वंश्चकरिष्यंश्चैवलज्जति।तज्ज्ञेयंविदुषासर्वंतामसंगुणलक्षणम् ३५ ॥

प०।यत् कर्म कृत्वा कुर्वन् च करिष्यन् च एव लज्जति तत् ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणम्॥

यो० । यत्कर्म कृत्वा चपुनः कुर्वन् चपुनः करिष्यन् लज्जति तत्सर्वं विदुषा तामसंलक्षणंज्ञेयम् ॥

भा० । ता० । जिसकर्मके करनेसे करतेहुये अथवा करनेके अनन्तर लज्जाहो वह सम्पूर्ण तामसगुणका लक्षण विद्वानोंको जानना ३५ ॥

येनास्मिन्कर्मणालोकेख्यातिमिच्छतिपुष्कलाम्।नचशोचत्यसंपत्तौतद्विज्ञेयंतुराजसम् ३६ ॥

प०। येन अस्मिन् कर्मणा लोके ख्यातिं इच्छति पुष्कलां न च शोचति असंपत्तौ तत् विज्ञेयं तु राजसम् ॥

यो०। येनकर्मणा अस्मिन्लोके पुष्कलां ख्यातिं इच्छति (प्राप्नोति) चपुनः असंपत्तौ सत्यां नशोचति तत्राजसं विज्ञेयम् ॥

भा०। ता०। जिसकर्मके करनेसे इसलोकमें पुष्कल (अधिक) ख्यातिको प्राप्तहो और जिस कर्मके फलकी सिद्धिके न होनेपर दुःखी न हो वह राजसगुणका लक्षण जानना अर्थात् वहकर्म रजोगुणसे कियागयाहै ३६ ॥

यत्सर्वेणेच्छतिज्ञातुंयन्नलज्जतिचाचरन्।येनतुष्यतिचात्मास्यतत्सत्वगुणलक्षणम् ३७

प०। यत् सर्वेण इच्छति ज्ञातुं यत् न लज्जति च आचरन् येन तुष्यति च आत्मा अस्य तत् सत्वगुणलक्षणम् ॥

यो०। सर्वेण यत् कर्म ज्ञातुं इच्छति यत् आचरन् सन् न लज्जति चपुनः येन अस्य आत्मा तुष्यति तत् सत्वगुण लक्षणं ज्ञेयम् ॥

भा०। ता०। जो कर्म सबप्रकारसे वेदार्थके जाननेकी इच्छाको पैदाकरे और जिसके करनेपर तीनोंकालमें लज्जितनहो और जिसकर्मके करनेसे इसके मनमें संतोष पैदाहो वह सत्वगुणका लक्षण जानना ३७ ॥

तमसोलक्षणंकामोरजसस्त्वर्थउच्यते। सत्वस्यलक्षणंधर्मःश्रैष्ठ्यमेषांयथोत्तरम् ३८॥

प०। तमसः लक्षणं कामः रजसः तु अर्थः उच्यते सत्वस्य लक्षणं धर्मः श्रैष्ठ्यं एषां यथोत्तरम् ॥

यो०। कामः तमसः लक्षणं रजसः लक्षणं अर्थः सत्वस्यलक्षणं धर्म. उच्यते एषां यथोत्तरं श्रैष्ठ्यंज्ञेयं—बुधैरितिशेषः॥

भा०। ता०। कामनाको मुख्य समझना तमोगुणका लक्षणहै और धनमें निष्ठारखनी रजोगुण का धर्महै—और धर्मको प्रधान समझना सत्त्वगुणका लक्षण है—और ये तीनों उत्तरोत्तर (क्रमसे) श्रेष्ठ होते हैं ३८ ॥

येनयांस्तुगुणेनैषांसंसारान्प्रतिपद्यते।तान्समासेनवक्ष्यामिसर्वस्यास्ययथाक्रमम् ३९॥

प०। येन यान् तु गुणेन एषां संसारान् प्रतिपद्यते तान् समासेन वक्ष्यामि सर्वस्य अस्य यथाक्रमम्॥

यो०। एषां गुणानांमध्ये येन गुणेन यान् संसारान् जनः प्रतिपद्यते अस्य सर्वस्य (जगतः) तान् सर्वान् यथाक्रमं समासेन वक्ष्यामि ॥

भा०। ता०। इन सत्वादिक गुणोंके मध्यमें जिसगुणसे जिन २ गतियोंको यहजीव प्राप्तहोताहै वे संपूर्ण इसजगत्‌कीगति संक्षेप और क्रमसे तुमको कहताहूं ३९ ॥

देवत्वंसात्विकायान्तिमनुष्यत्वंचराजसाः।तिर्यक्त्वंतामसानित्यमित्येषात्रिविधागतिः ४०

प०। देवत्वं सात्विकाः यान्ति मनुष्यत्वं च राजसाः तिर्यक्त्वं तामसाः नित्यं इति एषा त्रिविधा गतिः ॥

यो०। सात्विकाः देवत्वं—राजसाः मनुष्यत्वं—तामसाः तिर्यक्त्वं—यांति—एषा नित्यं त्रिविधागतिः (जन्मान्तरप्राप्तिः) अस्ति—त्रिभिर्गुणैस्तत् तत् अनुरूपं जन्म भवतीत्यर्थः ॥

भा०। ता० सत्वगुणी मनुष्य देवयोनिको और रजोगुणी मनुष्य योनिको—और तमोगुणी तिर्यक् (तिरछी) योनिको प्राप्तहोतेहैं यह तीनप्रकारकी गति सर्वदासे होतीहै ४० ॥

त्रिविधात्रिविधैषातुविज्ञेयागौणिकीगतिः।अधमामध्यमाग्र्याचकर्मविद्याविशेषतः ४१

प० । त्रिविधा त्रिविधा एषा तु विज्ञेया गौणिकी गतिः अधमा मध्यमा अग्र्या च कर्मविद्याविशेषतः ॥

यो० । एषा त्रिविधा गौणिकी गतिः (कर्मविद्याविशेषतः) अधमा मध्यमा चपुनः अग्र्या (मुख्या) कर्मविद्या विशेषतः त्रिविधा विज्ञेया—बुधैरितिशेषः ॥

भा०। ता०। सत्वआदि गुणोंके निमित्तसे पैदाहुई यह पूर्वोक्त तीनप्रकारकी जो गति है वहकर्म और देशकाल विद्याआदिकी विशेषतासे अधम मध्यम और उत्तमभेदसे पुनः भी त्रिविधा (तीन प्रकार की) जाननी ४१ ॥

स्थावराःकृमिकीटाश्चमत्स्याःसर्पाःसकच्छपाः।पशवश्चमृगाश्चैवजघन्यातामसीगतिः ४२ ॥

प० । स्थावराः कृमिकीटाः च मत्स्याः सर्पाः सकच्छपाः पशवः च मृगाः च एव जघन्या तामसी गतिः ॥

यो० । स्थावराः चपुनः कृमिकीटाः मत्स्याः सकच्छपाः सर्पाः पशवः चपुनः मृगाः एषा जघन्या गतिः तामसीज्ञेया॥

भा० । ता० । वृक्षआदि स्थावर और कृमि–(सूक्ष्मप्राणी) और उनसे कुछ स्थूल कीट और मत्स्य–सर्प–कच्छप–पशु और मृग–यह तमोगुणसे पैदाहुई जघन्य (निकृष्ट) है अर्थात् सबजन्मों में ये निकृष्ट जन्महैं ४२ ॥

हस्तिनश्चतुरङ्गाश्चशूद्राम्लेच्छाश्चगर्हिताः।सिंहाव्याघ्रावराहाश्चमध्यमातामसीगतिः ४३

प० । हस्तिनः च तुरंगाः च शूद्राः म्लेच्छाः च गर्हिताः सिंहाः व्याघ्राः वराहाः च मध्यमा तामसी गतिः ॥

यो०। हस्तिनः तुरंगाः शूद्राः चपुनः गर्हिताः म्लेच्छाः सिंहाः व्याघ्राः चपुनः वराहाः एषा तामसीगतिः मध्यमाज्ञेया॥

भा० । ता० । हाथी–अश्व शूद्र–और निंदित म्लेच्छ–सिंह व्याघ्र (भिडा) और सूकर–यह तमोगुणसे पैदाहुई मध्यमगति जाननी अर्थात् मध्यम तमोगुणी मनुष्य इनयोनियोंमें जन्मतेहैं ४३ ॥

चारणाश्चसुपर्णाश्चपुरुषाश्चैवदाम्भिकाः।रक्षांसिचपिशाचाश्चतामसीषूत्तमागतिः ४४

प०।चारणाः च सुपर्णाः च पुरुषाः च एव दांभिकाः रक्षांसि च पिशाचाः च तामसीषु उत्तमा गतिः॥

यो० । चारणाः सुपर्णाः चपुनः दांभिकाः पुरुषाः–रक्षांसि–चपुनः पिशाचाः एषा तामसीषु उत्तमागतिः विज्ञेया ॥

भा० । ता० । चारण (नटआदि) सुपर्ण (पक्षी) और दांभिक मनुष्य–राक्षस और पिशाच यह तामसीगतियोंमें उत्तमगति जाननी अर्थात् अल्प तमोगुणियोंका जन्म चारणआदि जातियोंमें होताहै ४४ ॥

झल्लामल्लानटाश्चैवपुरुषाःशस्त्रवृत्तयः।द्यूतपानप्रसक्ताश्चजघन्याराजसीगतिः ४५ ॥

प० । झल्लाः मल्लाः नटाः च एव पुरुषाः शस्त्रवृत्तयः द्यूतपानप्रसक्ताः च जघन्या राजसी गतिः॥

यो० । झल्लाः मल्लाः नटाः चपुनः शस्त्रवृत्तयः पुरुषाः चपुनः द्यूतपानप्रसक्ताः एषा राजसीगतिः जघन्याज्ञेया ॥

भा० । ता० । झल्ल और मल्ल अर्थात् समयपर यज्ञोपवीत संस्कारहीन क्षत्रियसे जो क्षत्रिया स्त्रीमें पैदाहुयेहों वे–उनमें भी झल्ल वेहोतेहैं जो लाठोंसे लडतेहैं और मल्ल वेहोतेहैं जो भुजाओं

से लड़तेहैं और रंगनेवाले नट शस्त्रसे जीविका करनेवाले और द्यूत और मदिरापानमें आसक्त–ये सबगति रजोगुणसे पैदाहुई जघन्यहै अर्थात् अत्यन्तरजोगुणसे ये पैदाहोतेहैं ४५ ॥

राजानःक्षत्रियाश्चैवराज्ञांचैवपुरोहिताः।वादयुद्धप्रधानाश्चमध्यमाराजसीगतिः ४६ ॥

प० । राजानः क्षत्रियाः च एव राज्ञां च एव पुरोहिताः वादयुद्धप्रधानाः च मध्यमा राजसी गतिः॥

यो० । राजानः–क्षत्रियाः चपुनः राज्ञां पुरोहिताः–चपुनः वादयुद्धप्रधानाः एषा मध्यमा राजसी गतिः ज्ञेया ॥

भा० । ता० । जो राजपदवीपर अभिषिक्त राजा वे और क्षत्रिय और राजाकेपुरोहित–और जिनको शास्त्रार्थका कलह प्याराहो वे–यह रजोगुणकीगति मध्यम जाननी अर्थात् ये मध्यम रजोगुण से पैदा होते हैं ४६ ॥

गन्धर्वागुह्यकायक्षाविबुधानुचराश्चये।तथैवाप्सरसःसर्वाराजसीषूत्तमागतिः ४७ ॥

प० । गंधर्वाः गुह्यकाः यक्षाः विबुधानुचराः च ये तथा एव अप्सरसः सर्वाः राजसीषु उत्तमा गतिः ॥

यो० । गंधर्वाः गुह्यकाः यक्षाः चपुनः ये विबुधानुचराः ते–तथा एव सर्वाः अप्सरसः एषा गतिः राजसीषु गतिषु उत्तमा ज्ञेया ॥

भा० । ता० । गंधर्व–गुह्यक–यक्ष (ये सबजातिविशेष) और देवताओं के अनुचर–और सम्पूर्ण अप्सरा ये सब राजसीगतियोंमें उत्तम राजसीगति जाननी अर्थात् ये सब अल्प रजोगुण से उत्पन्न होते हैं ४७ ॥

तापसायतयोविप्रायेचवैमानिकागणाः।नक्षत्राणिचदैत्याश्चप्रथमासात्विकीगतिः ४८

प० । तापसाः यतयः विप्राः ये च वैमानिकाः गणाः नक्षत्राणि च दैत्याः च प्रथमा सात्विकी गतिः ॥

यो० । तापसाः (वानप्रस्थाः) यतयः(भिक्षवः) ब्राह्मणाः–चपुनः ये वैमानिकागणाः ते नक्षत्राणि चपुनः दैत्याः एषा सात्विकीगतिःप्रथमाज्ञेया ॥

भा० । ता० । तपस्वी (वानप्रस्थ)संन्यासी–ब्राह्मण और पुष्पकआदि विमानमें विचरनेवाले, नक्षत्र–और दैत्य यहसात्विकीगति प्रथमजाननी–अर्थात् ये अल्पसत्वगुणसे उत्पन्नहोतेहैं ४८ ॥

यज्वानऋषयोदेवावेदाज्योतींषिवत्सराः।पितरश्चैवसाध्याश्चाद्वितीयासात्विकीगतिः ४९

प० । यज्वानः ऋषयः देवाः वेदाः ज्योतींषि वत्सराः पितरः च एव साध्याः च द्वितीया सात्विकी गतिः ॥

यो० । यज्वानः (यज्ञशीलाः) ऋषयः देवाः वेदाः ज्योतींषि वत्सराः पितरः चपुनः साध्याः–एषासात्विकीगतिः द्वितीया ज्ञेया ॥

भा० । ता० । यज्ञकरनेवाले ऋषि देवता और वेदके अभिमानी देवता जो इतिहासों में प्रसिद्ध हैं और ध्रुवआदिज्योति और वत्सराभिमानी देवता (जो इतिहासोंमें प्रसिद्धहैं) सोमपाआदि पितर साध्य (देवयोनिविशेष) यह सात्विकीगति द्वितीया (मध्यम) जाननी अर्थात् ये मध्यमसत्वगुण से उत्पन्नहोतेहैं ४९ ॥

ब्रह्माविश्वसृजोधर्मोमहानव्यक्तमेवच।उत्तमांसात्विकीमेतांगतिमाहुर्मनीषिणः ५० ॥

प० । ब्रह्मा विश्वसृजः धर्मः महान् अव्यक्तं एव च उत्तमां सात्विकीं एतां गतिं आहुः मनीषिणः ॥

यो० । ब्रह्मा–विश्वसृजः (मरीच्यादयः) महान् चपुनः अव्यक्तं एतांसात्विकींगतिं मनीषिणः उत्तमां आहुः ॥

भा० । ता० । ब्रह्मा–और मरीचिआदि विश्वकेरचनेवाले और देहधारीधर्म–महान् और अव्यक्त अर्थात् सांख्यशास्त्र में प्रसिद्ध ये दोनोंतत्व अथवा इनदोनों तत्वों के अधिष्ठाता दोनों देवता ये सब पंडितजनोंने सत्वगुणकी उत्तमगति कहेहैं अर्थात् उत्तमसत्वगुण से उत्पन्न होतेहैं ५० ॥

एषसर्वःसमुद्दिष्टस्त्रिप्रकारस्यकर्मणः।त्रिविधस्त्रिविधःकृत्स्नःसंसारःसार्वभौतिकः ५१॥

प० । एषः सर्वः समुद्दिष्टः त्रिप्रकारस्य कर्मणः त्रिविधः त्रिविधः कृत्स्नः संसारः सार्वभौतिकः ॥

यो० । त्रिप्रकारस्यकर्मणः एषः सर्वः त्रिविधः त्रिविधः कृत्स्नः सार्वभौतिकः संसारः समुद्दिष्टः–(वर्णितः) ॥

भा० । तीनप्रकारके कर्मका जो तीनप्रकारका फल और उस तीनप्रकारके फलका जो तीनप्रकार का सबप्राणियों का यह संसार वह तुमकोकहा ॥

ता० । मन–वाणी–देह–भेदसे उत्पन्नहुये कर्मका त्रिविधफल अर्थात् सत्वगुण–रजोगुण–तमोगुणके भेदसे तीनप्रकार के फलका पुनः प्रथम मध्यम उत्तम भेदसे तीनप्रकार की जो गति विशेष अर्थात् सम्पूर्ण प्राणियोंके भोगनेयोग्य सम्पूर्ण संसार है वह निश्शेषरूपसे तुमकोकहा–और जोगति यहांपर नहींकहीगई वेभी जाननी क्योंकि पूर्वोक्तगति दिखानेमात्रहै अर्थात् अन्यगतियोंकी भी उपलक्षक है ५१ ॥

इन्द्रियाणांप्रसंगेनधर्मस्यासेवनेनच।पापान्संयान्तिसंसारानविद्वांसोनराधमाः ५२ ॥

प० । इंद्रियाणां प्रसंगेन धर्मस्य असेवनेन च पापान् संयांति संसारान् अविद्वांसः नराधमाः ॥

यो० । अविद्वांसः नराधमाः इंद्रियाणां प्रसंगेन चपुनः धर्मस्य असेवनेन पापान् संसारान् संयांति ॥

भा० । ता० । मनुष्यों में नीच और मूर्खजन विषयोंमें इंद्रियोंके प्रसंगसे अर्थात् निषिद्धके आचरणसे और धर्मके न करनेसे निंदितगतिको प्राप्तहोतेहैं ५२ ॥

यांयांयोनिंतुजीवोऽयंयेनयेनेहकर्मणा।क्रमशोयातिलोकेऽस्मिंस्तत्तत्सर्वंनिबोधत ५३ ॥

प० । यां यां योनिं तु जीवः अयं येन येन इह कर्मणा क्रमशः याति लोके अस्मिन् तत् तत् सर्वं निबोधत ॥

यो० । अयं जीवः इह (संसारे) क्रमेन येन येन कर्मणा यां यां योनिं–अस्मिन् लोके याति तत् तत् सर्वं यूयं निबोधत (शृणुत) ॥

भा० । ता० । यहजीव इसलोक में कियेहुये कर्मोंसे जिस जिस योनिको जगत्में प्राप्त होता है–उस २ कर्मको और योनिको तुम सुनो ५३ ॥

बहून्वर्षगणान्घोरान्नरकान्प्राप्यतत्क्षयात्।संसारान्प्रतिपद्यन्तेमहापातकिनस्त्विमान् ५४

प०। बहून् वर्षगणान् घोरान् नरकान् प्राप्य तत्क्षयात् संसारान् प्रतिपद्यन्ते महापातकिनः तु इमान् ॥

यो० । महापातकिनः इमान् घोरान् नरकान् बहून् वर्षगणान् प्राप्य–तत्क्षयात् (नरकभोग्यकर्मनाशात्) इमान् संसारान् (जन्मविशेषान्) प्रतिपद्यंते (प्राप्नुवंति) ॥

भा०। ता०। संपूर्ण महापातकी बहुतवर्षोंतक घोरनरकोंकोप्राप्तहोकर अर्थात् घोरनरकोंकोभोगकर इन (जो आगे कहेंगे) जन्मोंको उस दूषितकर्मके नाशहोनेपर प्राप्तहोतेहैं अर्थात् इन दुष्टयोनियोंमें जन्मतेहैं ५४ ॥

श्वसूकरखरोष्ट्राणांगोजाविमृगपक्षिणाम्। चण्डालपुक्कसानांचब्रह्महायोनिमृच्छति ५५॥

प० । श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणाम् चंडालपुक्कसानां चँ ब्रह्महा योनिं ऋच्छति ॥

यो० । ब्रह्महा श्वसूकरखरोष्ट्राणां–गोजाविमृगपक्षिणां–चपुनः चंडालपुक्कसानां योनिं ऋच्छति (प्राप्नोति) ॥

भा० । ता० । ब्रह्महत्यारा–कुत्ता–सूकर–गर्दभ–ऊंट–गौ–अजा (बकरी) मृग–पक्षी–और चांडाल–पुक्कस (जो निषादसे शूद्रामें पैदाहो) इनकी योनिको प्राप्तहोताहै–और इनमें भी जैसापाप देश, काल, होताहै वैसीही योनि क्रमसे मिलतीहै ५५ ॥

कृमिकीटपतङ्गानांविड्भुजांचैवपक्षिणाम् । हिंस्राणांचैवसत्त्वानांसुरापोब्राह्मणोव्रजेत् ५६ ॥

प०। कृमिकीटपतंगानां विड्भुजां चँ एवँ पक्षिणां हिंस्राणां चँ एवँ सत्त्वानां सुरापः ब्राह्मणः व्रजेत्॥

यो० । सुरापः ब्राह्मण कृमिकीटपतंगानां चपुनः विड्भुजां पक्षिणां चपुनः हिंस्राणां सत्त्वानां–योनिं व्रजेत् (गच्छेत्)॥

भा० । ता० । जो ब्राह्मण मदिराका पान करता है वह कृमि–कीट–पतंग–और विष्ठाके भक्षण करने वाले पक्षी–और हिंसाकरनेवाले जीव (सिंहआदि) इनकी योनिको प्राप्तहोताहै ५६ ॥

लूताहिसरटानांचतिरश्चांचाम्बुचारिणाम्।हिंस्राणांचपिशाचानांस्तेनोविप्रःसहस्रशः ५७ ॥

प० ।लूताहिसरटानां चँ तिरश्चां चँ अंबुचारिणाम् हिंस्राणां चँ पिशाचानां स्तेनः विप्रः सहस्रशः॥

यो० । स्तेनः विप्रः–लूताहिसरटानां–चपुनः अंबुचारिणां तिरश्चां (कुम्भीरादीनां) चपुनः हिंस्राणां पिशाचानां सहस्रशः योनिं–व्रजेत् ॥

भा० । ता० । जो ब्राह्मण चोरी करताहै वह–लूता (ऊर्णनाभी वा मकडी) सर्प सरट (करकेंटा) और जलमें विचरनेवाले तिर्यक् (कुम्भीरआदि तिरछीयोनि) और हिंसाकरनेवाले पिशाच आदि–इनकी योनिको सहस्रोंवार प्राप्तहोताहै ५७ ॥

तृणगुल्मलतानांचक्रव्यादांदंष्ट्रिणामपि । क्रूरकर्मकृतांचैवशतशोगुरुतल्पगः ५८ ॥

प० । तृणगुल्मलतानां चँ क्रव्यादां दंष्ट्रिणां अँपि क्रूरकर्मकृतां चँ एवँ शतशः गुरुतल्पगः ॥

यो० । गुरुतल्पगः (गुरुस्त्रीगामी) तृणगुल्मलतानां–क्रव्यादां चपुनः दंष्ट्रिणां–चपुनः क्रूरकर्मकृतां–योनिं शतशः प्राप्नोति ॥

भा०। ता० । जो मनुष्य गुरुकी स्त्रीकेसंग गमनकरताहै वह दूर्वाआदि तृण–गुल्म (जिनपर प्रकांड डाले) नहींहोते और गिलोहआदि लता–और आम (कच्चा) मांसके भक्षक पक्षी (गीधआदि) और सिंहआदि दंष्ट्री (डाढवाले) जीव–और क्रूरकर्म करनेवाले व्याघ्रआदि–इनकी योनि को सैकडोंवार प्राप्तहोताहै ५८ ॥

हिंस्राभवन्तिक्रव्यादाःकृमयोऽभक्ष्यभक्षिणः।परस्परादिनःस्तेनाःप्रेतान्त्यस्त्रीनिषेविणः ५९

प० । हिंस्राः भवन्ति क्रव्यादाः कृमयः अभक्ष्यभक्षिणः परस्परादिनः स्तेनाः प्रेताः अन्त्यस्त्रीनिषेविणः ॥

यो० । ये हिंस्राः ते क्रव्यादाः ये अभक्ष्यभक्षिणः ते कृमयः—ये स्तेनाः ते परस्परादिनः ये अन्त्यस्त्रीनिषेविणः ते प्रेताः भवन्ति ॥

भा० । हिंसाकरनेवाले मनुष्य—क्रव्याद—और अभक्ष्य भक्षण करनेवाले—कृमि—और चौर—परस्पर मांस भक्षक—और चांडाल स्त्रियोंके गामी प्रेत होतेहैं ॥

ता० । जो मनुष्य हिंसकहैं अर्थात् प्राणियोंकी हिंसाकरनेमेंही जिनका स्वभाव होताहै वे आम (कच्चे) मांसको भक्षणकरनेवाले (मार्जारआदि) होतेहैं—और जो अभक्ष्य वस्तुका भक्षण करतेहैं वे कृमि(सूक्ष्म) होतेहैं—जो महापातकियोंसे भिन्न चोरहोते हैं वे परस्परके मांसभक्षक होते हैं—और जो चांडालकी स्त्रीकेसंग गमनकरतेहैं वे प्रेतहोतेहैं—इसश्लोकके—प्रेतान्त्यस्त्रीनिषेविणः—इसपदमें व्याकरणकीरीतिसे—प्रेताअन्त्यस्त्रीनिषेविणः—यहपदहोना चाहताथा—परन्तु स्मृतियोंकोभी वेदकीतुल्यता है इससे सबविधि छन्दमें विकल्पसे होतीहैं इस वचनकी महिमासे विसर्गवायका लोपहोनेपर भी (अकःसवर्णेदीर्घः) इससूत्रसे दीर्घहोजाता है इससे प्रेतान्त्यस्त्रीनिषेविणः यहपद भी शुद्धबन सकताहै ५९ ॥

संयोगंपतितैर्गत्वापरस्यैवचयोषितम् । अपहृत्यचविप्रस्वंभवतिब्रह्मराक्षसः ६० ॥

प० । संयोगं पतितैः गत्वा परस्य एव च योषितम् अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः ॥

यो० । पतितैःसह संयोगं चपुनः परस्य योषितं—गत्वा—चपुनः ब्रह्मस्वं अपहृत्य—ब्रह्मराक्षसः भवति ॥

भा० । ता० । जितने समयमें पतितोंके संयोगसे पतित होताहै उतने समय तक ब्रह्महत्यारे आदि चारोंका संसर्ग करके और अन्यकी स्त्रीका संगकरके और सुवर्ण से अन्य ब्राह्मणके धनको चुराकर ब्रह्मराक्षस होताहै अर्थात् इनमेंसे एक २ कर्मकरने से भी ब्रह्मराक्षसकी योनि होतीहै ६० ॥

मणिमुक्ताप्रवालानिहृत्वालोभेनमानवः। विविधानिचरत्नानिजायतेहेमकर्तृषु ६१ ॥

प० । मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः विविधानि च रत्नानि जायते हेमकर्तृषु ॥

यो० । मानवः लोभेन मणिमुक्ताप्रवालानि—चपुनः विविधानि रत्नानि हृत्वा—हेमकर्तृषु जायते ॥

भा० । ता० । मनुष्य—लोभसे माणिक्य आदि मणि और मोती मूंगा और नानाप्रकार के रत्न (वैडूर्य हीरा आदि) हरके अर्थात् मणि आदि की चोरी करके हेमकर्त्ता (सुनार) ओंकी योनिमें पैदा होताहै और कोई पंडित हेमकर्त्ता पदसे हेमकार पक्षी लेतेहैं ६१ ॥

धान्यंहृत्वाभवत्याखुःकांस्यंहंसोजलंप्लवः।मधुदंशःपयःकाकोरसंश्वानकुलोघृतम् ६२ ॥

प०। धान्यं हृत्वा भवति आखुः कांस्यं हंसः जलं प्लवः मधु दंशः पयः काकः रसं श्वा नकुलः घृतम् ॥

यो० । धान्यं हृत्वा आखुः, कांस्यं हृत्वा हंसः, जलंहृत्वा प्लवः—मधु हृत्वा दंशः—पयः हृत्वा काकः—रसंहृत्वाश्वा—घृतं हृत्वा नकुलः—भवति—इतिसर्वत्रयोज्यम्—

भा० । ता० । अन्नकी चोरीकरनेवाला मनुष्य मूषक और कांसीकी चोरीकरनेवालाहंस, जलकी चोरीकरनेवाला प्लव (मुर्गाई) मधु (सहत) की चोरीकरनेवालादंश (डांस) और दूधकी चोरी करनेवाला काक—और लवणादिसे भिन्नरसकी चोरीकरनेवाला श्वा (कुत्ता) घृतकीचोरीकरनेवाला नकुल होताहै ६२ ॥

---

१ सर्वेविधयःछंदसिविकल्प्यंते ॥

मांसंगृध्रोवपांमद्गुस्तैलंतैलपकःखगः।चीरीवाकस्तुलवणंबलाकाशकुनिर्दधि ६३ ॥

प० । मांसं गृध्रः वपां मद्गुः तैलं तैलपकः खगः चीरीवाकः तु लवणं बलाका शकुनिः दधि ॥

यो० । मांसं हृत्वा गृध्रः वपांहृत्वा मद्गुः, तैलंहृत्वा तैलपकःखगः–लवणंहृत्वा चीरीवाकः दधिहृत्वा बलाका शकुनिः जायते ॥

भा० । ता० । मांसकी चोरीकरनेवाला मनुष्य गीधहोताहै –और वपाकी चोरीकरनेवाला मद्गु (एकजलचरजीव) और तैलकी चोरीकरनेवाला तैलपकनामपक्षी–और लवणकी चोरीकरनेवाला चीरीवाक (एकऊंचेस्वर करनेवाला कीट) और दहीकी चोरीकरनेवाला बलाकापक्षीहोताहै ६३ ॥

कौशेयंतित्तिरिर्हत्वाक्षौमंहत्वातुदर्दुरः।कार्पासतान्तवंक्रौञ्चोगोधागांवाग्गुदोगुडम् ६४

प०। कौशेयं तित्तिरिः हृत्वा क्षौमं हृत्वा तु दर्दुरः कार्पासतांतवं क्रौंचः गोधा गां वाग्गुदः गुडम्॥

यो०। कौशेयं हृत्वा तित्तिरिः, क्षौमंहृत्वादर्दुरः, कार्पासतान्तवंहृत्वा क्रौंचः, गांहृत्वागोधा, गुडंहृत्वा वाग्गुदः जायते॥

भा० । ता० । रेशम के वस्त्रको चुराकर तीतर, और क्षौमके वस्त्रको चुराकर मेंडक, और कपास के वस्त्रको चुराकर क्रौंच, और गौको चुराकर गोधा (गोह) और गुडकोचुराकर वाग्गुदनामकापक्षी होताहै जिसको खुटबढइया कहते हैं ६४ ॥

छुच्छुन्दरिःशुभान्गन्धान्पत्रशाकंतुबर्हिणः । श्वाविल्कृतान्नंविविधमकृतान्नंतुशल्यकः ६५ ॥

प० । छुच्छुंदरिः शुभान् गंधान् पत्रशाकं तु बर्हिणः श्वावित् कृतान्नं विविधं अकृतान्नं तु शल्यकः॥

यो० । शुभान् गंधान् हृत्वा छुच्छुंदरिः पत्रशाकं हृत्वा बर्हिणः–विविधं कृतान्नं हृत्वा श्वावित्–अकृतान्नं तु हृत्वा शल्यकः जायते ॥

भा० । ता० । कस्तूरीआदि सुगंधिद्रव्योंकी चोरीकरनेवाला छुच्छुंदरी होताहै–वास्तूक (बथुआ) आदि पत्तोंका शाक चुरानेवाला मोर–नानाप्रकार का कृतान्न (बनाहुआ मोदकआदि भोजन) को चुरानेवाला–श्वावित्–और अकृतान्न (कच्चाअन्न) को चुरानेवाला शल्यक (शेह) होता है ६५ ॥

बकोभवतिहृत्वाग्निंगृहकारीह्युपस्करम् । रक्तानिहृत्वावासांसिजायतेजीवजीवकः ६६ ॥

प० । बकः भवति हृत्वा अग्निं गृहकारी हि उपस्करं रक्तानि हृत्वा वासांसि जायते जीवजीवकः ॥

यो० । अग्निं हृत्वा बकः भवति– उपस्करं हृत्वा गृहकारी– रक्तानि वासांसि हृत्वा जीव जीवकः– जायते ॥

भा० । ता० । अग्निकोचुरानेवालाबक (बगला) होताहै–और घरकेउपस्कर (शूर्पमुशलआदि) का चुरानेवाला गृहकारी होताहै अर्थात् भित्तिआदि में मिट्टीसे घरबनानेवाला पंखोंसे युक्त वह कीट होता है जिसे भंजनहारीकहतेहैं और कुसुंभआदिसेरँगेहुये रक्तवस्त्रोंके चुरानेवाला जीवजीवक(चकोर) पक्षी होताहै ६६ ॥

वृकोमृगेभंव्याघ्रोऽश्वंफलमूलंतुमर्कटः । स्त्रीमृक्षःस्तोककोवारियानान्युष्ट्रःपशूनजः ६७ ॥

प० । वृकः मृगेभं व्याघ्रः अश्वं फलमूलं तु मर्कटः स्त्रीं ऋक्षः स्तोककः वारि यानानि उष्ट्रः पशून् अजः ॥

यो० । मृगेभं हृत्वा वृकः–अश्वं हृत्वा व्याघ्रः–फलमूलं हृत्वा मर्कटः– स्त्रींहृत्वा ऋक्षः–वारिहृत्वा स्तोककः–यानानि हृत्वा उष्ट्रः–पशून्हृत्वा अजः—जायते ॥

भा० । ता० । मृग और हाथीकोचुराकर वृक (भिडा) होताहै—और घोड़ेकोचुरानेवाला व्याघ्र होताहै और फलमूल चुराकर वानरहोता है—स्त्रीको चुरानेवाला रीछ होताहै—जलको चुरानेवाला स्तोकक (चातक) होताहै—और यान (रथआदि) का चोर ऊंटहोताहै—और पशुओंकी चोरीकरने वाला छाग (बकरी) होताहै ६७ ॥

यद्वातद्वापरद्रव्यमपहृत्यबलान्नरः । अवश्यंयातितिर्यक्त्वंजग्ध्वाचैवाहुतंहविः ६८ ॥

प० । यत् वा तत् वा परद्रव्यं अपहृत्य बलात् नरः अवश्यं याति तिर्यक्त्वं जग्ध्वा च एव अहुतं हविः ॥

यो० । नरः यद्वा तद्वा (असारंअपि) परद्रव्यं बलात् अपहृत्य—चपुनः अहुतं हविः जग्ध्वा अवश्यं तिर्यक्त्वं याति (प्राप्नोति) ॥

भा० । ता० । मनुष्य यद्वा तद्वा (तुच्छ) भी पराये द्रव्यको बलसे चुराकर—और नहीं किया है होमजिसका ऐसी हवि (साकल्य) का भक्षणकरके अवश्य तिरछी (सर्पआदि) योनिको प्राप्तहोता है ६८ ॥

स्त्रियोऽप्येतेनकल्पेनहृत्वादोषमवाप्नुयुः । एतेषामेवजन्तूनांभार्यात्वमुपयान्तिताः ६९॥

प० । स्त्रियः अपि एतेन कल्पेन हृत्वा दोषं अवाप्नुयुः एतेषां एव जंतूनां भार्यात्वं उपयांति ताः ॥

यो० । स्त्रियः अपि एतेन कल्पेन परद्रव्यं हृत्वा दोषं अवाप्नुयुः—ताः स्त्रियः एतेषां एव जन्तूनां भार्यात्वं उपयांति (प्राप्नुवंति) ॥

भा० । ता० । स्त्रीभी अपनीइच्छासे परके धनआदिको चुराकर दोषकोप्राप्तहोती हैं और उनपापों से वे स्त्री इनही पूर्वोक्त जीवोंकी भार्या होतीहैं ६९ ॥

स्वेभ्यःस्वेभ्यस्तुकर्मभ्यश्च्युतावर्णाह्यनापदि । पापान्संसृत्यसंसारान्प्रेष्यतांयान्तिशत्रुषु ७०

प० । स्वेभ्यः स्वेभ्यः तु कर्मभ्यः च्युताः वर्णाः हि अनापदि पापान् संसृत्य संसारान् प्रेष्यतां यांति शत्रुषु ॥

यो० । स्वेभ्यः स्वेभ्यः कर्मभ्यः अनापदि च्युताः वर्णाः (ब्राह्मणादयः) पापान् संसारान् संसृत्य—शत्रुषु प्रेष्यतां यांति ॥

भा० । ता० । विना आपत्काल के अपने २ कर्मोंसे च्युत (गिरनेवाले) ब्राह्मणआदि चारोंवर्ण निंदितयोनियों को प्राप्तहोकर फिर जन्मांतरमें शत्रुओंके सेवक (नौकर) होतेहैं ७० ॥

वान्ताश्युल्कामुखःप्रेतोविप्रोधर्मात्स्वकाच्च्युतः । अमेध्यकुणपाशीचक्षत्रियःकटपूतनः ७१ ॥

प० । वांताशी उल्कामुखः प्रेतः विप्रः धर्मात् स्वकात् च्युतः अमेध्यकुणपाशी च क्षत्रियः कटपूतनः ॥

यो० । स्वकात् धर्मात् च्युतः विप्रः वांताशी—उल्कामुखः प्रेतः जायते—चपुनः क्षत्रियः अमेध्यकुणपाशी कटपूतनः प्रेतो जायते ॥

भा० । ता० । अपने धर्मकात्यागी ब्राह्मण—वमनका भक्षणकरनेवाला और ज्वाला (अग्नि) के समान है मुख जिसका ऐसा प्रेत होताहै और अपनेधर्मका त्यागी क्षत्रिय—पुरीषशवभोजी कटपूतन नामका प्रेत होताहै ७१ ॥

मैत्राक्षज्योतिकःप्रेतोवैश्योभवतिपूयभुक् । चैलाशकश्चभवतिशूद्रोधर्मात्स्वकाच्च्युतः ७२ ॥

प० । मैत्राक्षज्योतिकः प्रेतः वैश्यः भवति पूयभुक् चैलाशकः च भवति शूद्रः धर्मात् स्वकात् च्युतः ॥

यो० । स्वकात् धर्मात् च्युतः वैश्यः पूयभुक् मैत्राक्षज्योतिकः प्रेतः भवति चपुनः स्वकात् धर्मात् च्युतः शूद्रः चैलाशकः प्रेतः भवति ॥

भा० । अपने धर्मसे भ्रष्ट वैश्य पूयकाभक्षक–मैत्राक्षज्योतिक नाम प्रेतहोताहै और अपने धर्मसे भ्रष्ट शूद्र तो चैलाशकनामका प्रेतहोताहै ॥

ता० । अपने कर्मोंसे च्युत (भ्रष्ट) वैश्य पूय (राध) का भक्षक जन्मान्तरमें मैत्राक्ष ज्योतिक नाम प्रेतहोताहै अर्थात् मैत्र (गुदा) में है ज्योतिःप्रकाश जिसका ऐसा प्रेतबनताहै–पृषोदरादि होनेसे ज्योतिष्शब्दके षकारका लोपहोताहै और अपने कर्मोंसे भ्रष्टहुआ शूद्र तो चैलाशकनामका प्रेत होताहै अर्थात् चैल (वस्त्र) संबन्धी यूका (जूं) के भक्षणकरनेवाला प्रेत बनताहै–गोविंदराजने तो चैलाशकनामका कीटकहाहै वह ठीकनहीं है क्योंकि प्रेतनामके प्राणियोंकाही प्रकरणहै ७२ ॥

यथायथानिषेवन्तेविषयान्विषयात्मकाः । तथातथाकुशलतातेषांतेषूपजायते ७३ ॥

प० । यथा यथा निषेवन्ते विषयान् विषयात्मकाः तथा तथा कुशलता तेषां तेषु उपजायते ॥

यो० । विषयात्मकाः पुरुषाः यथा यथा विषयान् निषेवंते तथा तथा तेषां तेषु कुशलता उपजायते ॥

भा० । ता० । विषयोंमें लोलुप मनुष्य जैसे जैसे विषयोंको भोगते हैं तैसेही तैसे उनविषयोंमें उनकीकुशलता (अत्यन्तरुचि) होतीजातीहै अर्थात् विषयोंका सेवनहीविषयोंमें रुचिकोबढ़ाताहै७३॥

तेऽभ्यासात्कर्मणांतेषांपापानामल्पबुद्धयः।संप्राप्नुवन्तिदुःखानितासुतास्विहयोनिषु ७४ ॥

प० । ते अभ्यासात् कर्मणां तेषां पापानां अल्पबुद्धयः संप्राप्नुवंति दुःखानि तासु तासु इह योनिषु ॥

यो० । अल्पबुद्धयः ते (पुरुषाः) तेषां पापानां कर्मणां अभ्यासात् तासु तासु योनिषु इह (संसारे) दुःखानि संप्राप्नुवंति ॥

भा० । ता० । फिर अल्पबुद्धि वे मनुष्य उन पापजनक कर्मोंके अभ्याससे अर्थात् वारंवार करनेसे तिन२ योनियोंमें अर्थात् निंदित, अतिनिंदित, और अत्यन्त निंदित, तिर्य्यक्आदि योनियोंमें दुःखों को भोगतेहैं ७४ ॥

तामिस्रादिषुचोग्रेषुनरकेषुविवर्तनम्।असिपत्रवनादीनिबन्धनच्छेदनानिच ७५ ॥

प० । तामिस्रादिषु च उग्रेषु नरकेषु विवर्त्तनं असिपत्रवनादीनि बंधनच्छेदनानि च ॥

यो० । उग्रेषु तामिस्रादिषु नरकेषु विवर्त्तनं चपुनः असिपत्रवनादीनि, बन्धनच्छेदनानि–(संप्राप्नुवन्ति) एतत् पदं उत्तरत्राप्यनुवर्त्तनीयम् ॥

भा० । ता० । तामिस्रआदि घोरनरकोंमें दुःखोंको और असिपत्र वनआदि नरकोंको और बंधन और छेदनके दुःखोंको प्राप्तहोतेहैं–अर्थात् निषिद्ध विषयोंके भोगनेसे इनदुःखोंको भोगतेहैं ७५ ॥

विविधाश्चैवसंपीडाःकाकोलूकैश्चभक्षणम् ।करम्भवालुकातापान्कुम्भीपाकांश्चदारुणान् ७६

प० । विविधाः च एव संपीडाः काकोलूकैः च भक्षणं करंभवालुकातापान् कुंभीपाकान् च दारुणान् ॥

यो० । चपुनः विविधाः संपीडाः चपुनः काकोलूकैः भक्षणं करंभवालुकातापान् चपुनः दारुणान् कुंभीपाकान् (नरकान्) संप्राप्नुवन्ति ॥

भा० । ता० । अनेकप्रकारकी अत्यन्त पीडा काक और उलूकोंसे देहका भक्षण और तपेहुये बालूमें ताप और कुम्भीपाकआदि दारुण नरक–इनको प्राप्तहोतेहैं ७६ ॥

संभवांश्चवियोनीषुदुःखप्रायासुनित्यशः।शीतातपाभिघातांश्चविविधानिभयानिच७७

प० । संभवान् चँ वियोनीषुँ दुःखप्रायाँसु नित्यशः शीतातपाभिघातान् चँ विविधानि भयानि चँ ॥

यो० । चपुनः दुःखप्रायासु वियोनीषु नित्यशः सम्भवान् चपुनः शीतातपाभिघातान् चपुनः विविधानि भयानि संप्राप्नुवन्ति ॥

भा० । ता० । और दुःखहै बहुधा जिनमें ऐसी तिरछीयोनियोंमें जन्मोंको और शीत और आतपआदिके दुःखोंको और अनेकप्रकारके भयको प्राप्तहोतेहैं ७७ ॥

असकृद्गर्भवासेषुवासंजन्मचदारुणम् । बन्धनानिचकाष्ठानिपरप्रेष्यत्वमेवच७८ ॥

प० । असकृत् गर्भवासेषु वासं जन्म चँ दारुणं बंधनानि चँ काष्ठानि परप्रेष्यत्वं एवँ चँ ॥

यो० । असकृत् गर्भवासेषु वासं चपुनः दारुणं जन्म संप्राप्नुवंति चपुनः उत्पन्नाः बंधनानि काष्ठानि चपुनः परप्रेष्यत्वं संप्राप्नुवन्ति ॥

भा० । ता० । पुनः पुनः गर्भस्थानों में और दारुण दुःखके देनेवाले योनियन्त्रसे जन्मको और उत्पन्नभयेपीछे काष्ठकी शृंखलाआदिसे बन्धन दुःखोंको—और पराये दासभावको प्राप्तहोतेहैं ७८ ॥

बन्धुप्रियवियोगांश्चसंवासंचैवदुर्जनैः।द्रव्यार्जनंचनाशंचमित्रामित्रस्यचार्जनम् ७९॥

प०। बन्धुप्रियवियोगान् चँ संवासं चँ एवँ दुर्जनैः द्रव्योर्जनं चँ नाशं चँ मित्रामित्रस्य चँ अर्जनम् ॥

यो० । बंधुप्रियवियोगान् चपुनः दुर्जनैःसह संवासं द्रव्यार्जनं चपुनः नाशं चपुनः मित्रामित्रस्य अर्जनं (संप्राप्नुवन्ति) ॥

भा० । ता० । बांधव—और प्यारोंके वियोगोंको और दुर्जनोंके संग सहवासको द्रव्यके संचयमें परिश्रम और द्रव्यके नाशसे दुःखको और कष्टसे मित्रकीप्राप्ति और शत्रुकी प्रकटताको विषयोंमें आसक्त मनुष्य प्राप्तहोतेहैं ७९ ॥

जरांचैवाप्रतीकारांव्याधिभिश्चोपपीडनम् । क्लेशांश्चविविधांस्तांस्तान्मृत्युमेवचदुर्जयम् ८०॥

प० । जरां चँ एवँ अप्रतीकारां व्याधिभिः चँ उपपीडनं क्लेशान् चँ विविधान् तान् तान् मृत्युं एवँ चँ दुर्जयम् ॥

यो० । अप्रतीकारां जरां चपुनः व्याधिभिः उपपीडनं चपुनः तान् तान् विविधान् क्लेशान् चपुनः दुर्जयं मृत्युं संप्राप्नुवन्ति ॥

भा० । ता० । जिसका प्रतीकार (चिकित्सा) नहीं है उसवृद्ध अवस्थाको और रोगोंसे पैदाहुई पीडाको और क्षुधा और पिपासाआदि तिन तिन नानाप्रकारके क्लेशोंको और दुर्जय(जो हटनसके) मृत्युको पूर्वोक्त मनुष्य प्राप्तहोते हैं ८० ॥

यादृशेनतुभावेनयद्यत्कर्मनिषेवते । तादृशेनशरीरेणतत्तत्फलमुपाश्नुते ८१ ॥

प० । यादृशेन तुँ भावेन यत् यत् कर्म निषेवते तादृशेन शरीरेण तत्तत्फलं उपाश्नुते ॥

यो० । मनुष्यः यादृशेन भावेन यत् यत् कर्म निषेवते तादृशेन शरीरेण तत्तत्फलं उपाश्नुते ॥

भा० । ता० । जैसे जैसे भावसे अर्थात् सत्वगुणी रजोगुणी तमोगुणी मनसे जिस जिस स्नान—

दान योगआदि कर्मको मनुष्य करताहै वैसेही वैसे शरीरको प्राप्तहोकर उस उसकर्मके फलको भोगताहै ८१ ॥

एषसर्वःसमुद्दिष्टःकर्मणांवःफलोदयः । नैश्श्रेयसकरंकर्मविप्रस्येदंनिबोधत ८२ ॥

प० । एषः सर्वः समुद्दिष्टः कर्मणां वः फलोदयः नैश्श्रेयसकरं कर्म विप्रस्य इदं निबोधत ॥

यो० । एषः सर्वकर्मणां फलोदयः वः (युष्माकं) समुद्दिष्टः विप्रस्य नैश्श्रेयसकरं कर्म इदं यूयं निबोधत ॥

भा० । ता० । कर्तव्य और निषिद्धकर्मोका यह सम्पूर्ण फलोदय तुमकोकहा–अब ब्राह्मणके निश्श्रेयस (कल्याणकारी) इसकर्मको तुमसुनो ८२ ॥

वेदाभ्यासस्तपोज्ञानमिंद्रियाणांचसंयमः । अहिंसागुरुसेवाचनिश्श्रेयसकरंपरम् ८३ ॥

प० । वेदाभ्यासः तपः ज्ञानं इंद्रियाणां च संयमः अहिंसा गुरुसेवा च निश्श्रेयसकरं परम् ॥

यो० । वेदाभ्यासः–तपः ज्ञानं चपुनः इंद्रियाणां संयमः चपुनः अहिंसा चपुनः गुरुसेवा एतत् सर्वं ब्राह्मणस्यपरं निःश्रेयसकरं (भवति) ॥

भा० । ता० । उपनिषद्आदि वेदका अर्थसहित अभ्यास तप (कृच्छ्रादि) ब्रह्मविषयकज्ञान–और इन्द्रियोंका संयम (रोकना) और अहिंसा (हिंसाकात्याग) गुरुकीसेवा येसब ब्राह्मणके अत्यन्त कल्याण करनेवाले कर्महैं ८३ ॥

सर्वेषामपिचैतेषांशुभानामिहकर्मणाम् । किञ्चिच्छ्रेयस्करतरंकर्मोक्तंपुरुषंप्रति ८४ ॥

प० । सर्वेषां अपि च एतेषां शुभानां इह कर्मणां किंचित् श्रेयस्करतरं कर्म उक्तं पुरुषं प्रति ॥

यो० । सर्वेषां अपि एतेषां शुभानां इह कर्मणां किंचित् कर्म पुरुषं प्रति श्रेयस्करतरं उक्तम् ॥

भा० । ता० । इसलोकमें कियेहुये इनसंपूर्ण कर्मोंके मध्यमें किंचित् कर्म अर्थात् एककर्म पुरुषकेलिये अत्यन्त कल्याण करनेवाला मनुआदि ऋषियोंने कहाहै ८४ ॥

सर्वेषामपिचैतेषामात्मज्ञानंपरंस्मृतम् । तद्ध्यग्र्यंसर्वविद्यानांप्राप्यतेह्यमृतंततः ८५ ॥

प० । सर्वेषां अपि च एतेषां आत्मज्ञानं परं स्मृतं तत् हि अग्र्यं सर्वविद्यानां प्राप्यते हि अमृतं ततः ॥

यो० । सर्वेषां अपि एतेषां मध्ये मन्वादिभिः आत्मज्ञानं परंस्मृतं हि (यतः) तत् सर्वविद्यानां अग्र्यं (मुख्यं) स्मृतं हि (यत) ततः (आत्मज्ञानात्) अमृतं (मोक्षः) प्राप्यते ॥

भा० । ता० । इनसम्पूर्ण वेदाभ्यासआदि छःओंके मध्यमें उपनिषदोंमें कहाहुआ आत्मज्ञान मनुआदिकोंने उत्तमकहाहै–और वहसम्पूर्ण विद्याओंमेंमुख्यहै क्योंकि उसीसे मोक्षकीप्राप्तिहोती है८५ ॥

षण्णामेषांतुसर्वेषांकर्मणांप्रेत्यचेहच । श्रेयस्करतरंज्ञेयंसर्वदाकर्मवैदिकम् ८६ ॥

प० । षण्णां एषां तु सर्वेषां कर्मणां प्रेत्य च इह च श्रेयस्करतरं ज्ञेयं सर्वदा कर्म वैदिकम् ॥

यो० । एषां सर्वेषां कर्मणां षण्णां मध्ये प्रेत्य चपुनः इह वैदिकं कर्म सर्वदा श्रेयस्करतरं ज्ञेयम् ॥

भा० । पूर्वोक्त इनसम्पूर्ण वेदाभ्यास आदि छःओंकर्मोंके मध्यमें वेदोक्तकर्म सदैव अत्यंत कल्याणकरनेवाला जानना ॥

ता० । इनपूर्वोक्त वेदाभ्यासआदि छःओंकर्मोंके मध्यमें वेदोक्तकर्म अर्थात् परमार्थ ज्ञान इसलोकमें और परलोक में अत्यन्तही कल्याणका करनेवाला जानना–पिछले श्लोकमें आत्मज्ञानको मोक्ष

का हेतुकहा है और इसश्लोक में इसलोक और परलोक के कल्याण का हेतुकहाहै—इससे पुनरुक्ति दोषनहीं है क्योंकि जो उपासक हैं वे संशय के उदयपर्यंतही उपासना ब्रह्मकी करते हैं—और जब संशय का नामनहींरहता उस समय उपासना करनेवाले का उपासना करने में कामचार होता है अर्थात् करै चाहै न करै—गोविंदराज तो इसश्लोकका यहअर्थकरतेहैं कि वेदाभ्यासआदि धर्मशास्त्रोक्त छःओंकर्मोंकी अपेक्षासे वैदिककर्म निश्श्रेयसका साधनहै—अर्थात् परलोकमें सबसेअधिक सुखकीर्त्ति और स्वर्गकोदेता है यह गोविंदराजका अर्थ ठीकनहीं है क्योंकि वेदाभ्यासआदि छःओंकर्म वेदोक्तहैं और उनछःओंमें कोई तो धर्मशास्त्रोक्तके अनुसारहो और कोई न होय यह नहींहोसक्ता—और एषां षण्णां यहनिर्धारणमें षष्ठीविभक्ति जो इसैपाणिनीयसूत्रके अनुसारहोतीहै वह किसप्रकारहोगी इससे जो अर्थ हमने कियाहै वही ठीकहै ८६ ॥

वैदिकेकर्मयोगेतुसार्वाण्येतान्यशेषतः।अन्तर्भवन्तिक्रमशस्तस्मिंस्तस्मिन्क्रियाविधौ ८७

प०। वैदिके कर्मयोगे तु सर्वाणि एतानि अशेषतः अंतर्भवंति क्रमशः तस्मिन् तस्मिन् क्रियाविधौ ॥

यो०। वैदिके कर्मयोगेतु अशेषतः एतानि सर्वाणि कर्माणि तस्मिन् तस्मिन् क्रियाविधौ क्रमशः अंतर्भवंति ॥

भा०। वेदोक्तकर्म के योगमें ये सम्पूर्ण निश्शेष (सब) कल्याण तिस २ उपासना की विधिमें क्रमसे अन्तर्गतहोजातेहैं अर्थात् परमात्मा की उपासना के ये सबअंग होजातेहैं ॥

ता०। और वेदोक्तकर्मयोगमें अर्थात् परमात्मा की उपासनारूप कर्म में ये सम्पूर्ण पूर्वश्लोकमें कहेहुये इसलोक और परलोकके सम्पूर्णकल्याण तिस२ उपासनाकीविधिमें क्रमसे अन्तर्गतहोजाते हैं अथवा इसश्लोक का यहअर्थहै कि वेदोक्त परमात्मा के ज्ञानमें वेदाभ्यासआदि छःओंकर्म अन्तर्गत होजातेहैं क्योंकि इसै श्रुतिमेंयहकहाहै कि वेदकापठन—यज्ञ—दान—और जो नष्ट न होसके ऐसा तप इनसे ब्राह्मणलोग ब्रह्मके जाननेकी इच्छाकरते हैं ८७ ॥

सुखाभ्युदयिकंचैवनैश्श्रेयसिकमेवच । प्रवृत्तंचनिवृत्तंचद्विविधंकर्मवैदिकम् ८८॥

प०। सुखाभ्युदयिकं च एव नैश्श्रेयसिकं एव च प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥

यो०। सुखाभ्युदयिकं चपुनः नैश्श्रेयसिकं प्रवृत्तं चपुनः निवृत्तं वैदिकं कर्म द्विविधं ज्ञेयम् ॥

भा०। जिससे सुखकी उत्पत्तिहो उसे सुखाभ्युदयिक और जिससे मोक्षकी उत्पत्तिहो उसे नैश्श्रेयसिक कहतेहैं इनदोभेदोंसे प्रवृत्त और निवृत्तरूप वैदिककर्म दोप्रकारकाहै ॥

ता०। वेदोक्तकर्म अर्थात् ज्योतिष्टोमआदियज्ञ और ब्रह्मोपासनादि—सुखाभ्युदयिक—और नैश्श्रेयसिक होनेसे प्रवृत्त और निवृत्तरूप भेदसे दोप्रकारका जानना उनदोनोंमें ज्योतिष्टोमआदि यज्ञको स्वर्गआदि सुखकी प्राप्तिका साधन और जन्ममरणका सम्पादकहोनेसे प्रवृत्तकर्मकहतेहैं और प्रतीक (ब्रह्म) उपासना को मोक्षकासाधन और जन्म मरणरूप संसारकी निवृत्तिका जनकहोनेसे निवृत्त कहतेहैं अर्थात् प्रवृत्ति के जनकको प्रवृत्त और निवृत्ति के जनकको निवृत्तकर्म कहतेहैं ८८ ॥

इहचामुत्रवाकाम्यंप्रवृत्तंकर्मकीर्त्यते। निष्कामंज्ञानपूर्वंतुनिवृत्तमुपदिश्यते ८९ ॥

---

१ यतश्चनिर्धारणं—जातिगुणक्रियासंज्ञाभिः समुदायादेकस्यपृथक्करणंनिर्धारणं—यतःततःषष्ठीस्यात् ॥

२ तमेतंवेदानुवचनेनब्राह्मणाविविदिषन्ति यज्ञेनदानेनतपसानाशकेन ॥

प० । इहँ चँ अमुत्रँ वाँ काम्यं प्रवृत्तं कर्मं कीर्त्यंते निष्कामं ज्ञानपूर्वं तुँ निवृत्तं उपदिश्यंते ॥

यो० । इह वा अमुत्र यत् कर्म काम्यं तत् प्रवृत्तं कीर्त्यते—यत् कर्म ज्ञानपूर्वं निष्कामं भवति तत् निवृत्तं उपदिश्यते—मन्वादिभिरितिशेषः ॥

भा० । इसलोकके वा परलोकके सुखकी जिससे इच्छाहो उसे प्रवृत्त और जिससे किसीफल की कामना न हो और ज्ञानही जिसमें प्रथमहो उसे निवृत्त—कर्म कहतेहैं ॥

ता० । इसलोककी कामनाका जो साधनहै जैसे कि वर्षाकाहेतु कारीरियागादि—और परलोक की कामनाका जो साधनहै जैसे स्वर्गका साधन ज्योतिष्टोम यज्ञआदि—इन दोनोंप्रकारके काम्यकर्मोको मनुआदिने प्रवृत्त कहाहै क्योंकि येदोनों संसारमें प्रवृत्तिकेही जनकहैं—और जोकर्म दृष्ट और अदृष्ट फल (इसलोक और परलोकके)की कामनासे रहितहै अर्थात् ब्रह्मज्ञान के अभ्याससे संसारकी निवृत्तिका हेतुहै अर्थात् जन्म मरणका निवर्तकहै उसको निवृत्त कहतेहैं ८९ ॥

प्रवृत्तंकर्मसंसेव्यदेवानामेतिसाम्यताम् । निवृत्तंसेवमानस्तुभूतान्यत्येतिपञ्चवै ९० ॥

प० । प्रवृत्तं कर्म संसेव्य देवानां एति साम्यताम् निवृत्तं सेवमानः तु भूतानि अत्येति पंच वै ॥

यो० । मनुष्यः प्रवृत्तं कर्म संसेव्य देवानां साम्यतां एति—निवृत्तं सेवमानः तु पुरुषः पंचभूतानि अत्येति ॥

भा० । प्रवृत्तकर्मकी सेवाकरके देवताओंकी तुल्यताको और निवृत्तकर्मकी सेवाकरके पांचोंभूतों के अवलंघन (मोक्ष) को प्राप्तहोताहै ॥

ता० । प्रवृत्तकर्मकी सेवाको मनुष्य भलीप्रकार करके देवताओं के समान गतिको प्राप्त होता है यहबात भी दिखानेमात्रही है क्योंकि अन्यफलकी अभिलाषासे कियेहुये प्रवृत्तकर्मसे फलान्तरकी भी प्राप्ति होसकती है—और निवृत्तकर्मका अभ्यास करताहुआ मनुष्य तो पांचोंभूतोंका अवलंघन करता है अर्थात् देहके उत्पादक पृथिवी जल तेज वायु आकाश—पांचोंसे पैदाहुये देहको धारण न करके मोक्षको प्राप्तहोताहै ९० ॥

सर्वभूतेषुचात्मानंसर्वभूतानिचात्मनि । समंपश्यन्नात्मयाजीस्वाराज्यमधिगच्छति ९१ ॥

प० । सर्वभूतेषु चँ आत्मानं सर्वभूतानि चँ आत्मनि समं पश्यन् आत्मयाजी स्वाराज्यं अधिगच्छति ॥

यो० । सर्वभूतेषु आत्मानं चपुनः सर्वभूतानि आत्मनि पश्यन् आत्मयाजी पुरुषः स्वाराज्यं (मोक्षं) अधिगच्छति (प्राप्नोति) ॥

भा० । जो सबभूतोंमें चैतन्यरूप ब्रह्म (आत्मा) को देखताहै और आत्मामें सबभूतोंको एकरस देखताहै आत्मयाग करनेवाला वह मनुष्य मोक्षको प्राप्तहोताहै ॥

ता० । स्थावर जंगमआदि सम्पूर्ण भूतोंमें जोमनुष्य इसप्रकार आत्माको देखताहै कि मैंही सब भूतोंमें आत्मरूपसे स्थितहूं अर्थात् सबमें ब्रह्मरूपसे व्यापकहूं—और जो आत्मामें इसप्रकार सबभूतोंको देखताहै कि परमाणुके समान है प्रमाण जिनका ऐसे सबभूत मुझ परमात्मामेंही स्थित हैं अर्थात् कारण और व्यापकरूप मेरेसे पृथक् नहीं हैं—निदान इसप्रकार जो जीवनपर्यंत एकरस देखताहै ब्रह्मार्पण[1] बुद्धिसे ज्योतिष्टोमआदि यज्ञको करताहुआ वह मनुष्य स्वाराज्य (ब्रह्मभाव) को

१ ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौब्रह्मणाहुतं—ब्रह्मैवतेनगंतव्यं ब्रह्मकर्मसमाधिना ॥

प्राप्तहोताहै अर्थात् (स्वेन ब्रह्मरूपेण राजते इति स्वराट् ब्रह्म तस्यभावः स्वाराज्यं ब्रह्मत्वं) जो अपनेहीरूपसे प्रकाशितरहै जिसको सूर्यआदि अन्य प्रकाशकी अपेक्षानहो उसे स्वराट् कहते हैं उसमें जो वर्तमान धर्म वह स्वाराज्य कहाता है ऐसा ब्रह्महा होसकताहै—अर्थात् ब्रह्मत्वको प्राप्त होता है जीवभावको छोडकर ब्रह्मभावको प्राप्तहोताहै क्योंकि इन श्रुतियों में यहलिखा है कि यह सम्पूर्ण जगत् ब्रह्मरूपहै इसकी शांत रूपहोकर उपासनाकरै—और जो सबभूतोंको आत्मामें और आत्माको सबभूतोंमें पूर्वोक्तरीतिसे देखताहै वह निंदाको प्राप्तनहींहोता ९१ ॥

यथोक्तान्यपिकर्माणिपरिहायद्विजोत्तमः।आत्मज्ञानेशमेचस्याद्वेदाभ्यासेचयत्नवान्९२॥

प० । यथोक्तानि अपि कर्माणि परिहाय द्विजोत्तमः आत्मज्ञाने शमे च स्यात् वेदाभ्यासे च यत्नवान् ॥

यो० । द्विजोत्तमः यथोक्तानि अपि कर्माणि परिहाय(त्यक्त्वा)आत्मज्ञाने–शमे–चपुनः वेदाभ्यासे–यत्नवान् स्यात् ॥

भा० । ब्राह्मण शास्त्रोक्त कर्मोंको त्यागकर भी–आत्मज्ञान–इन्द्रियोंकाजय–और वेदकाअभ्यास इनमें यत्नवान्हो अर्थात् विशेषकर इनमें तत्पर रहै ॥

ता० । ब्राह्मण शास्त्रोक्त अग्निहोत्रआदि कर्मोंको त्यागकर भी अर्थात् उनमेंही अत्यन्त आसक्त न होकर भी ब्रह्मकाध्यान और शम (इन्द्रियोंकापराजय) और उपनिषद्आदि वेदोंका अभ्यास–इन तीनोंमें यत्नवान्हो अर्थात् विशेषकर इनमेंही मनको लगावे–यहश्लोक इसलियेहै कि इनतीनोंको मोक्षका उपायहोनेसे विशेषकर इनकी रक्षाकरै और कुछ यहअभिप्राय नहीं है कि सर्वथा अग्निहोत्र आदिको छोडदे किन्तु निष्काम बुद्धिसे उनको भी करतारहै ९२ ॥

एतद्धिजन्मसाफल्यंब्राह्मणस्याविशेषतः।प्राप्यैतत्कृतकृत्योहिद्विजोभवतिनान्यथा ९३

प० । एतत् हि जन्मसाफल्यं ब्राह्मणस्य विशेषतः प्राप्य एतत् कृतकृत्यः हि द्विजः भवति न अन्यथा ॥

यो० । हि (यतः) ब्राह्मणस्य विशेषतः जन्मसाफल्यं एतत् भवति–अतः द्विजः एतत् प्राप्य हि (निश्चयेन) कृतकृत्यः (कृतार्थः) भवति–अन्यथा न भवति ॥

भा० । ता० । जिससे ब्राह्मणका जन्म साफल्य(जन्मकीसफलता) यही है कि वेदाभ्यासआदि में तत्पररहना–इससे द्विज इस (वेदाभ्यास) को प्राप्तहोकर अर्थात् करके कृतार्थहोताहै और अन्य प्रकारसे नहींहोता निदान ब्राह्मणके जन्मका फल वेदाभ्यासहीहै ९३ ॥

पितृदेवमनुष्याणांवेदश्चक्षुःसनातनम्।अशक्यंचाप्रमेयञ्चवेदशास्त्रमितिस्थितिः९४

प० । पितृदेवमनुष्याणां वेदः चक्षुः सनातनम् अशक्यं च अप्रमेयं च वेदशास्त्रं इति स्थितिः ॥

यो० । वेदः पितृदेवमनुष्याणां सनातनं चक्षुः भवति–अशक्यं–चपुनः अप्रमेयं वेदशास्त्रं इतिस्थितिः (शास्त्रव्यवस्था) अस्ति ॥

भा० । पितर देवता मनुष्य–इनकाचक्षुः (नेत्र) सनातन वेदहीहै–और वेदको कोई बनानहीं सक्ता और न प्रमाणकरसक्ता यही व्यवस्थाहै ॥

ता० । अब वेदसेही ब्रह्मजानना यह दिखानेकेलिये वेदकी प्रशंसाका वर्णनकरते हैं–कि–पितर

---

१ सर्वंखल्विदंब्रह्म–यजनादिभिः शांतउपासीत–यस्तुसर्वाणिभूतानि आत्मन्येवानुपश्यतिसर्वभूतेषुचात्मानं ततोनविजुगुप्सते ॥

देवता मनुष्य इनके हव्यकव्य अन्न दानआदि में वेदही चक्षुः (नेत्र) है अर्थात् वेदसेही इन हव्य आदिकों का ज्ञान होताहै—और वेदही सनातन (नाशरहित) है क्योंकि हव्यआदि के देनेमें वेदही प्रमाण है और जिन कव्यआदिकों का फल असंनिकृष्ट (अदृश्य) है उनमें नित्यरूप वेद के विना अन्यप्रमाण नहींहोसक्ता—और वेदशास्त्र अशक्यहै अर्थात् इसको कोई वनानहींसका अर्थात् अपौरुषेय है किसीपुरुषका कथित नहींहै—और वेदशास्त्र अप्रमेय है अर्थात् मीमांसा न्यायआदि शास्त्रों की इसे अपेक्षानहींहै इससे वेदकाअर्थ केवल उनसे नहींजानाजाताहै—यह व्यवस्थाहै—तिससे मीमांसा व्याकरणआदि अंगोंसे सर्व ब्रह्मरूप वेदकेअर्थको जाने ९४ ॥

यावेदबाह्याःस्मृतयोयाश्चकाश्चकुदृष्टयः। सर्वास्तानिष्फलाःप्रेत्यतमोनिष्ठाहिताःस्मृताः ९५

प० । याः वेदबाह्याः स्मृतयः याः च काः च कुदृष्टयः सर्वाः ताः निष्फलाः प्रेत्य तमोनिष्ठाः हि ताः स्मृताः ॥

यो० । याः स्मृतयः वेदबाह्याः—चपुनः याः काः कुदृष्टयः संति—तमोनिष्ठाः ताः सर्वाः प्रेत्य निष्फलाः स्मृताः मन्वादिभिः इतिशेषः ॥

भा० । जो स्मृति वेदबाह्य है और जो शास्त्र कुदृष्टिहैं वे सब परलोकमें निष्फल हैं क्योंकि मनु आदिकोंने उनको नरक का साधन कहाहै ॥

ता० । जिन स्मृतियों का मूल वेदनहींहै अर्थात् जो ऐसे २ आधुनिक वाक्यहैं कि चैत्यकीवंदना[1] से स्वर्गहोताहै और जो कुदृष्टिहैं अर्थात् असत्तर्क जिनकामूलहै और जो देवता अपूर्वआदिके निराकरण करनेवाले वेदसे विरुद्ध चार्वाकआदिके शास्त्र हैं वे सम्पूर्ण परलोकमें निष्फल हैं क्योंकि मनु आदिकों ने उनसबका फल नरककहाहै अर्थात् नरकके साधनहोनेसे वेदविरुद्धकर्मोंको न करै ९५॥

उत्पद्यन्तेच्यवन्तेचयान्यतोऽन्यानिकानिचित्।तान्यर्वाक्कालिकतयानिष्फलान्यनृतानिच ९६

प० । उत्पद्यंते च्यवंते च यानि अतः अन्यानि कानिचित् तानि अर्वाक्कालिकतया निष्फलानि अनृतानि च ॥

यो० । यानि कानिचित् अतः (वेदात्) अन्यानि शास्त्राणि संति—तानि अर्वाक्कालिकतया निष्फलानि चपुनः अनृतानि भवंति चपुनः उत्पद्यंते च्यवंते (नश्यंति) ॥

भा० । ता० । जो कुछ शास्त्र इसवेदके मूलसे अन्यहैं अर्थात् जिनमें वेदकामूल नहीं है—वे सब किसी न किसी पुरुषसे उत्पन्न होतेहैं और इसीसे शीघ्रनष्टहोजातेहैं और वे आधुनिकहोनेसे निष्फल और असत्य (झूंठे) रूपहोतेहैं और स्मृतिआदिकोंको तो वेदमूल होनेसेही प्रामाण्यहै ९६ ॥

चातुर्वर्ण्यंत्रयोलोकाश्चत्वारश्चाश्रमाःपृथक्।भूतंभव्यंभविष्यंचसर्ववेदात्प्रसिद्ध्यति ९७॥

प० । चातुर्वर्ण्यं त्रयः लोकाः चत्वारः च आश्रमाः पृथक् भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिद्ध्यति ॥

यो० । चातुर्वर्ण्यं—त्रयः लोकाः चत्वारः पृथक्आश्रमाः चपुनः भूतं भव्यं भविष्यं एतत्सर्वं वेदात् प्रसिद्ध्यति (प्रकटीभवति) ॥

भा० । चारोंवर्ण तीनोंलोक और पृथक् पृथक् चारोंआश्रम और भूत भविष्यत् वर्त्तमान ये सब वेदसेही सिद्धहोतेहैं ॥

---

१ चैत्यवंदनात्स्वर्गोभवति ॥

ता० । चारोंवर्ण वेदसेही प्रतीतहोतेहैं अर्थात् इसश्रुतिके अनुसार चारोंवर्णोंकी उत्पत्ति वेदसेही जानीजातीहै कि ब्राह्मण परमात्माके मुखसे क्षत्रियभुजासे वैश्यजंघाओंसे शूद्रपैरोंसे उत्पन्नहुआ—और इनके उपकारक स्वर्गआदि लोकभी वेदसेही प्रतीतहोतेहैं और ब्रह्मचर्यआदि चारोंआश्रम भी पृथक् पृथक् वेदसे जानेजातेहैं और भूत भविष्यत् वर्त्तमान ये सब वेदसे प्रतीतहोतेहैं—अर्थात् तीनोंकालों का फल इसे पूर्वोक्तरीतिके अनुसार वेदसे जानाजाताहै—कि अग्निमेंदीहुई आहुति सूर्यको पहुंचती है—सूर्यसे वृष्टि वृष्टिसे अन्न अन्नसे प्रजा होती है ९७ ॥

शब्दःस्पर्शश्चरूपंचरसोगंधश्चपंचमः । वेदादेवप्रसूयन्तेप्रसूतिगुणकर्मतः ९८॥

प० । शब्दः स्पर्शः च रूपं च रसः गंधः च पंचमः वेदात् एव प्रसूयंते प्रसूतिगुणकर्मतः ॥

यो० । शब्दः स्पर्शः रूपं रसः चपुनः पंचमः गंधः एते प्रसूतिगुणकर्मतः वेदात् एव प्रसूयंते ॥

भा० । ता० । शब्द—स्पर्श रूप रस और पांचवांगंध ये सबउत्पादक और सत्वगुण रजोगुण तमोगुण ये तीनोंगुण इनगुणोंके आधीन वेदोक्तकर्मकेहेतु होनेसे वेदसेही प्रसिद्धहोतेहैं अर्थात् जैसे जैसे शब्दादि विषयोंको मनुष्य सेवताहै वैसी वैसीही वेदोक्तकर्म में रुचिहोती है ९८ ॥

बिभर्तिसर्वभूतानिवेदशास्त्रंसनातनम् । तस्मादेतत्परंमन्येयज्जन्तोरस्यसाधनम् ९९॥

प० । बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनं तस्मात् एतत् परं मन्ये यत् जन्तोः अस्य साधनम् ॥

यो० । सनातनंवेदशास्त्रं सर्वभूतानि यस्मात् विभर्त्ति तस्मात् अस्यजंतोः एतत् (वेदशास्त्रं) परं साधनं अहं मन्ये ॥

भा० । जिससे यह सनातन वेदशास्त्र सम्पूर्णभूतोंकी धारणा करता है तिससे मैं यहमानताहूं कि यह वेदशास्त्र इसप्राणीके परमपुरुषार्थ (मोक्ष) का साधनहै ॥

ता० । जिससे सनातन (नित्य) यह वेदशास्त्र सम्पूर्णभूतोंको धारणाकरताहै क्योंकि इसब्राह्मण ग्रन्थसे यह प्रतीत होता है कि अग्निमें हविःका होम होताहै वह वेदोक्त अग्नि उसहविःको सूर्यको पहुंचातीहै सूर्य उसहविको जलरूपसे अपनी किरणोंद्वारा वर्षाताहै उसवर्षासे अन्नहोताहै उसअन्न से प्राणियोंकी उत्पत्ति और स्थिति होतीहै फिर व्रीहिआदि हविःहोती हैं—तिससे मैं यहमानताहूं कि वेदशास्त्र इसवेदोक्त कर्माधिकारी जन्तुका सर्वोत्तम पुरुषार्थ (मोक्ष) का साधनहै ९९ ॥

सेनापत्यंचराज्यंचदण्डनेतृत्वमेवच । सर्वलोकाधिपत्यंचवेदशास्त्रविदर्हति १००

प० । सेनापत्यं च राज्यं च दंडनेतृत्वं एव च सर्वलोकाधिपत्यं च वेदशास्त्रवित् अर्हति ॥

यो० । सेनापत्यं—राज्यं चपुनः दंडनेतृत्वं चपुनः सर्वलोकाधिपत्यं—एतत्सर्वं वेदशास्त्रवित् अर्हति ॥

भा० । ता० । सेनाकापति—राजा—दंडकादेनेवाला और संपूर्ण लोकोंका अधिपति—येसब वेदशास्त्रकेज्ञाताही होसकतेहैं क्योंकि वेदशास्त्रकाज्ञाताही इनपदवियोंका काम धर्म बुद्धि और न्यायसे करसकताहै इतर नहीं १०० ॥

---

१ ब्राह्मणोस्यमुखमासीत् बाहूराजन्यःकृतः ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोअजायत ॥

२ अग्नौप्रास्ताहुतिःसम्यक् आदित्यमुपतिष्ठते । आदित्याज्जायतेवृष्टिःवृष्टेरन्नंततःप्रजा ॥

३ हविरग्नौहूयतेसोग्निरादित्यमुपसर्पति वेदःतत्सूर्योरश्मिभिःवर्षति तेनान्नंभवति अथेहभूतानामुत्पत्तिस्थितिरित्येतिहविर्जायते ॥

यथाजातबलोवह्निर्दहत्यार्द्रानपिद्रुमान् । तथादहतिवेदज्ञःकर्मजंदोषमात्मनः १०१ ॥

प० । यथा जातबलः वह्निः दहति आर्द्रान् अपि द्रुमान् तथा दहति वेदज्ञः कर्मजं दोषं आत्मनः ॥

यो० । जातबलः वह्निः यथा आर्द्रान् अपि द्रुमान् दहति-तथा वेदज्ञः कर्मजं आत्मनः दोषं दहति ॥

भा० । ता० । उत्पन्न हुआहै बल जिसको ऐसी (वृद्ध) अग्नि आर्द्र (हरे) भी वृक्षोंको दग्ध कर देती है-इसप्रकार वेदकाज्ञाता भी निषिद्ध आचरणसे पैदाहुये अपने पापको भी दग्ध(नष्ट) करदेताहै-इससे वेदशास्त्र केवल स्वर्ग और मोक्षकाही हेतुनहीं है किन्तु निवृत्तिकाभी हेतुहै १०१॥

वेदशास्त्रार्थतत्त्वज्ञोयत्रतत्राश्रमेवसन् । इहैवलोकेतिष्ठन्सब्रह्मभूयायकल्पते १०२ ॥

प० । वेदशास्त्रार्थतत्त्वज्ञः यत्र तत्र आश्रमे वसन् इह एव लोके तिष्ठन् सः ब्रह्मभूयाय कल्पते ॥

यो० । यः वेदशास्त्रार्थतत्त्वज्ञ भवति-यत्रतत्र आश्रमे वसन् इह एव लोके तिष्ठन् सः ब्रह्मभूयाय कल्पते ॥

भा० । ता० । जो मनुष्य वेद-और वेदकेअर्थको जानता है वह मनुष्य नित्य और नैमित्तिक कर्मके करनेसे उत्पन्न ब्रह्मज्ञानके द्वारा जिसकिसी आश्रममें वसताहुआ और इसीलोकमें टिकता हुआ ब्रह्मज्ञानको प्राप्तहोताहै १०२ ॥

अज्ञेभ्योग्रन्थिनःश्रेष्ठाग्रन्थिभ्योधारिणोवराः।धारिभ्योज्ञानिनःश्रेष्ठाज्ञानिभ्योव्यवसायिनः १०३

प० । अज्ञेभ्यः ग्रंथिनः श्रेष्ठाः ग्रंथिभ्यः धारिणः वराः धारिभ्यः ज्ञानिनः श्रेष्ठाः ज्ञानिभ्यः व्यवसायिनः ॥

यो० । अज्ञेभ्यः ग्रंथिनः श्रेष्ठाः ग्रंथिभ्यः धारिणः वराः धारिभ्यः ज्ञानिनः-ज्ञानिभ्यः व्यवसायिनः श्रेष्ठाः भवंति ॥

भा० । अज्ञोंसे ग्रन्थोंके पाठक-और ग्रन्थियोंसे धारी और धारियोंसे ज्ञानी और ज्ञानियोंसे व्यवसायी (कर्मकेकर्ता) श्रेष्ठ होतेहैं ॥

ता० । जो यत्किंचित् अध्ययन करनेवालेहैं उनसे बडे२ ग्रंथोंके वे अध्ययन करनेवाले श्रेष्ठहोते हैं और जिनको पठितग्रन्थोंका यथार्थ ज्ञाननहींहोता और उनग्रंथियोंसे वेधारी श्रेष्ठहोते हैं जिनको पठित ग्रन्थका स्मरणरहताहै परन्तु अर्थज्ञान नहींहोता-और उनधारियोंसे वे श्रेष्ठहोते हैं जिनको पठितग्रन्थके अर्थकाभी ज्ञानहोताहै-परन्तु उसग्रन्थोक्त कर्मोंको जो नहीं करतेहों और उनज्ञानियोंसे वे व्यवसायी श्रेष्ठहोतेहैं जो ग्रन्थके अर्थको जानकर उसमें कहेहुये कर्मोंको भी करतेहैं १०३॥

तपोविद्याचविप्रस्यनिःश्रेयसकरंपरम् । तपसाकिल्बिषंहन्तिविद्ययाऽमृतमश्नुते १०४ ॥

प० । तपः विद्या च विप्रस्य निःश्रेयसकरं परं तपसा किल्बिषं हन्ति विद्यया अमृतं अश्नुते ॥

यो० । तपः विद्या एतत् उभयं विप्रस्य परं निःश्रेयसकरं भवति तपसा विप्रः किल्बिषं हंति-विद्यया अमृतं अश्नुते॥

भा० । कर्म और ब्रह्मज्ञान येदोनों ब्राह्मणके उत्तम मोक्षदाता हैं-और ब्राह्मण कर्मसे पापको नष्टकरताहै और ब्रह्मज्ञानसे मोक्षको प्राप्तहोताहै ॥

ता० । तप अर्थात् अपने धर्ममें प्रवृत्तहोकर आश्रम विहित कर्मको करना और विद्या (आत्मज्ञान) येदोनों ब्राह्मणके मोक्षसाधनहैं-उनदोनोंमें तपसे पापको नष्टकरताहै और ब्रह्मज्ञानसे मोक्ष को प्राप्तहोताहै अर्थात् तपकरनेसे पापनाश होनेपर शुद्ध अन्तःकरणमें उत्पन्नहुये ब्रह्मज्ञानकेद्वारा

मोक्षको प्राप्तहोताहै क्योंकि इस श्रुतिमें यहकहाहै कि विद्या ब्रह्मज्ञान इनदोनोंको ब्राह्मण एकबार जानकर और अविद्यासे मृत्युको अर्थात् मृत्युके दुःखदेनेवाले पापको तरकर अर्थात् नष्टकरके विद्या से मोक्षको प्राप्तहोताहै—इसी श्रुतिकाअर्थ मनुजीने इसश्लोकमें कहाहै १०४ ॥

प्रत्यक्षंचानुमानंचशास्त्रंचविविधागमम् । त्रयंसुविदितंकार्यंधर्मशुद्धिमभीप्सता १०५ ॥

प० । प्रत्यक्षं चँ अनुमानं चँ शास्त्रं चँ विविधागमं त्रयं सुविदितं कार्यं धर्मशुद्धिं अभीप्सता ॥

यो० । धर्मशुद्धिं अभीप्सता पुरुषेण प्रत्यक्षं-अनुमानं चपुनः विविधागमं शास्त्रं एतत् त्रयं सुविदितं कार्यं ॥

भा० । धर्मके स्वरूप ज्ञानकी इच्छावाले मनुष्यको येतीनों भलीप्रकार जानने कि प्रत्यक्ष, अनुमान, और अनेकप्रकारके धर्मआदिके बोधक आगम ॥

ता० । धर्मके तत्त्वज्ञानकी इच्छाकरनेवाला मनुष्य इनतीनोंको सुविदितकरै अर्थात् भलीप्रकार जाने कि प्रत्यक्ष (जो साक्षात् इन्द्रियोंसे जानाजाय) और अनुमान (अर्थात् हेतुसे साध्यकाज्ञान जैसे पर्वतमें धूमके देखनेसे अग्निका ज्ञान होताहै—और धर्मकासाधन विविध आगम और शास्त्र अर्थात् द्रव्य गुण, जाति, इनके तत्त्वज्ञानार्थ वेद और वेदमूलक धर्मशास्त्र और यही तीनप्रमाण अर्थात् प्रत्यक्ष अनुमान आगम मनुको अभीष्टहैं क्योंकि उपमान और अर्थापत्ति इनदोनोंका अनुमानमेंही अन्तरभावहै १०५ ॥

आर्षंधर्मोपदेशंचवेदशास्त्राऽविरोधिना । यस्तर्केणानुसंधत्तेसधर्मंवेदनेतरः १०६ ॥

प० । आर्षं धर्मोपदेशं चँ वेदशास्त्राऽविरोधिना यः तर्केण अनुसंधत्ते सः धर्मं वेद नँ इतरः ॥

यो० । यः आर्षं चपुनः धर्मोपदेशं वेदशास्त्राऽविरोधिना तर्केण अनुसन्धत्ते सः धर्मं वेद इतरः न वेद ॥

भा० । जो मनुष्य वेद और धर्मशास्त्रको वेदशास्त्रके अनुकूल तर्क (मीमांसा) से विचारताहै—वही धर्मको जानताहै इतर नहीं जानता ॥

ता० । जो मनुष्य ऋषियोंके देखेहुये वेदको और धर्मोपदेश (धर्मशास्त्र) को वेदशास्त्रके अविरोधी (अनुकूल) तर्कसे अर्थात् मीमांसादि न्यायसे अनुसन्धान (विचारना) करताहै वही मनुष्य धर्मको जानता है—और इतर मीमांसाका अनभिज्ञ नहीं जानता क्योंकि धर्ममें वेद करण है और मीमांसासे धर्मकी इति कर्त्तव्यता (करनेका प्रकार) जाना जाता है—क्योंकि भट्टवार्त्तिककारने इस वचनसे यहकहाहै—कि जब करणरूप वेदसे धर्मका प्रमाण होता है अर्थात् उसकी अवश्य कर्त्तव्यता प्रतीतहोतीहै उसमें इति कर्त्तव्यताभाग (करनेके प्रकारको) मीमांसा पूर्णकरदेतीहै १०६ ॥

नैश्श्रेयसमिदंकर्मयथोदितमशेषतः । मानवस्यास्यशास्त्रस्यरहस्यमुपदिश्यते १०७ ॥

प० । नैश्श्रेयसं इदं कर्म यथा उदितं अशेषतः मानवस्य अस्य शास्त्रस्य रहस्यं उपदिश्यते ॥

यो० । इदं नैश्श्रेयसंकर्म अशेषतः यथा उदितं अस्य मानवस्य शास्त्रस्य रहस्यं मया उपदिश्यते ॥

भा० । ता० । मोक्षका साधन यहसंपूर्ण कर्म यथार्थरीतिसे मैंनेकहा—अब इसमानवशास्त्रमें जो रहस्य (गुप्त) है उसका उपदेश करताहूं उसको तुमसुनो १०७ ॥

---

१ विद्यांचाविद्यांचयस्तद्वेदोभयंसह । अविद्ययामृत्युंतीर्त्वा विद्ययामृतमश्नुते ॥

२ धर्मेप्रमीयमाणेहि वेदेनकरणात्मना । इतिकर्त्तव्यताभागं मीमांसापूरयिष्यति ॥

अनाम्नातेषुधर्मेषुकथंस्यादितिचेद्भवेत् । यंशिष्टाब्राह्मणाब्रूयुःसधर्मःस्यादशंकितः १०८ ॥

प० । अनाम्नातेषु धर्मेषु कथं स्यात् इति चेत् भवेत् यं शिष्टाः ब्राह्मणाः ब्रूयुः सः धर्मः स्यात् अशंकितः ॥

यो० । चेत् (यदि) अनाम्नातेषु धर्मेषु कथं धर्मः स्यात् इति संशयःभवेत् तर्हि शिष्टाः ब्राह्मणाः यं ब्रूयुः सः अशंकितः धर्मःस्यात् ॥

भा० । ता० । जो धर्म सामान्यविधिसे प्राप्तहैं और विशेषकर इसशास्त्रमें वर्णन नहींकिये वे कर्म किसप्रकारकरने यदि यहसंशयहोय तो जिसधर्मको शिष्टब्राह्मणकहैं वहीनिश्चयसे धर्महोताहै १०८॥

धर्मेणाधिगतोयैस्तुवेदःसपरिबृंहणः । तेशिष्टाब्राह्मणाज्ञेयाःश्रुतिप्रत्यक्षहेतवः १०९ ॥

प० । धर्मेण अधिगतः यैः तु वेदः सपरिबृंहणः ते शिष्टाः ब्राह्मणाः ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ॥

यो० । यैः ब्राह्मणैः सपरिबृंहणः वेदः धर्मेण अधिगतः श्रुतिप्रत्यक्षहेतवः ते ब्राह्मणाः शिष्टाः ज्ञेयाः ॥

भा० । ता० । ब्रह्मचर्यआदि धर्मसे जिन ब्राह्मणों ने अंग—मीमांसा धर्मशास्त्र और पुराणसहित वेदको जाना है श्रुतिके प्रत्यक्ष अर्थके उपदेश करनेवाले वे ब्राह्मण शिष्टजानने अर्थात् उनको शिष्ट कहतेहैं १०९ ॥

दशावरावापरिषद्यंधर्मपरिकल्पयेत् ।त्र्यवरावाऽपिवृत्तस्थातंधर्मनविचालयेत् ११० ॥

प० । दशावरा वा परिषत् यं धर्मं परिकल्पयेत् त्र्यवरा वा अपि वृत्तस्था तं धर्मं न विचालयेत् ॥

यो० । वा दशावरा वा वृत्तस्था त्र्यवरा परिषत् यं धर्मं परिकल्पयेत् तं धर्मं न विचालयेत् (न विसंवदेत्) ॥

भा० । ता० कमसेकम दशहैं विद्वानजिसमें वा कमसेकम तीनहैं सदाचारी पंडित जिसमें ऐसी सभा जिस धर्म का निश्चयकरदे उसधर्मको चलायमान न करे अर्थात् स्वीकार करिले ११० ॥

त्रैविद्योहेतुकस्तर्कीनैरुक्तोधर्मपाठकः । त्रयश्चाश्रमिणःपूर्वेपरिषत्स्याद्दशावरा १११ ॥

प० । त्रैविद्यः हेतुकः तर्की नैरुक्तः धर्मपाठकः त्रयः च आश्रमिणः पूर्वे परिषत् स्यात् दशावरा ॥

यो० । त्रैविद्यः हेतुकः तर्की नैरुक्तः धर्मपाठकः चपुनः पूर्वे त्रयः आश्रमिणः एषा दशावरा परिषत् स्यात् ॥

भा० । ता० । तीनोंवेदों की शाखापढ़नेवाले तीन और श्रुतिस्मृति के अविरोधी न्यायशास्त्रका ज्ञाता और मीमांसाका ज्ञाता और निरुक्तपाठी और मनुआदि धर्मशास्त्र का वेत्ता और पहिले तीनों आश्रमी अर्थात् वानप्रस्थ ब्रह्मचारी गृहस्थ ये तीनों—ये दश जिसमेंहों वहदशावरा कमसे कम दश विद्वानोंवाली परिषत् (सभा) होती है १११ ॥

ऋग्वेदविद्यजुर्विच्चसामवेदविदेवच । त्र्यवरापरिषज्ज्ञेयाधर्मसंशयनिर्णये ११२ ॥

प० । ऋग्वेदवित् यजुर्वित् च सामवेदवित् एव च त्र्यवरा परिषत् ज्ञेया धर्मसंशयनिर्णये ॥

यो० । ऋग्वेदवित् यजुर्वित् चपुनः सामवेदवित् धर्मसंशयनिर्णये एषा त्र्यवरा परिषत् ज्ञेया ॥

भा० । ता० । ऋग्वेद—यजुर्वेद सामवेद इनतीनों के ज्ञाता तीन जिससभामेंहों धर्म संशय के निर्णयमें वहसभा त्र्यवरा जाननी अर्थात् कमसे कम तीनविद्वानोंवाली जाननी—इनदोनों श्लोकों से दशावरा और त्र्यवरा सभाबनानेका प्रकार वर्णनकिया ११२ ॥

एकोऽपिवेदविद्धर्मंयंव्यवस्येद्द्विजोत्तमः।सविज्ञेयःपरोधर्मोनाज्ञानामुदितोऽयुतैः ११३।

प० । एकः अपि वेदवित् धर्मं यं व्यवस्येत् द्विजोत्तमः सः विज्ञेयः परः धर्मः न अज्ञानां उदितः अयुतैः ॥

यो० । एकः अपि वेदवित् द्विजोत्तमः यं धर्मं व्यवस्येत् सः धर्मःपरः विज्ञेयः अज्ञानां अयुतैः उदितः न विज्ञेयः ॥

भा० । वेदका ज्ञाता एकभी ब्राह्मण जिसधर्मका निश्चयकरदे वही परमधर्म जानना और दश सहस्र भी मूर्ख जिसका निश्चयकरें वहधर्म नहींजानना ॥

ता० । वेदार्थ और धर्मकाज्ञाता एकभी द्विजोंमें उत्तम जिसधर्मका निश्चयकरिदे वहीधर्म उत्तम जानना– और वेदके न जाननेवाले दशसहस्रभी जिसधर्मकोकहें वह उत्तम नहींजानना–इसश्लोक में वेदवित् शब्द वेदार्थधर्म के जाननेवाले का बोधक है और यह भी श्रेष्ठका उपलक्षक है–तिससे स्मृति पुराण मीमांसा न्यायकाज्ञाता और गुरु परंपरासे उपदेशके वेत्ताकाभी ग्रहणकरना और इसे वचनके अनुसार केवल शास्त्रके अनुसार भी धर्मका निर्णय नहींकरना–क्योंकि युक्तिहीन विचारमें धर्मकी हानि होतीहै–तिससे यदि बहुतस्मृतिका जाननेवालाभी यदि भलीप्रकार प्रायश्चित्तआदि धर्मको जानताहोय तो उसएक का कहाहुआ भी धर्म उत्तम जानना–क्योंकि यमराज ने इसेवचन से यहकहाहै कि धर्मशास्त्रके पढनेवाला एक दो वा तीन जिसधर्मकोकहें वहधर्म जानना–और इतर सहस्र मनुष्य जिसको कहें वहधर्म नहींजानना–निदान वेद धर्मशास्त्रके ज्ञाता जिसका निर्णयकरदें वही धर्मजानना ११३ ॥

अव्रतानाममन्त्राणांजातिमात्रोपजीविनाम्।सहस्रशःसमेतानांपरिषत्त्वंनविद्यते ११४॥

प० । अव्रतानां अमंत्राणां जातिमात्रोपजीविनाम् सहस्रशः समेतानां परिषत्त्वं न विद्यते ॥

यो० । सहस्रशः समेतानां अपि अव्रतानां अमंत्राणां–जातिमात्रोपजीविनां–परिषत्त्वं न विद्यते ॥

भा० । ता० । जो सावित्र्यआदि ब्रह्मचारीके व्रतोंसे हीनहैं और मंत्र (वेदाध्ययन) से रहितहैं और जो जातिमात्रकेही ब्राह्मण हैं वे चाहै सहस्र भी जिसमें एकत्रहों वहसभा नहींहोसक्ती क्योंकि उस सभाको धर्म निर्णयका सामर्थ्य नहींहोता ११४ ॥

यंवदन्तितमोभूतामूर्खाधर्ममतद्विदः। तत्पापंशतधाभूत्वातद्वक्तॄननुगच्छति ११५ ॥

प० । यं वदंति तमोभूताः मूर्खाः धर्मं अतद्विदः तत् पापं शतधा भूत्वा तद्वक्तॄन् अनुगच्छति ॥

यो० । तमोभूताः अतद्विदः मूर्खाः यं वदंति–यत्प्रायश्चित्तादिकं उपदिशंतीत्यर्थः–तत्पापं शतधाभूत्वा तद्वक्तॄन् अनुगच्छति–भवति ॥

भा० । ता० । अधिक तमोगुणी (धर्ममें प्रमाणरूप वेदार्थके अज्ञाता) और प्रश्नविषयकधर्म के ज्ञानसे हीन मूर्ख–जिस प्रायश्चित्तआदि धर्मका पुरुषको उपदेश करते हैं उसका पाप सौगुणाहोकर उन उपदेश करनेवालोंकोही होताहै ११५ ॥

एतद्वोऽभिहितंसर्वंनिःश्रेयसकरंपरम्।अस्मादप्रच्युतोविप्रःप्राप्नोतिपरमांगतिम् ११६

---

१ केवलंशास्त्रमाश्रित्य नकर्तव्योविनिर्णयः । युक्तिहीनविचारेतुधर्महानिःप्रजायते ॥

२ एकोद्वौवात्रयोवापियद्ब्रूयुर्धर्मपाठकाः । सधर्मइतिविज्ञेयः नेतरेषांसहस्रशः ॥

प० । एतत् वः अभिहितं सर्वं निश्श्रेयसकरं परं अस्मात् अप्रच्युतः विप्रः प्राप्नोति परमांगतिम् ॥

